द्विभ्यतः केचिदसंनिकृष्टग्रहणं स्मरणाभिमाननिरासार्थं व्याचक्षते गृहीतग्राहित्वमेवानुमानस्य स्वीकुर्वाणाः। तथापि नाऽप्रामाण्यम्, नह्यगृहीतग्रहणं प्रमाणलक्षणम्। अनुभूतिर्हि तल्लक्षणम्। अनुमानं च गृहीतग्राहित्वेपि प्रत्युत्पन्नलिङ्गकारणजन्यत्वेन संस्कारमात्रजन्यत्वाभावादनुभूतिरेवेति युक्तमस्य प्रामाण्यम्।

अथ स्मृतिप्रमोषः कस्मान्नाश्रीयते? प्रत्युत्पन्नकारणसद्भावात्, संस्कारातिरिक्तकारणासद्भावेन हि 'इदं रजतम्' इत्यत्रानुभवरूपस्यापि रजतज्ञानस्य बलात् स्मृतित्वमाश्रित्य प्रमोषोऽङ्गीकृतः। अत्र तु लिङ्गस्यानुभवकारणस्य सद्भावादयुक्तं प्रतीतिसिद्धस्यानुभवरूपस्यापह्नवेन स्मृतिप्रमोषाङ्गीकरणमिति।

सोयमेषामकारणकत्रासः, तथा हि—यदि हि यावद्व्याप्यं व्यापकसद्भावोऽवगतः स्यात्ततो गृहीतग्राहित्वमाशङ्क्येतापि, न त्वेवमस्ति। महानसादिष्वेव हि दृष्टान्तधर्मिषु प्रागनुमानाद् धूमस्याग्निसाहित्यमवगतम्, न सर्वत्र, प्रमाणासंभवात्। यथा चासंभवस्तथा न्यायरत्नमालायामेव प्रपञ्चितम्।

स्मरणाभिमानके निरासके लिए है। 'अतः अनुमान गृहीत-ग्राहि होनेपर भी प्रमाण माना जाता है' ऐसी व्याख्या करते हैं। ऐसा होनेपर भी अनुमानका अप्रामाण्य नहीं है। क्योंकि अगृहीतार्थका ग्रहण (अर्थात् अज्ञातार्थका ज्ञापन) प्रमाणका लक्षण नहीं, किन्तु अनुभूति ही प्रमाणका लक्षण है। अनुमानके गृहीत-ग्राहि होनेपर भी, पक्षमें रहनेवाला जो प्रत्युत्पन्नलिङ्ग = वर्तमान लिङ्ग (हेतु) है, उसीसे जन्य होनेके कारण, अनुभूति हो है, क्योंकि संस्कार मात्र जन्यत्व स्मृतिका लक्षण है। वह अनुमानमें नहीं है। इसलिए अनुमान अनुभव ही है, अतः इसका प्रामाण्य युक्त ही है।

शंका—स्मृतिप्रमोष क्यों नहीं मान लिया जाता? (अर्थात् शुक्ति-रजत ज्ञान स्थलमें चाकचिक्यसे रजतका स्मरण होता है। उसमें तत्ताका जो स्मरण है, वह छूट जाता है। 'तद्रजतं' ऐसा स्मरण होना चाहिए, पर दोषके कारण उसका प्रमोष हो जाता है। इसीको स्मृति प्रमोष या प्रमुष्टतत्ताका स्मरण भी कहते हैं वैसे अनुमान स्थलमें भी स्मृति प्रमोष क्यों न माना जाए?)

उत्तर—'यह रजत है' इस स्थलमें रजत-ज्ञानके संस्कारसे अतिरिक्त दूसरा कारण नहीं है। इसलिए परिशेष न्यायसे अनुभवरूप रजत ज्ञानको स्मृति मानते हैं। वहाँ तत्ताका प्रमोष भी माना जाता है। प्रकृतमें तो धूमरूप हेतु, जो अनुभवका कारण है, उसके होनेसे, प्रतीति सिद्ध अनुभवत्वका निषेध करके, स्मृति-प्रमोष मानना उचित नहीं है।

उक्त प्राभाकर मतका निरास करते हैं 'सोऽयं' से। यह उनको बिना कारणके भय है। इसी बातका 'तथाहि' से उपपादन करते हैं। यदि जितने व्याप्यके अधिकरण हैं, उनमें व्यापक (साध्य) का होना व्याप्तिग्रह-कालमें ही गृहीत हो जाए तो, गृहीत ग्राहित्वकी आशंका भी हो सकती है, किन्तु ऐसा नहीं होता। क्योंकि महानसादि सपक्षोमें अनुमानके पहिले धूमका अग्नि साहचर्य ज्ञात है सर्वत्र नहीं, इसमें कोई प्रमाण नहीं। जैसे प्रमाणका होना असम्भव है, वैसे न्यायरत्नमालामें विस्तारसे प्रतिपादित किया गया है*।

---

* यथा—'कश्चित्तु बहिरिन्द्रियविषयमेव नियममिच्छति। स हि मन्यते 'वह्निधूमयोः सम्बन्धो देशकालानवच्छिन्न एव प्रत्यक्षेणावगम्यत इति' इत्यादिनाशङ्क्य, 'अपिचैवं प्रत्यक्षानवगततत्कालसम्बन्धनियमविरुद्ध स्यान्यत्रानवगतस्य कालान्तरसम्बन्धस्यानुमानेन

दृष्टान्तधर्मिष्वेव बहुशोऽग्निसाहित्यमुपलब्धवतः अनग्नौ च क्वचिदपि प्रयत्नेनान्विष्यमाणे धूममदृष्टवतः साध्यधर्मिष्वग्निमत्ताज्ञानमुत्पद्यते ।

आह च 'साहित्ये मितदेशत्वात् प्रसिद्धे वह्निधूमयोः ।
व्यतिरेकस्य चादृष्टेर्गमकत्वं प्रकल्प्यते' ॥ इति ॥
'धूमस्तु दृष्टिमात्रेण गमकः सहचारिणः' इति च ॥

ततश्चानुमित्सता न सर्वेषां धूमवतामग्निमत्तावगन्तव्या, नापि सर्वत्रानग्नौ धूमस्याभावः । भूयोऽग्निसाहित्यं व्यभिचारादर्शनमित्येतावदेवानुमानार्थिभिरभ्यर्थनीयम्, नाधिकं किञ्चित् । यत्त्विदं यत्र यत्र धूमः, तत्राग्निरिति ज्ञानं तदनुमानमेवेति तत्रैवोक्तम् ।

नन्वेवमप्यनेनैव सामान्यानुमानेन सर्वधूमवतामग्निमत्तावगतेति यत् पुनः पर्वतादिदेशविशेषेषु धूमदर्शनादग्न्यनुमानं तस्य गृहीतग्राहित्वं तदवस्थमेव स्यात् ? मैवम्,

---

सपक्षोंमें ही कई बार अग्निसाहचर्यका साक्षात्कार करने वाले, और अग्नि रहित देशमें कहीं भी प्रयत्नसे खोजने पर भी धूमको न देखनेवाले पुरुषको पर्वतादि पक्षोंमें अग्निका ज्ञान होता है । यों वार्तिक कारने कहा है 'साहित्ये' इत्यादिसे । अर्थ = अग्नि और धूम इन दोनोंके साहचर्यका जिनमें ज्ञान होता है, ऐसे वे प्रसिद्ध (महानस, पर्वत, चत्वर और गोष्ठ आदि) प्रदेश सीमित होते हैं । उनमें धूमका ज्ञान होनेपर, वह्न्यभाव प्रदेशमें धूमको न देखते हुए भी, धूम वह्निका अनुमापक है, ऐसी अन्वय-व्यतिरेकसे कल्पनाकी जाती है । और भी कहा है—धूम तो दर्शन मात्रसे ही सहचारी वह्निका अनुमापक होता है, अतः जो अनुमान करना चाहता है । उसे सभी धूमाधिकरणोंमें अग्निमत्ताको जाननेकी कोई आवश्यकता नहीं । और न ही सभी वह्नि अनधिकरणोंमें धूमाभावको जाननेकी ही आवश्यकता है ।

(अब व्याप्ति ज्ञानकी सामग्री बताते हैं कि) अनेक बार धूम और अग्निका साहचर्य तथा व्यभिचारका अदर्शन, इतना ही अनुमानार्थियोंको चाहिए, इससे अधिक कुछ नहीं । और यह जो कहा 'जहाँ जहाँ धूम है, वहाँ वहाँ अग्नि है' यह ज्ञान (जो पुनः पुनः दर्शनसे होता है) वह अनुमान ही है, ऐसा न्यायरत्नमालामें स्पष्ट किया गया है❀ ।

शंका—उक्त प्रकारसे अनुमानके द्वारा सामान्यतः सभी धूमाधिकरणोंमें अग्निका सद्भाव ज्ञात हो गया । तब पर्वतादि देश विशेषोंमें धूमके दर्शनसे जो अग्निका अनुमान होता है, उसका गृहीतग्राहित्व ज्योंका त्यों बना रहा ।

❀ जैसेकि—'यस्त्वयं यत्र यत्र धूमस्तत्र तत्राग्निरिति भूयो दर्शनतोऽवगमः, स कथम् ? न ह्यसौ नास्ति, न चाप्रमाणम् सर्वदा सर्वेषां दृढत्वेन जायमानत्वात् । तदयं कस्मिंश्चित्प्रमाणेऽन्तर्भवतीति वक्तव्यम् ? उच्यते—आनुमानिकोऽयमवगमः, ज्ञातसम्बन्धस्योपजायमानत्वात् । परोक्षरूपत्वाच्च नैन्द्रियकः, साक्षात्कारित्वाभावात् संविद्विरोधाच्च । इति । (न्यायरत्नमाला पृ० ७४,) 'ग्रहणे गृहीतग्राहित्वमनुमानस्य दूरापास्तं स्यात्' 'अवगतमपि महानसादौ समान्यं देशान्तरकालान्तरादौ प्रत्यक्षेणेवानुमानेन प्रत्यभिज्ञायमानं भवति प्रमेयमिति न सिद्धसाध्यता' । द्रष्टव्य—न्यायरत्नमाला, व्याप्तिनिर्णय प्रकरण, पृ० ६४ । वार्तिककारने भी कहा है—
देशस्य पर्वतादेस्तु स्वरूपे पावकादृते । गृहीतेऽग्निविशिष्टस्य पुनर्ज्ञानं न दुष्यति ॥
तस्मादधर्मविशिष्टस्य धर्मिणः स्यात् प्रमेयता । सा देशस्याग्नियुक्तस्य धूमस्यान्यैश्च कल्पिता । इति ।
श्लोकवार्तिक, अनुमान खण्ड, का० ४६–४७

सामान्यविशेषभेदात्—सामान्येन हि धूमवतामग्निमत्तावगता, पर्वतादेस्तु देशविशेषस्य स्वरूपमपि प्रागनवगतम्, नतरामग्निमत्त्वम्।

यस्त्ववगतमेवेति मन्यते, तेन पर्वतस्वरूपमेव तावदप्राप्तं पर्वतसमीपस्थैः केन प्रमाणेनावगतमिति वक्तव्यम्। न प्रत्यक्षेण, नान्येन प्रमाणेन, न चानवगतपर्वतस्तस्याग्निमत्तामवधारयितुमलम्। यदि चेदानीतनं पर्वतस्याग्निमत्त्वं प्रागेवावगतं स्यात्, ततोऽग्न्यर्थी विनैव धूमदर्शनेनाग्नये पर्वतमारोहेत्। नह्यग्न्यर्थिनोऽवगतेऽग्नौ धूमदर्शनेनार्थः कश्चित्।

किं च धूमोपलक्षितस्य पर्वतादिदेशविशेषस्याग्निसंबन्धोवगत इति वदता धूमसंबन्धोप्यवगत इति वक्तव्यम्। नह्यज्ञातसंबन्धमुपलक्षणमुपलक्ष्यमुपलक्षयितुं क्षमम्।

अथ देशमात्रस्य धूमेनोपलक्षणं न देशविशेषस्य ? ततोग्निमत्त्वमपि तन्मात्रस्यावगतं न देशविशेषस्य, अतो लिङ्गलिङ्गिनोरविशेषात् 'लिङ्गस्यैव देशकालातिरेको न लिङ्गिनः' इति प्रलापमात्रम्।

अपि च यत्राग्नीन्धनसंयोगस्तत्र धूम इत्यनेन धूमोप्यवगत एवेति न किञ्चिदप्यवगन्तव्यमवशिष्यते धूमज्ञानेनेत्यलं बालजल्पितेन।

उत्तर—ऐसा नहीं कह सकते; सामान्य और विशेषका भेद होनेके कारण। क्योंकि जहाँ जहाँ धूम है, वहाँ वहाँ अग्नि है, इस सामान्यतः अनुमानसे, सभी धूमाधिरणोंमें अग्निका सद्भाव ज्ञात हो गया। 'यह पर्वत वह्निमान है' ऐसा व्याप्ति ज्ञानके समय विशेषरूपसे पर्वतमें अग्निका होना जानलिया। साथ ही पर्वतादि देश विशेषका स्वरूप भी ज्ञात नहीं हुआ। उस अवस्थामें पर्वतादिकी अग्निमत्ता सर्वथा ज्ञात नहीं होती।

और पर्वतमें अग्निका सद्भाव ज्ञात हो गया, ऐसा जो मानता है, उसे यह कहना होगा, कि पर्वतस्वरूप हो अप्राप्त है। तब पर्वतके समीपमें रहने वालोंको किस प्रमाणसे अग्नि सद्भाव ज्ञात हुआ ? प्रत्यक्ष प्रमाणसे नहीं कह सकते। दूसरे प्रमाणसे भी नहीं। तब जिसने पर्वतको नहीं समझा है, वह व्यक्ति पर्वतमें अग्निसद्भावको नहीं जान सकता। अथवा यदि वर्तमान पर्वतमें अग्निसद्भाव पहिलेसे ज्ञात होता तो अग्निको चाहने वाला धूम दर्शनके बिना ही अग्निके लिए पर्वतपर पहुँच जाएगा। क्योंकि जो अग्नि तो चाहता है, उसे अग्नि प्राप्त होनेपर, धूमदर्शनका कोई प्रयोजन नहीं रह जाता।

इस पक्षमें दूसरा दोष देते हैं 'किंच' से। धूमसे उपलक्षित पर्वतादि देश विशेषमें अग्नि-सम्बन्ध ज्ञात है, ऐसा जो कहता है, उसे साथ ही यह भी कहना होगा कि धूम-सम्बन्ध भी जान लिया है। क्योंकि उपलक्षण (ज्ञापक) के सम्बन्धको जो नहीं जानता, अर्थात् अज्ञात सम्बन्धरूप उपलक्षणके द्वारा उसे उपलक्ष्यका बोध होना सम्भव नहीं।

शंका—धूम देश समान्यका उपलक्षण (ज्ञापक) होता है, देश विशेषका नहीं।

उत्तर—उससे देश सामान्यका ही अग्नि सम्बन्ध ज्ञात होगा, देश विशेषका नहीं। अतः यह जो कहा गया कि हेतु और साध्य दोनोंमें कोई विशेषता न होनेके कारण हेतुमें ही देश-काल-कृत विशेषता आती है, साध्यमें नहीं; यह उनका कहना प्रलाप मात्र है।

यदि चावगतमेवानुमानेनावगम्यते। ततः स्मरणमेव प्रमुषिततद्भावमनुमानज्ञानं स्यात्। न च प्रत्युत्पन्नकारणजत्वादस्मृतित्वम्, तदसिद्धेः—संबन्धिदर्शनं हि सदृशदर्शनवत् संस्कारमुद्बोधयेत्। क्लृप्तं हि तत्र तस्य कारणत्वम्। संस्कारश्चोद्बोधितः स्मृतिं जनयतीत्यविवादम्। स्मृतेश्च प्रमोषः शुक्तिकारजतादिवेदनेषु क्लृप्त एव। तदेवं क्लृप्तेनैव मार्गेण धूमादग्निज्ञानोत्पत्तौ को नामाक्लृप्तं लिङ्गस्य लिङ्गिज्ञानहेतुत्वं कल्पयेत्। कल्पनायां वा शुक्तावपि रजतवेदनस्यानुभवरूपत्वात्तदुपपत्तये दोषस्यैवानुभवहेतुत्वं कल्पनीयम्। अकल्पने त्वत्रापि स्मृतिप्रमोषादप्रामाण्यमेव स्यात्। तस्मादवश्यमगृहीतग्राहित्वमङ्गीकर्तव्यम्।

नन्वग्निविशेषस्यागृहीतसंबन्धस्याननुमेयत्वात्सामान्यमेवानुमेयम्, तच्च प्रागवगतमेवेति कथमगृहीतग्राहित्वम्?

यथाहुः—'विशेषेऽनुगमाभावः, सामान्ये सिद्धसाध्यता।
अनुमाभङ्गपङ्केस्मिन्निमग्ना वादिदन्तिनः'॥ इति॥

और दोष देते हैं, 'अप्रिय' इत्यादि से। जहाँ अग्नि-ईन्धन संयोग है, वहाँ धूम है, इससे धूम भी मालूम होगया। अतः धूम ज्ञानसे जानने योग्य कोइ अवशिष्ट नहीं रह जाता। इसलिये ऐसी बालकोंकी-सी बातें मत कीजिए।

शंका—इसके विपक्षसे बाधक युक्ति बताते हैं 'यदि' इत्यादि से। यदि ज्ञात विषयका ही अनुमानसे ज्ञान होता है, तो अनुमान-ज्ञान तत्तांशका प्रमोष माननेपर स्मरणात्मक होगा। इसमें हेतु है कि अनुमान संस्कार जन्य नहीं है, वल्कि प्रत्युत्पन्न हेतु, ज्ञानरूप कारणसे जन्य होनेके कारण स्मृति नहीं होगा।

उत्तर—यह सिद्ध नहीं हो सकता, क्योंकि जैसे सदृश वस्तुका दर्शन संस्कारका उद्बोधक होता है, वैसे सम्बन्धिका दर्शन भी संस्कारका उद्बोधक होगा, क्योंकि सम्बन्धि दर्शन और संस्कार उद्बोधन इन दोनोंका कार्य-कारण भाव लोक सिद्ध है। इसलिए संस्कार उद्बुद्ध होकर, स्मृतिको उत्पन्न करता है, इस विषयमें कोई विवाद नहीं। स्मृतिमें तत्तांशका प्रमोष शुक्तिका-रजतज्ञानमें सिद्ध ही है। इस प्रकार क्लृप्त (निश्चित) मार्गके द्वारा ही धूमसे अग्नि ज्ञानकी उत्पत्ति होनेपर, कौन ऐसा व्यक्ति होगा, जो अनिश्चित साध्य-ज्ञानके हेतुत्वकी लिंगमें कल्पना करेगा। यदि कल्पना करेगा तो शुक्तिमें भी रजत ज्ञानका अनुभव होनेसे उसकी सिद्धिके लिये दोषको ही अनुभवके प्रति कारण मानना होगा। यदि कल्पना न करे तो स्मृति प्रमोषसे यहाँ भी अप्रामाण्य ही होगा। इसलिए अवश्य अनुमान अगृहीतग्राहि होता है, यह मानना चाहिए।

शंका—जिसका सम्बन्ध नहीं गृहीत है, ऐसे अग्नि विशेषका अनुमान न होनेसे, सामान्य ही अनुमेय है, ऐसा कहना होगा। यह तो पहिलेसे ही ज्ञात है। इसलिए अनुमान अगृहीतग्राहि कैसे हो सकता है? अर्थात् नहीं हो सकता। इसी बातको 'तत्त्वोपप्लवसिंह' (ग्रन्थ विशेष) के वचनसे प्रमाणित करते हैं—

अर्थ 'विशेषका अनुमान करनेमें अनुगम नहीं हो सकता, सामान्यका अनुमान माननेपर सिद्ध-साधन दोष लगेगा। इसलिए मदोन्मत्त मातंगके समान वादी, अनुमान खण्डनरूप कीचड़में धँस गए हैं'। इति।

नैष दोषः—अवगतस्यापि सामान्यस्य देशान्तरकालान्तरसंबन्धस्यागृहीतस्य ग्रहणाद् ह्युपपन्नं प्रमेयत्वम्।

इदं चापरमेकदेशिना वक्तव्यम्—केन प्रमाणेन धूदर्शनस्याग्निज्ञानहेतुत्वमवगम्यते? इति। तदानन्तर्यादिति चेत्? न, तस्य संस्कारद्वारेणाप्युपपत्तेः। अनुभवरूपत्वमनुपपन्नमिति चेत्? न, स्मरणस्यापि तत्परामर्शप्रमोपेणानुभवाभिमानोपपत्तेः। वस्तुतोऽनुभववत्वं त्वसिद्धमेव, तस्य प्रमाणाभावात। न ह्यग्निज्ञानस्यानुभवत्वे प्रत्यक्षमन्यद्वा प्रमाणमस्ति? अस्ति तु स्मृतिप्रमोपे[1]।

अथ स्मृतिप्रमोपे[2] बाधकं स्यात्, न चाग्निज्ञानस्य तदस्तीत्यतः न स्मृतिप्रमोष इति चेत्? न, स्मृतिप्रमोषस्याप्यबाधदर्शनात्। मणिप्रभादर्शिनी मणिबुद्धिस्तावत् स्मृतिप्रमोष एव, अन्यथा विपरीतख्यातिप्रसङ्गात्। अथ च प्रवृत्तस्य मणिलाभान्न बाधकमस्ति, तस्मात्स्मृतिरेवानुमानमित्यप्रामाण्यापत्तिः।

कथं च गृहीतग्राहित्वमनुमानस्य? अत्यन्तापरिदृष्टे देशे काले चाग्निरनुमीयते,

उत्तर—उपर्युक्त दोष नहीं है। क्योंकि अवगत सामान्यका भी देशान्तर कालान्तर सम्बन्ध जो पूर्वमें अगृहीत है, उसके ग्रहणसे प्रमेयत्वरूप प्रामाण्य उपपन्न होता है।

शंका—यह भी एकदेशीको बताना चाहिए कि धूम-दर्शन अग्निज्ञानका हेतु है, यह किस प्रमाणसे जाना है?

उत्तर—धूम दर्शनके अनन्तर, ऐसा कहें तो? यह उत्तर ठीक नहीं, क्योंकि संस्कारके द्वारा भी धूम दर्शन अग्नि ज्ञानका हेतु है।

शंका—इस पक्षमें अनुमान ज्ञानकी अनुभव रूपता अनुपपन्न होगी?

उत्तर—नहीं, स्मरणमें भी तत्तांशके प्रमोषसे अनुभवका अभिमान हो सकता है। वास्तवमें तो विचार करनेपर अनुभवरूपता असिद्ध ही है, उसमें कोई प्रमाण न होनेके कारण। अग्निका ज्ञान अनुभव है, इसमें प्रत्यक्ष या दूसरा कोई प्रमाण नहीं। स्मृति-प्रमोष माननेपर तो उसमें प्रमाण है। (यह पहिले कह चुके हैं, कि संस्कारके द्वारा भी धूम दर्शन अग्नि ज्ञानका कारण होता है 'एकसम्बन्धिदर्शनमपरसम्बन्धिस्मारकम्' इस न्यायसे)

शंका—जहाँ बाधक ज्ञान उत्पन्न होता है, वहींपर बाध होनेपर, स्मृति-प्रमोष माना जाता है। जैसे 'शुक्तिमें यह रजत है' इस ज्ञानमें स्मृति-प्रमोष है। वहाँ 'यह रजत नहीं है' यह बाधक ज्ञान है। प्रकृतमें 'पर्वतमें अग्नि नहीं है' ऐसा बाधक ज्ञान है ही नहीं। तब स्मृति-प्रमोष कैसे होगा, यदि ऐसा कहें तो?

उत्तर—नहीं कह सकते, स्मृति-प्रमोषका भी कहीं कहीं बाध नहीं होता। जैसे मणिप्रभा देखने वालेको मणि बुद्धि होती है। वहाँ स्मृति-प्रमोष ही है; नहीं तो विपरीतख्याति माननी पड़ेगी। और मणीके उपादानमें प्रवृत्त पुरुषको मणिकी प्राप्तिसे, 'यह मणि नहीं है' ऐसा बाधक ज्ञान नहीं होता। इसलिए अनुमान स्मृति ही है, ऐसा कहनेपर अनुमानका प्रामाण्य सिद्ध नहीं होगा। इसी पक्षमें आक्षेप करते हैं—तब अनुमानका गृहीत ग्राहित्व कैसे होगा? क्योंकि अनुमानके

१. स्मृतिप्रमोषत्वे इति 'ख' पुस्तके पाठः। २. स्मृतिप्रमोषत्वे इति 'ख' पुस्तके पाठः।

स केन प्रमाणेन प्रागवगतः ? न प्रत्यक्षेण, तस्य विद्यमानोपलम्भनत्वात्। न चान्येन केनचित्। किञ्चाग्निधूमयोर्मिथः सम्बन्धो देशकालानवच्छिन्नः प्रत्यक्षेणावगत इत्येतावदेव भवान् ब्रवीति, न चैतावता देशान्तरकालान्तरसम्बन्धोऽग्नेरवगतो भवति। तस्मादगृहीतग्राह्येवानुमानम्।

किमत्रागृहीतम्? अग्निसामान्यं तावद् गृहीतमेव, पर्वतोपि प्रत्यक्षेणावगतः, अग्निविशिष्टस्तु पर्वतो न केनाप्यवगतः, इति सोऽनुमेयो भविष्यति। तत्र च प्राप्ताप्राप्तविवेकेन सम्बन्धमात्रं प्रमेयमवशिष्यते। यथा 'दध्ना जुहोति' इति विशिष्टविषयोपि विधिर्विशेषणपरो भवति तथेहापि, विशिष्टविषयमेवानुमानम्। विशेषणविशेष्ययोस्तु प्राप्तत्वादिति, 'यजुर्युक्तंरथमध्वर्यवे ददाति' इतिवत्सम्बन्धविषयं भवतीति।

पहिले सर्वथा न देखे हुए देश और कालमें, अग्निका अनुमान होता है। वह अग्नि किस प्रमाणसे पहिले ज्ञात है ? प्रत्यक्षसे नहीं कह सकते, क्योंकि वह विद्यमानका ही उपलम्भक है। और दूसरे किसी प्रमाणसे भी नहीं।

और सुनिए—अग्नि और धूम इन दोनोंका परस्पर सम्बन्ध, देश-काल-दोनोसे अनवच्छिन्न प्रत्यक्षसे ज्ञात है, इतना ही आप कहते हैं। इससे अग्निका देशान्तर-कालान्तरके साथ सम्बन्ध ज्ञात नहीं हो सकता, इसलिए अनुमान अगृहीतका ही ग्रहण करता है।

शंका—अब यह बताइए कि 'पर्वतों वह्निमान्' इस स्थलमें क्या पहिले अगृहीत है, जिस कारणसे अनुमानको आप अगृहीत-ग्राहि ठहराते हैं ?

उत्तर=अग्नि सामान्य मालूम हो ही गई। पर्वत भी प्रत्यक्षसे जान लिया। अग्नि विशिष्ट पर्वत तो किसी प्रमाणसे भी अवगत नहीं हुआ। अर्थात् अग्नि विशिष्ट पर्वत ही अनुमेय हो सकता है। इसमें भी क्या प्राप्त है ? क्या अप्राप्त है ? इसका विवेचन ही 'प्राप्ताप्राप्तविवेक' है। इस न्यायसे सम्बन्धमात्र ही अवशेष रहता है। 'प्राप्ताप्राप्तयोर्मध्ये अप्राप्तमेव विधीयते' यह न्यायका स्वरूप है।

उक्तार्थको दृष्टान्त द्वारा समझाते हैं 'यथादध्ना' इत्यादिसे। दृष्टान्तका यह अर्थ है कि 'दध्ना जुहोति' यह वाक्य पठित है। इससे दधिकरणत्व विशिष्ट होमका विधान होता है। यहाँ विधि दधि विशिष्ट होमका विधान करती है। होम तो 'अग्नि होत्रं जुहोति' से प्राप्त हो ही चुका है। विधि अप्राप्त दधि मात्रका विधान करती है, अतः यह गुणमात्र विधि है। इसी प्रकार 'पर्वतमें अग्नि है' इस स्थलमें भी वह्नि सामान्य और पर्वत—दोनों प्राप्त हैं। केवल विशेषण पर्वत-अग्नि सम्बन्ध ही अप्राप्त है। वही अनुमानका विषय है। विशेषण-विशेष्य दोनों प्राप्त होनेके कारण यही मानना उचित है।

इसी अर्थमें दूसरा दृष्टान्त देते हैं 'यजुर्युक्तं' से। (मंत्र मूलमें देखिए) यहाँपर यजुर्युक्त जो रथ और अध्वर्यु ये दोनों प्राप्त हैं। केवल सम्बन्ध मात्रका विधान होता है। (अर्थात् विशेषण विशेष्य दोनों प्राप्त होनेसे केवल सम्बन्ध ही इसका विषय होता है) इस प्रकार वह्नि और पर्वत का सम्बन्ध अप्राप्त है, उसीका विधान होनेसे अनुमान अगृहीत ग्राहि है। अतः अनुमानका प्रामाण्य युक्त ही है।

परार्थानुमानावयवनिरूपणम्

यस्तु प्रतिपन्नमर्थं परमनुमानेन प्रतिपिपादयिषति, तेन साधनं प्रयोक्तव्यम्। येन वाक्येन परस्यानुमानबुद्धिरुत्पद्यते तत् साधनमित्युच्यते।

'तच्च पञ्चतयं केचित्, द्वयमन्ये, वयं त्रयम्। उदाहरणपर्यन्तं यद्वोदाहरणादिकम्' ॥

अक्षपादीयास्तावत्—प्रतिज्ञाहेतूदाहरणोपनयनिगमनैः पञ्चावयवं साधनं मन्यन्ते। अनित्यः शब्द इति प्रतिज्ञा, कृतकत्वादिति हेतुः, यत्कृतकं तदनित्यं दृष्टं यथा घटादीत्युदाहरणम्, कृतकश्चशब्द इत्युपनयः, तस्मादनित्य इति निगमनम्।

अयं त्वतिविस्तरो गतार्थ इति मन्वानाः सौगता द्व्यवयवम्—उदाहरणोपनयात्मकं मन्यन्ते। स्मर्यमाणनियमं हि लिङ्गं साध्यधर्मिण्यनुसन्दधानस्य स्वयमेव लिङ्गिबुद्धिरुत्पद्यते, तेन यत्कृतकं तदनित्यमिति कृतकत्वस्यानित्यत्वेन व्याप्तिनियमं स्मारयित्वाकृतकश्चशब्द इत्युपनयमात्रे कृते शब्दस्यानित्यत्वमवगम्यत एवेति, कृतमवयवान्तरैः।

इस प्रकार स्वार्थानुमानका निरूपण करके, परार्थानुमान कहते हैं 'यस्तु' इतिसे। जो देवदत्त आदि, ज्ञात अर्थको अनुमान द्वारा दूसरेको समझाना चाहता है, उसे साधनका प्रयोग करना चाहिए।

शंका—साधन किसे कहते हैं ?

उत्तर—जिस वाक्यसे दूसरेको अनुमान बुद्धि होती है, उसे साधन या साधन वाक्य कहते हैं। नैयायिक पांच अवयव मानते हैं—प्रतिज्ञा, हेतु, उदाहरण, उपनय और निगमन। बौद्ध दो मानते हैं-प्रतिज्ञा, हेतु। मोमांसक तीन मानते हैं—उदाहरण पर्यन्त। या उदाहरणसे लेकर तीन। श्लोकार्थ स्पष्ट है। नैयायिक पांच मानते हैं। यह गौतम सूत्र है-'प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः' (न्या० द० सू० १।१।३२) इस प्रकार वे साधनके पाँच अवयव मानते हैं। यथा—शब्द अनित्य है, यह प्रतिज्ञा वाक्य है। 'साध्यवत्तया पक्षवचनं प्रतिज्ञा'* यह उसका लक्षण है। 'कृतकत्वात्' यह हेतु है। 'पंचम्यन्तं लिङ्गप्रतिपादकं हेतु'। जो कृतक = कार्य होता हैं, वह अनित्य देखा गया है, जैसे घटादि, यह उदाहरण है। शब्द कृतक (कार्य) होता है, यह उपनय वाक्य है। इसलिए यह अनित्य है, यह निगमन वाक्य है। (इस प्रकार अक्षपाद मतानुयायि नैयायिकोंने परार्थानुमानके पाँच अवयव माने हैं) यह बहुत विस्तृत है, गतार्थ भी है, यह मानकर बौद्धोंने उदाहरण, उपनय ये साधनके दो अवयव माने हैं। जिसके नियमका स्मरण होता है, उस लिङ्गको पक्षमें देखकर, स्वयं ही साध्यका अनुमान होता है, और जो कार्य है, वह अनित्य है, इस व्याप्ति नियमका स्मरण करते हुए शब्द अनित्य होता है, इस उपनय मात्रसे शब्दकी अनित्यता ज्ञात हो ही जाती है. फिर दूसरे अवयवोंकी क्या आवश्यकता है ? यह बौद्धोंका कहना है।

---

* प्रतिज्ञा वाक्यका परिष्कृत लक्षण यह है कि 'संयोग सम्बन्धेन साध्यप्रकारकपक्षविशेष्यक बोधजनकत्वे सति वाक्यत्वम्' यथा पर्वतो वह्निमानिति ।

स्वमतेन अवयवत्रैविध्यवर्णनम्, तत्रैव भाष्यवार्तिकमतेन समर्थनम्

एवं त्वत्यन्तसाकाङ्क्षमेव वाक्यं क्लेशगम्यार्थं भवतीति त्र्यवयवमेव युक्तम्—अनित्यः शब्दः, कृतकत्वाद्, यत्कृतकं तदनित्यम्, यथा घटादीत्येवमुदाहरणान्तं साधनं सर्वत्र वार्तिकारः प्रयुङ्क्ते।

अथ वा—यत् कृतकं तदनित्यम्, यथा घटादि कृतकश्च शब्दस्तस्मादनित्यः—इत्युदाहरणप्रभृति प्रयोक्तव्यम्। एवमप्यन्यूनाधिकमेव साधनम्। तथा च[1] 'यत् कर्म, तत् फलवद्, होमोपि कर्म, तेनापि फलवता भवितव्यम्' इत्येव सर्वत्र भाष्यकारः प्रयुङ्क्ते।

हेत्वाभासनिरूपणम्

प्रतिज्ञादोषाः प्रत्यक्षविरोधादयोऽप्रसिद्धविशेषणत्वादयश्च वार्तिके प्रपञ्चिताः।

(अब ग्रन्थकार अपने मतको बताते हैं, क्योंकि अपना मत श्रेष्ठ होता है) इस विषयमें अनन्तरोक्त=अव्यवहित पूर्वमें कहे हुए बौद्ध मतमें दो अवयवोंको माननेपर वाक्य अत्यन्त साकांक्ष होता है। उससे विवक्षितार्थ क्लेशसे गम्य होता है, इस अरुचिको मनमें रखकर कहते हैं, कि साधनके तीन अवयव होने ही युक्त हैं। (उक्त अर्थका उदाहरण द्वारा वार्तिक वचनसे समर्थन करते हैं) शब्द अनित्य है, कार्य होनेके कारण' शब्दोऽनित्यः कार्यत्वात्' जो कार्य होता है, वह अनित्य होता है, जैसे घटादिक। इस प्रकार उदाहरण पर्यन्त साधनका वार्तिककार सभी स्थलोंपर प्रयोग करते हैं। यह पहिला पक्ष है।

उदाहरण आदि द्वितीय पक्षको 'अथवा' से कहते हैं—या जो कृतक होता है, वह अनित्य होता है, जैसे घटादि। शब्दकार्य होता है, इसलिए वह अनित्य है; इस प्रकार उदाहरणसे आरम्भ कर द्वितीय पक्ष समझना चाहिए। ऐसा माननेपर साधन वाक्यमें न कमी होती है न आधिक्य। (अर्थात् बौद्ध मतमें अवयव कम होनेसे विवक्षितार्थकी सिद्धि बड़ी कठिनाईसे होती है। न्यायमतमें अति विस्तार है। साथ ही प्रतिज्ञा और निगमन दोनों एक ही अर्थके बोधक हैं, अतः मीमांसक मत ही ठीक है)

अब भाष्यसे भी उक्तार्थका समर्थन करते हैं—भाष्यकारने भी द्वितीय अध्यायके, द्वितीय पादके 'इन्द्रियकामाधिकरण' में तीनों अवयवोंका ही सर्वत्र प्रयोग किया है। यथा—जो कर्म है, वह फलवान् है। होम भी कर्म है, उसे भी फलवान् होना चाहिए। इति।

इस प्रकार परार्थानुमानके तीन अवयवोंको बताकर, हेत्वाभासको कहते हैं 'प्रतिज्ञा दोषा'* इत्यादि से। अग्नि अनुष्ण है, इस प्रतिज्ञामें प्रत्यक्ष विरोध है। 'पर्वत कांचनमय वह्निमान है' इस

---

* प्रत्यक्षादिके विरोधसे तीनों रूपोंका बाध होनेके कारण, यह हेतु दोष हो है, प्रतिज्ञा दोष नहीं, ऐसा नहीं कह सकते, क्योंकि यह सब रूपत्रयका ही बाध है। पक्ष विपर्ययके द्वारा पक्ष दोष कहा जाता है, साध्य विकलत्वादिकी तरह। दृष्टान्त दोष भी अप्रसिद्ध विशेषणत्वादि वार्तिकके निरालम्बनवादमें वर्णित हैं। यह सब अनुमान लक्षणमें, असन्निकृष्ट विशेषणसे प्रतिज्ञादि दोषोंका निरास है।

१. चेति सम्पातायातः।

असिद्धिः, अनैकान्तिकत्वम्, बाधकत्वम्, चेति त्रयो हेतुदोषाः[१]। तत्रासिद्धिः पञ्चधा। बुद्धो धर्माधर्मवेदी सर्वज्ञत्वादिति स्वरूपासिद्धिः[२]। न हि सर्वज्ञत्वस्वरूपं क्वचिदस्ति। वह्निरदाहकः शीतत्वादिति सम्बन्धासिद्धिः, शैत्यस्य वह्निसम्बन्धाभावात्।

नन्वेवं समुद्रवृद्धौ चन्द्रोदयस्य हेतुत्वं न स्यात्, उदयस्य समुद्रसम्बन्धाभावात्? एककालसम्बन्धादुभयोरदोषः

यदा तर्हि चन्द्रस्य नभोमध्ये स्थितिं दृष्ट्वा पञ्चदशनाडिकातिक्रान्ता समुद्रवृद्धिरनुमीयते, तदा कथम्? तत्रापि परम्परासंम्बन्धादुभयोरदोषः। न हि साक्षात्संबन्ध एव सर्वत्राश्रीयते। तद्धि येन साक्षात् प्रणाड्या वा केनापि संबन्धेन नियतम्, तत् तस्य

प्रतिज्ञामें अप्रसिद्ध विशेषणता दोष है, विशेषण 'कांचनमय वह्नि' अप्रसिद्ध होनेके कारण। इस प्रकार प्रतिज्ञा-दोष श्लोक वार्तिकके अनुमान प्रच्छेदमें 'प्रत्यक्षादेश्च षट्कस्य येनैवार्थोऽवधारितः' इत्यादिसे 'एवं च धर्मसम्बन्धबाधस्तावदुदाहृतः' इत्यन्तसे कहा गया है।

इस प्रकार प्रतिज्ञा दोषोंको बताकर हेत्वाभासका निरूपण करते हैं 'असिद्धि' इत्यादिसे। मीमांसक १—असिद्धि, २—अनैकान्तिकत्व, ३—बाधकत्व, ये तीन हेतु दोष मानते हैं। उनमें असिद्धि पांच प्रकारकी होती है—स्वरूपासिद्धि, सम्बन्धसिद्धि, व्यतिरेकासिद्धि, आश्रयासिद्धि, और व्याप्त्यसिद्धि।

१—बुद्ध धर्माधर्मको जानता है, सर्वज्ञ होनेसे 'बुद्धः धर्माधर्मवेदी, सर्वज्ञत्वादिति' यह स्वरूपासिद्धिका उदाहरण है। क्यों कि सर्वज्ञत्व स्वरूप कहीं है ही नहीं।

२—अग्नि दाहक नहीं है, शीत होनेसे 'अग्निरदाहकः, शीतत्वात्' यहाँ शैत्यका अग्निसे सम्बन्ध नहीं है। अर्थात् पक्षमें हेतु नहीं है। इसीको सम्बन्धासिद्धि कहते हैं।

शंका—ऐसा माननेपर समुद्र वृद्धिमें चन्द्रोदयकी हेतुता नही होगी, क्योंकि चन्द्रोदयका सम्बन्ध चन्द्रमाके साथ है, समुद्रके साथ नहीं।

उत्तर—समुद्र वृद्धि और चन्द्रोदय दोनोंका एक कालमें होनारूप सम्बन्ध है। चन्द्रोदय अपने कालमें रहनेवाली समुद्र-वृद्धिका अनुमापक होता है; अतः कोई दोष नहीं।

शंका - उक्त रीतिसे दोषका निवारण होनेपर भी, जब चन्द्रमाकी आकाशमध्यमें स्थिति देखकर, पन्द्रह घड़ी पहिले समुद्र-वृद्धिका अनुमान होता है, तब वहाँ एक कालिकत्व सम्बन्ध कैसे होगा?

उत्तर—वहाँ भी परम्परासे सम्बन्ध है। (वह इस प्रकार है—'स्वाधिरणकालपूर्वकालावृत्तित्वम्' स्वं = नभोमध्य स्थिति, उसका अधिकरण काल है वर्तमान काल। उसका पूर्वकाल है चन्द्रोदय काल। तद्वृत्तित्व समुद्रवृद्धिमें होता है) इसलिए उक्त परम्परा सम्बन्धसे वहाँ भी अनुमान होता है। अतः कोई दोष नहीं। उक्तार्थका निरूपण करते हैं 'नहि' से। क्योंकि प्रत्येक स्थलमें साक्षात् सम्बन्धका ही आश्रय नहीं लिया जाता। जो साक्षात् या परम्परा सम्बन्धसे नियत (व्याप्त)

---

१. तस्मात्रेधाचतुर्धा वा हेत्वाभासा व्यवस्थिता। पञ्चधास्तार्किकाः प्राहुः केचिदाहुरप्रयोजकः ॥इति॥ भासर्वज्ञस्तु—'अनध्यवसित एव षष्ठः, इति मेने।

२. हेत्वभाववान पक्षः स्वरूपासिद्धिरिति न्यायमतम्। हेतुस्वरूपमेवासिद्धमितिमीमांसकमतम्।

तथैवानुमापकं भवतीति दर्शितमेवैतत्। तेन यादृशः संबन्धो हेतोर्वादिना दर्शितः, तदसिद्धौ दोषो भवति, नान्यथा।

गोशब्दः सास्नादिमद्वचनो गोशब्दत्वादिति व्यतिरेकासिद्धिः। नहि धर्मिव्यतिरेकेण गोशब्दत्वं नाम किञ्चिदस्ति। नित्यमाकाशमनवयवद्रव्यत्वादिति सौत्रान्तिकमाकाशाभाववादिनं प्रत्याश्रयासिद्धिः। वायुराकाशश्चाऽनित्यो मूर्तत्वादिति व्याप्त्यसिद्धिः, मूर्तत्वस्याकाशे व्याप्त्यभावादिति।

अनैकान्तिकत्वं द्विविधम्—सव्यभिचारं[1] सप्रतिसाधनत्वं च[2]। नित्यः शब्दोऽमूर्तत्वादिति कर्मादिष्वनित्येष्वप्यमूर्तत्वस्य संभवाद् व्यभिचार्यमूर्तत्वम्। अप्रत्यक्षो वायुर्द्रव्यत्वे सत्यरूपत्वात्, प्रत्यक्षो वायुर्महत्वे सति स्पर्शवत्त्वादिति सप्रतिसाधनत्वादुभयमप्यनिर्णायकं संशयहेतुः, अगृह्यमाणबलाबलत्वादुभयोः।

होता है, वह उसका उसी रूपसे अनुमापक होता है, यह कह चुके हैं। इससे जैसा सम्बन्ध वादिने हेतुमें दिखाया, उसकी असिद्धिमें वह दोष होता है, अन्यथा नहीं।

३—जहाँ धर्मिको छोड़कर हेतु अलग नहीं है, वह व्यतिरेकासिद्धि है। यथा गो शब्द सास्नादिमानका वाचक है, गो शब्दत्व होनेसे 'गो शब्दः सास्नादिमद्वचनो गो शब्दत्वादिति' यहाँ पक्ष-हेतु होनों एक हो गए, इसीलिए व्यतिरेक या भेदकी असिद्धि है। धर्मिसे भिन्न गोशब्दत्व नामकी कोई वस्तु नहीं है।

४—जहाँ आश्रय ही असिद्ध होता हो, उसे आश्रयासिद्धि कहते हैं। 'आकाशं नित्यमनवयवद्रव्यत्वात्' यह अनुमान सौत्रान्तिक के प्रति है। वह आकाशको पृथक् नहीं मानता, किन्तु अभावरूप ही मानता है, अतः उनके मतमें आकाशरूप पक्षकी असिद्धि है।

५—पक्षैकदेशमें हेतुके न रहनेसे व्याप्त्यसिद्धि कहलाती है। यथा—'वाय्वाकाशावनित्यौ, मूर्तत्वात्' इति। यहाँ पक्षका एकदेश आकाश है, उसमें मूर्तत्वके न होनेसे यह व्याप्त्यसिद्धिका उदाहरण है। (इसीको नैयायिक भागासिद्धि कहते हैं। पक्षके एकदेशमें सम्बन्ध न रहे तो इसीको मीमांसक व्याप्त्यसिद्धि कहते हैं)

असिद्धिको बताकर अब अनैकान्तिकका निरूपण करते हैं। यह दो प्रकार है। सव्यभिचार और सप्रतिसाधन। यथा—शब्द नित्य है, अमूर्त होनेके कारण, 'शब्दोऽनित्यः अमूर्तत्वात्'। यहाँ जो अनित्य हैं कर्मादिक, उनमें भी अमूर्तत्व है, इसलिए यह अमूर्तत्व व्यभिचारी है। नित्यत्वको सिद्ध करनेमें असमर्थ है। (इसीको नैयायिक साधारण अनैकान्तिक कहते हैं) अतः अमूर्तत्व व्यभिचारीका उदाहरण है। जहाँ दो हेतुओंमें बलाबलका निश्चय नहीं होता, वहाँ हेतु निर्णायक नहीं होते; बल्कि संशयका कारण बन जाते हैं। इसीको सप्रतिसाधन कहते हैं; जिसे नैयायिकोंने सत्प्रतिपक्ष कहा है। यथा—वायु अप्रत्यक्ष है, द्रव्य होते हुए, अरूप होनेके कारण—'वायुरप्रत्यक्षः द्रव्यत्वेसत्यरूपत्वात्'। (यहाँ द्रव्यत्वेसति-अरूपत्व हेतु है, अप्रत्यक्षत्व साध्य है) और दूसरा अनुमान है—वायु प्रत्यक्ष है, महत्वको लेते हुए, स्पर्शवान् होनेके कारण—'वायुः प्रत्यक्षः महत्वे सति स्पर्शवत्वात्'। यहाँ 'महत्वे सति स्पर्शवत्व' हेतु है। प्रत्यक्षत्व साध्य है। इन दोनों हेतुओंमें कौन प्रबल है, कौन

१. साधारणानैकान्तिक एव तार्किकाभिमतः सव्यभिचारपदेन मीमांसकैः व्यवह्रियते।
२. सप्रतिसाधने चेति 'ख' 'ग' पुस्तकयोः पाठः।

सप्रतिसाधनविषये प्राभाकरमतम्, तन्निरासश्च

कश्चित्त्वाह[1]—न विरुद्धार्थं हेतुद्वयं तुल्यबलमेकत्रसम्भवति, तद्भावे वस्तुनि नित्यसंशयापत्तेः। द्रव्यत्वे सत्यरूपत्वस्यापरोक्षावभासविरोधाद[2]प्रत्यक्षत्वमनुमापयितुमसामर्थ्याद् दौर्बल्यम्। स्पार्शनानुमानं त्वविरुद्धं बलवदिति न द्वयोस्तुल्यबलत्वम्। अतो नास्ति सप्रतिसाधनो हेतुरिति।

स वक्तव्यः—सव्यभिचारोपि तर्हि न संशयहेतुः स्यान्नित्यसंशयापत्तिप्रसङ्गादेव।

दुर्बल है, यह ज्ञान नहीं है, इसीलिए वायु प्रत्यक्ष है या नहीं ? यह संशय होता है❀।

शंका—सप्रतिसाधनके सम्बन्धमें प्राभाकर मतका उपन्यास करते हैं 'कश्चित्वाह' से। कोई (प्राभाकर) कहते हैं, कि दो हेतु जो परस्पर विरुद्धार्थके साधक हैं, समान बल वाले एक जगहमें नहीं हो सकते। ऐसा होनेपर वस्तुमें सर्वदा संशय ही बना रहेगा। जैसे इसका उदाहरण 'वायुरप्रत्यक्षः' इत्यादि ऊपर दे चुके हैं। 'द्रव्यत्वेसत्यरूपत्व' हेतु अप्रत्यक्षत्वका अनुमान करानेमें असमर्थ होनेसे दुर्बल है। उसका प्रत्यक्षके साथ साक्षात् विरोध होनेके कारण 'वायुः प्रत्यक्षः महत्वे सति स्पर्शवत्त्वात्' यह हेतु प्रबल है। इसका कोई विरोधी तो है नहीं, इसलिए उपर्युक्त दोनों हेतु तुल्य बल नहीं है। अतः सप्रतिसाधन नामक अनैकान्तिकका भेद है ही नहीं ?

उत्तर—उनसे यह कहना चाहिए कि यदि सप्रतिसाधनको संशयका हेतु नहीं मानोगे तो, सव्यभिचार भी संशयका हेतु नहीं होगा, इससे नित्य संशयका प्रसंग होने लगेगा।

❀ जो सव्यभिचार पहिले कहा है, जिसे नैयायिकोंने साधारण अनैकान्तिक माना हैं, वह भी संशयका कारण है। क्योंकि अनैकान्तिक निरूपणके प्रसंगमें वार्तिककारने संशयके तीन कारण बताए हैं—साधारण, असाधारण, विरुद्धाव्यभिचारी। क्रमशः इनका उदाहरण भी दिया है। साधारणका उदाहरण देनेके बाद 'भूमि नित्य है, गन्धवत्व होनेके कारण 'नित्या भूः गन्धवत्वात्' यहाँ स्वयं वार्तिककारने आशंका की है कि असाधारण धर्मकी उपलब्धिमें संशय नहीं होता। पुनः उसका समाधान किया है, कि निश्चयके प्रति सपक्षमें होना, विपक्षमें न होगा, ये दोनों निश्चयके अंग हैं 'सपक्षाश्रयः, विपक्षव्यतिरेकश्चेति द्वयं निश्चयांगम्' साधारणमें सपक्षव्यतिरेक अंग नहीं है, वहाँ भी हेतु रहता है। इसलिए वह भी संशयका हेतु है। असाधारण तो व्यतिरेक होनेपर भी जहाँ यह नहीं है वहाँ निश्चयके प्रति एक अंगका वैकल्य होनेके कारण, वह भी संशयका हेतु है। विरुद्धाव्यभिचारी, जो सप्रतिसाधन ऊपर कहा गया है, वही वार्तिकमें बताया गया है। इसप्रकार वार्तिकमें अनैकान्तिकके नैयायिकोंको तरह तीन भेद करनेपर भी ग्रन्थकारने अपनी बुद्धिसे अनैकान्तिकके दो भेद बताए हैं। इस विषयमें 'सिद्धान्तचन्द्रिका' कारने कहा है कि 'ग्रन्थकारने अपनी बुद्धिसे हेत्वाभासका जो वर्णन किया है, वह वार्तिक विरुद्ध है। क्यों ऐसा कहा है ? मैं इस बातको नहीं जनता हूँ—
'स्वबुद्धया ग्रन्थकारस्य यद्धेत्वाभासवर्णनम्। वार्तिकव्यतिरेकेण किमर्थं तन्न वेदम्यहम्' ॥ इति।
(सिद्धान्त चन्द्रिका, पृ० ६६)

१. अस्य उपपादनं प्रकरणपंचिकायां 'अन्ये पुनः असत्प्रतिपक्षत्वमपि-अनुमानकारणमाहुः। इत्यादिरूपेण कृतमस्ति द्रष्टव्यम् पृ० २१३।

२. अपरोक्षावभासाविरोधादिति 'ख' 'ग' पुस्तकयोः पाठः।

सत्यपि तस्य संशयहेतुत्वे प्रमाणान्तरेण निर्णयसंभवान्न नित्यसंशयापत्तिरिति चेत्? तर्हीहापि प्रमाणान्तरेण निर्णयसंभवाददोषः। तथा सति यत्प्रमाणान्तरविरुद्धं तस्य दुर्बलत्वात् इतरस्य बलीयस्त्वादतुल्यबलत्वमिति चेत्? केन चोक्तमुभयं तुल्यबलम्? इति, किं त्वगृह्यमाणबलाबलत्वमात्रम्।

तथा हि—यः स्थाणुत्वं पुरुषत्वं वा नावधारयति, तस्योर्ध्वत्वं संशयहेतुर्भवति, निर्णीते त्वन्यतरस्मिन् रूपे संशयो निवर्तते। तथा यो वायोरपरोक्षावभासं नावधारितवान् तस्य पृथिव्यादिषु प्रत्यक्षत्वव्याप्तं स्पर्शवत्वं व्योमादिषु चाऽप्रत्यक्षत्वव्याप्तमरूपत्वं वायावुपलभमानस्य भवत्येव संशयः। स तु प्रमाणान्तरेण निर्णयेसति निवर्तत इत्यास्तां तावत्। तस्मात्सप्रतिसाधनत्वमपि सव्यभिचारवत्संशयहेतुः। तथा च भाष्यकारः—'यत्कर्म तत् फलवद् होमोपि कर्म तेनापि फलवता भवितव्यम्' इत्यस्य 'उपरते कर्मणि द्रव्याणां तत्संयोगानां च द्रव्यान्तरं फलं दृष्टमिति द्रव्यमपि फलवत्स्यात्' इति सप्रतिसाधनं ब्रुवन् सप्रतिसाधनत्वमपि दूषणमिति दर्शयति, तस्मात् सोपि संशयहेतुः।

शंका—सव्यभिचार संशयका कारण होनेपर भी दूसरे प्रमाणसे साध्यका निर्णय हो जाता है। उससे नित्य संशयकी आपत्तिका वारण हो जाएगा (सप्रतिसाधनमें तो कोई निर्णायक नहीं है?)

उत्तर—यहाँ भी दूसरे प्रमाणसे निर्णय होनेके कारण नित्य संशयापत्ति दोष नहीं है।

शंका—ऐसा होनेपर, जो हेतु प्रमाणान्तरसे विरुद्ध है, वह दुर्बल है, दूसरा प्रबल है, इसलिए तुल्यबलत्व नहीं है।

उत्तर—किसने कहा दोनों तुल्य-बल हैं? बल्कि दोनोंमें बलाबल गृहीत नहीं होता, यह कहा गया है। अगृह्यमाण बलाबलत्वका 'तथाहि' से उपपादन करते हैं। जो मानव स्थाणुत्व या पुरुषत्वका निर्णय नहीं करता उसके लिए ऊर्ध्वताका दर्शन संशयका कारण होता है। किसी एक पक्षका निर्णय होनेपर संशय निवृत्त हो जाता है। वैसा प्रकृतमें भी समझिए। इसी प्रकार जिसने वायुके अपरोक्षावभासका निर्णय नहीं किया, उसे पृथिव्यादिमें प्रत्यक्षत्वके व्याप्य स्पर्शत्व एवं आकाशादिमें अप्रत्यक्षत्वके व्याप्य अरूपत्व, इन दोनोंको जो वायुमें देखता है, उसे वायु प्रत्यक्ष है या नहीं? यह संशय होता ही है। वहाँ प्रमाणान्तरसे महत्व समानाधिकरण स्पर्शत्व हेतु प्रबल है। अरूपत्व हेतु दुर्बल है; अतः उसका संशय निवृत्त होता है। इस कारणसे सप्रतिसाधन भी सव्यभिचारके समान संशयका कारण होता ही है। उक्तार्थको भाष्यकारके वचनसे प्रमाणित करते हैं 'तथा च' से। इन्द्रियाधिकरणमें भाष्यकार कहते हैं, कि जो कर्म है, वह फलवान् है। होम भी कर्म है, इसलिए उसे भी फलवान् होना चाहिए। इस बातको 'उपरते कर्मणि' इत्यादि भाष्यसे सप्रतिसाधनको कहते हुए, उसका दूषण भी बताते हैं। भाष्यार्थ=कर्म उपरत होनेपर द्रव्य तथा उनके संयोगोंका अर्थात् तन्तु और तन्तुसंयोगका पटरूप द्रव्यान्तर फल देखा गया है, अतः द्रव्य भी फलवान् होगा। इत्यादि। इससे सप्रतिसाधन भी संशयका हेतु है।

कुछ लोग असाधारणको भी अनैकान्तिक मानते हैं, उसका निराकरण करनेके लिए कहते हैं 'असाधारणं'। इति से। असाधारण तो पृथ्वीमें गन्ध देखा गया है, वह कहीं भी ज्ञानको उत्पन्न

असाधारणस्य संशयहेतुत्वनिरासः

असाधारणं तु गन्धवत्त्वं पृथिव्यां दृष्टं न क्वचिदपि बुद्धिमादधातीति न संशयहेतुः। सांधारणं हि द्वयोः साध्यतदभावयो दृष्टत्वादुभयत्राप्यनवस्थया बुद्धिमादधत् संशयहेतुरिति युक्तम्। तथा विरुद्धार्थव्याप्तमपि हेतुद्वयमेकत्र दृश्यमानं स्वव्यापकमेकस्मिन् धर्मिण्युपसंहरदेकस्य विरुद्धोभयरूपधर्मत्वासम्भवात् संशयं जनयति। न चैवम्भावोऽसाधारणस्य सम्भवतीति नायं संशयहेतुः।

बाधकस्य निरूपणम्

तथा बाधको नाम हेत्वाभासो यो विरुद्ध इति तार्किकैरभिधीयते। स च षड्विध इति केचित्—धर्मधर्म्युभयेषां स्वरूपस्य विशेषस्य[1] च बाधात्। चतुर्धेति केचित्—उभयबाधस्य धर्मधर्मिबाधान्तर्गतत्वात्। एकधेत्यपरे, सर्वथा समीहितधर्मविपर्ययसाधनत्वात्। इदमेव च युक्तम्[2], अवान्तरभेदस्यानुपयोगात्। यद्यवश्यमवान्तरभेदो

नहीं करता, इसलिए वह संशयका हेतु नहीं। साधारण तो ऐसा नहीं है; क्योंकि वह साध्य तथा उसका अभाव दोनोंके दृष्ट होनेके कारण दोनों स्थलोंमें अव्यवस्थासे ज्ञानको उत्पन्न कराता है; अतः वह संशयका हेतु है, यह ठीक ही कहा है।

इसी प्रकार विरुद्ध दोनों अर्थों (प्रत्यक्षत्व तथा अप्रत्यक्षत्व) में व्याप्त अरूपत्व विशिष्ट द्रव्यत्व हेतु और महत्व समानाधिकरण स्पर्शरूप हेतु दोनों एक जगहमें देखे जाते हैं, इसलिए दोनों हेतु स्व-व्यापक अर्थको एक धर्मीमें लाते हैं; अतः एकमें विरुद्ध उभय धर्मोंका होना सम्भव नहीं। अतः दोनों हेतु संशयको उत्पन्न करते हैं❀। असाधारणमें ऐसा नहीं होता, इसलिए वह संशयका हेतु नहीं।

अनैकान्तिकके समान बाधक भी हेत्वाभास होता है। साध्यविपरीत साधक हेतु ही बाधक कहलाता है। जिसको तार्किक 'विरुद्ध' कहते हैं। अब उसका विभाग करते हैं। कुछ विद्वानोंने इसके छः प्रकार माने हैं—१—धर्मस्वरूपबाध। २—धर्मीस्वरूपबाध। ३—धर्मविशेषबाध। ४—धर्मिविशेषबाध। ५—धर्म-धर्मि उभयस्वरूपबाध। ६—धर्म-धर्मि उभय विशेषबाध। इस प्रकार बाध के छः भेद होते हैं।

और कुछ लोगोंने=धर्म-धर्मि उभयस्वरूप बाध तथा धर्म-धर्मि उभय-विशेषबाधका क्रमशः धर्म-स्वरूपबाध तथा धर्मी स्वरूपबाधमें अन्तर्भाव करके, ४ प्रकार माने हैं। और दोनों प्रकारके बाध धर्म-धर्मीके अन्तर्गत होनेसे कुछ लोग एक ही मानते हैं। यहाँ 'अपरे' से ग्रन्थकार अपने पक्षको कहते हैं, क्योंकि सभी प्रकारसे समीहित धर्मका जो विपर्यय है, उसका साधन किया

❀ अर्थात् एकधर्म वायुमें अरूपत्व शिशिष्ट द्रव्यत्व अप्रत्यक्षत्वको लाता है और महत्वविशिष्ट स्पर्शरूपहेतु प्रत्यक्षत्वको लाता है, इसलिए दोनो धर्मतो धर्मीमें नहीं रह सकते, अतः वहाँ संशय उत्पन्न होता है)

१. विशेषणस्येति 'ख' पुस्तके पाठः।

२. ग्रन्थकारः बाधक एकविध एवेति मन्यते, तत्र युक्त्यभिधानात्। अर्धाङ्गीकारेण तु द्विविधेति कथनम्। वार्तिके तु मूलोक्तानां पक्षाणां संग्राहकमिदं पद्यम्—
'षोढा विरुद्धतामाहुश्चतुर्धा वैकधापि वा। श्रुत्यर्थोक्तस्य बाधायां प्रतिज्ञार्थस्य हेतुना॥' इति॥

वक्तव्यः, तर्हि द्वैविध्यमेव वक्तव्यम्, धर्मस्वरूपबाधनं तद्विशेषबाधनं चेति। न हि धर्मितद्विशेषबाधकत्वं नाम हेतोर्दूषणं सम्भवतीति स्वयमेव वार्तिककारेण—

'धर्मिस्वरूपबाधेन विरुद्धो योभिधीयते'। इत्यादिना दर्शितम्।

तथा हि—द्रव्यातिरिक्तः समवाय इहप्रत्ययहेतुत्वात् संयोगवदिति, अत्रेहप्रत्यय-हेतुत्वमसमवायत्वेन भेदेन च व्याप्तं संयोगे दृष्टम्, समवायस्यासमवायत्वं भेदं चापादयत् समवायधर्मिस्वरूपं तद्विशेषणं चैकत्वं बाधत इत्युदाहृतम्।

तदयुक्तम्—इहप्रत्ययहेतुत्वं हि समवाये धर्मिणि दृष्टं न वा? यद्यदृष्टम्, ततो असिद्धत्वान्न कस्यचिदपि साधकं बाधकं वा भवति, यदि दृष्टं तत्कथं अत्रैव दृश्यमानं तस्यैव बाधनं कुर्यात्? विरोधे हि सति बाधेत, न च तद्धर्मतया दृश्यमानस्य कथं चिदपि तेन विरोधः सम्भवति[1]।

ननु समवायत्वं बाधत इत्युक्तम्? यदि समवायत्वं नाम समवायधर्मिणोतिरिक्तम्, तद्बाधेपि न धर्मिस्वरूपं बाधितं स्यात्। अथ धर्म्येव तत्, न तस्य बाधकं सम्भवतीत्युक्तम्।

जाता है। यही पक्ष युक्तियुक्त है, अवान्तर भेदका कहीं उपयोग न होनेके कारण। यदि समझें कि अवश्य ही अवान्तर भेद कहना चाहिए, तो धर्मस्वरूप बाध और धर्मविशेष बाध ये दो ही प्रकार मानने चाहिएँ। धर्मि-तद्विशेषबाधन, यह हेतुका दूषण नहीं बनता, ऐसा ही वार्तिक-कारने प्रतिपादन किया है। 'धर्मिस्वरूप बाधसे जो विरुद्ध कहलाता है' इत्यादिसे दिखाया है❀। उसीका उपपादन करते हैं, कि समवाय द्रव्यसे अतिरिक्त है, 'इह' प्रत्ययका हेतु होनेसे। संयोगकी तरह—'समवायः द्रव्यातिरिक्तः, इहप्रत्ययहेतुत्वात्, संयोगवदिति'। यहाँ 'इह प्रत्ययहेतुत्व असम-वायत्वसे व्याप्त है तथा भेदसे भी व्याप्त है। यह संयोगमें देखा गया है। अतः यह समवायका असमवायत्व और भेद—दोनोंका आपादन करता हुआ, समवायरूपी धर्मी (पक्ष) स्वरूपका एवं समवायके विशेषण एकत्वका भी बाध कर देता है—ऐसा वार्तिकमें दर्शाया गया है।

यह ठीक नहीं, क्योंकि 'इहप्रत्ययहेतुत्व' समवायरूपी पक्षमें दृष्ट है या नहीं? ये दो विकल्प हैं। यदि माना जाए समवायरूपी धर्मीमें हेतु अदृष्ट है, तब वह असिद्ध होनेके कारण न किसीका साधक हो सकता है. न बाधक। यदि पहिला पक्ष माना जाए तो (अर्थात् समवायरूप धर्मीमें हेतु दृष्ट है, ऐसा माननेपर) उसका बाध कैसे होगा? क्योंकि विरोध होनेसे न बाध होता है। जो जिसके धर्मके रूपमें प्रतीत होता है उसका उसके साथ कभी भी विरोध नहीं हो सकता।

शंका—यदि कहा जाए समवायत्वका बाध होता है, (उसके आधार भूत समवायका नहीं, तो क्या दोष है?)

उत्तर—यह ठीक नहीं, क्योंकि समवायत्व समवायरूपी धर्मीसे अलग यदि होता, तो उसका बाध होनेपर भी धर्मीका स्वरूप बाधित न होता।

शंका—यदि कहा जाए वह धर्मीका स्वरूप ही है, उससे अतिरिक्त नहीं।

❀ यहाँ ध्यान देने योग्य है कि ऊपर उद्धृत वार्तिक सन्दर्भ श्लोकवार्तिकमें नहीं मिलता। सम्भव है 'बृहट्टीका' में हो; जिसे वार्तिककारने सर्वप्रथम रचा था।

१. विरोधो हि एक कालावच्छेदेन एकदेशावृत्तित्वलक्षण एव वक्तव्यः। स च तद्धर्मतया दृश्यमाने न सम्भवतीत्यर्थः।

तस्मान्न धर्मिस्वरूपबाधनं नाम हेतुदोषः क्वचित्सम्भवति, सर्वत्राद्दश्यमानस्यासत्त्वात्, दृश्यमानस्य चाविरोधात्। धर्मिविशेषणस्यैकत्वस्य कामं सम्भवति बाधः, न त्वेतद् दूषणम्। यदि खल्विहप्रत्ययहेतुत्वं समवायस्यैकत्वं विरुन्ध्यात्, ततो द्रव्यातिरेकं साधयतः किं हीयते ? न हि द्रव्यातिरेकसाधनकृतमेकत्वसाधनं यतः, तस्य दूषणत्वेन संभाव्येत। तस्माद्धर्मस्वरूपस्य तद्विशेषस्य च बाधनाद् द्विविधमेव बाधकम्। तत्र—नित्यः शब्दः कृतकत्वादिति कृतकत्वमनित्यत्वेन व्याप्तत्वान्नित्यस्वरूपमेव बाधते।

यस्तु—स्वरूपमेव शब्दानामभिधेयं नार्थान्तरमित्येतमर्थं प्रतिपिपादयिषुस्तत्सिद्ध्यर्थमेवं प्रयुङ्क्ते—अगृहीतसंबन्धावस्थोपि शब्दः, स्वाभिधेयमर्थं प्रतिपादयति, विभक्तिमत्त्वाद्, गृहीतसंबन्धवदिति, तस्य धर्मविशेषविपर्ययसाधनो हेतुः, पश्चाद्धि संबन्धग्रहणादस्वरूपप्रतिपादनं दृष्टमिति तद्वदेव प्रागस्वरूपार्थत्वं तेनैव हेतुना प्रसज्येत। स्वरूपप्रतिपादने च बाधितेऽर्थप्रतिपादनमपि तद्धर्मस्वरूपं[1] बाधितमेव। नहि[2] प्राक् संबन्धग्रहादर्थान्तरप्रतिपत्तिः शक्यते वक्तुम्, प्रतीतिविरोधादेव।

बाधकस्य हेतोऽभीप्सितसाध्यासाधकत्वस्योपपादनम्

सर्वत्र यो हेतुर्यादृग्विशेषविशिष्टेन साध्येन दृष्टान्तधर्मिषु नियतः, स तादृग्वि-

---

उत्तर—इसमें दोष कह चुके हैं, वह उसका बाधक नहीं हो सकता। अतः धर्मीस्वरूप बाध नामका हेतु दोष कहीं नहीं होता। क्योंकि जो सभी स्थलोंमें अदृश्यमान है वह असत् होता है। जो दृश्यमान है, (उसका विरोध नहीं है। इसलिए इहप्रत्ययहेतुत्वरूप समवाय द्रव्यसे भिन्न है; उसीको सिद्ध करनेके लिए इहप्रत्ययहेतुत्व प्रयुक्त होता है। उससे यदि एकत्वका बाध होता तो कोई दोष नहीं। द्रव्यातिरेकके साधनसे एकत्वको सिद्धि नहीं होती। यदि ऐसा होता, तो यह दोष माना जा सकता था। अतः धर्मस्वरूप तथा तद्विशेषण एकत्वका बाध होनेके कारण, बाधक दो प्रकारका ही होता है। यथा—शब्द नित्य है, कार्य होनेके कारण 'शब्दो नित्यः कृतकत्वादिति'। इस स्थलमें कार्यत्व अनित्यत्वका व्याप्य है; अतः वह नित्य स्वरूपको ही बाध लेता है।

अब धर्म विशेष बाधका उपपादन करते हैं 'यस्तु' से। जो वादी शब्दोंका स्वरूप ही वाच्य होता है, दूसरा अर्थ नहीं, इस अर्थके प्रतिपादनकी इच्छासे उसकी सिद्धिके लिए प्रयोग करता है, कि शब्द अगृहीत सम्बन्ध होनेपर भी स्ववाच्यार्थका प्रतिपादन करता है, विभक्तिमान् होनेके कारण, गृहीत सम्बन्ध शब्दकी तरह 'अगृहीत सम्बन्धावस्थोऽपि शब्दः, स्वाभिधेयमर्थं प्रतिपादयति, विभक्तिमत्वात्, गृहीतसम्बन्धवदिति'। यहाँ धर्म विशेषका जो विपर्यय है, उसका साधक यह हेतु है। बादमें शक्तिग्रहके द्वारा अस्वरूपका प्रतिपादन देखा गया है। अतः वैसे ही पहिले अस्वरूपार्थत्व उसी हेतुसे प्रसक्त होगा, क्योंकि स्वरूप प्रतिपादनका बाध होनेपर, अर्थप्रतिपादनरूप धर्मस्वरूप भी बाधित हो ही जाएगा। नहीं तो शक्तिग्रहके पहिले अर्थान्तरकी प्रतीति होती है यह नहीं कह सकते, प्रतीतिका विरोध होनेके कारण*।

अब बाधक हेतुका अभिमत जो साध्यका असाधकत्व है, उसका उपपादन करते हैं 'सर्वत्र'

---

* अर्थात् शब्दमें सामान्यरूपसे अर्थबोधकत्व रहनेपर भी शक्तिग्रहके पहिले अर्थ बोधकत्वरूप विशेष धर्मकी असिद्धिसे धर्म विशेषका बाध समझना चाहिए।

१. धर्मस्वरूपमिति 'क' पुस्तके पाठः। २. नापीति 'क ख' पुस्तकयोः पाठः।

शेषविशिष्टस्य साध्यस्य धर्मिणि[1] प्रमाणान्तरविरोधात् साधनासम्भवेन विपरीतं विशेषं नियमबलात्स्वयमेव बाधमानो निर्विशेषस्य च साध्यस्यासम्भवात् साध्यमेव न साधयति। यथा शरीरिचेतनकर्तृकत्वेन घटादिषु व्याप्तमुत्पत्तिमत्त्वं देहाङ्कुरादीनां चेतनकर्तृकत्वसाधनायोच्यमानं[2] शरीरिणश्चेतनस्यानुपलब्धिविरोधेन साधयितुमशक्यत्वादशरीरस्य तेनैव हेतुना घटादिवन्निवारणाद् विधाद्वयशून्यस्य चेतनस्यासम्भवाच्चेतनकर्तृकत्वमेवाङ्कुरादीनां न साधयति। तेन धर्मविशेषविरोधो हेतोः साध्यसिद्धिमेव निरुणद्धीति भवति दूषणम्। धर्मिविशेषविरोधस्तु साध्याविरोधित्वान्न दूषणम्। प्रत्युत सिद्धान्तान्तरदूषणत्वात् प्रतिवादिन एव निग्रहस्थानत्वाद् दूषणं तद्भवति न वादिनः।

यस्तु दृष्टान्तपरिदृष्टसाध्यविशेषविरोधसम्भवेपि तद्रहितं साध्यमात्रं हेतुः साधयत्येव, तच्च विशेषान्तरमाक्षिप्य सिध्यतीति वदति, तस्य—उष्णाग्निनियतस्तृणादिविकारो

से। जो हेतु यादृग् विशेषता विशिष्ट साध्यसे सपक्षोमें नियत है वह तादृश विशेषता विशिष्ट साध्यका, धर्मि (पक्षभूत शब्द) में प्रमाणान्तरके विरोधसे साधनमें असमर्थ होनेके कारण, स्वविरुद्ध विशेषका (अर्थात् अर्थ प्रतिपादकत्वका) व्याप्तिके बलसे स्वयं ही बाध करता है। किन्तु निर्विशेष साध्यके न होनेसे वह प्रतिज्ञात साध्यको सिद्ध नहीं कर सकता। इसे दृष्टान्त द्वारा समझाते हैं 'यथा' इति से। जैसे देहांकुरादि पक्ष हैं, शरीरि चेतन कर्तृकत्व साध्य है, घटादि दृष्टान्त हैं। यहाँ घटादिमें शरीरिचेतनकर्तृकत्व तथा उत्पत्तिमत्व (कार्यत्व) के साथ व्याप्ति गृहीत है। देहांकुरादिमें शरीरी कर्ता उपलब्ध नहीं होता, इसलिए उसे सिद्ध नहीं कर सकते। उसी हेतुसे घटादिकी तरह अनुमानका निषेध होता है। अतः शरीरित्व, अशरीरित्वरूप दोनों प्रकारोंसे रहित चेतनके असम्भव होनेके कारण, अङ्कुरादिमें सामान्यरूपसे शरीरीचेतनकर्तृकत्वको सिद्ध नहीं कर सकता।

इससे धर्म विशेषका विरोध, हेतुकी साध्यसिद्धिको ही रोक देता है। इसीलिए वह दोष है। धर्मि विशेषका विरोध तो साध्यका विरोधी न होनेके कारण कोई दोष नहीं। बल्कि उसके दूसरे सिद्धान्तको दूषित करनेके कारण प्रतिवादीका ही निग्रहस्थान हो जाता है, इसलिए प्रतिवादीके मतमें दोष होता है, वादीके मतमें नहीं§।

जो हेतु दृष्टान्तमें देखे हुए साध्य विशेषका विरोध होनेपर भी विशेष रहित साध्य मात्रको सिद्ध करता है, वह भी दूसरे विशेषका आक्षेप कर, उसे सिद्ध करता है, ऐसा जो वादी कहता है, तो उसके मतमें उस हेतुके द्वारा उष्णाग्निसे व्याप्त तृणादि विकार, जो कि बर्फमें देखा जाता है,

---

§ अर्थात् जहां विशेषका आक्षेप नहीं होता, वहाँ उसके बाधित होनेपर भी प्रतिज्ञात अर्थका बाध नहीं होता। क्योंकि वादी यदि यह मानता है, कि प्रतिवादी इतने मात्रसे बाधक है, तो प्रकृतमें दूसरा सिद्धान्त दोष युक्त है. वह निग्रहस्थान हो जाएगा। यह सब विषय हेत्वाभास ग्रन्थोंमें देखना चाहिए। यथा—'अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः' (न्या० द० सू० ५।२।२३) अनिग्रह स्थान प्राप्तको निगृहीत करना 'निरनुयोज्यानुयोग' निग्रह स्थान कहलाता है।

१. साध्यधर्मिणीति 'ख' पुस्तके पाठः।

२. साधनतयोच्यमानमिति 'ख' पुस्तके पाठः।

हिमे दृश्यमानः शैत्यप्रत्यक्षविरोधादौष्ण्यासम्भवेप्यनुष्णमेवाग्नि साधयेत्, तस्माद्धर्मिविशेषविपर्ययसाधनत्वं हेतोरदूषणमेव[१]।

उदाहरणं द्विविधम्—साधर्म्योदाहरणं वैधर्म्योदाहरणं च। साधर्म्यम्– लिङ्गमुद्दिश्य लिङ्गिन उपादानम—यो यो धूमवान्महानसादिः स सर्वोग्निमान् दृष्ट इति। सम्यगुक्ते च साधर्म्ये न वैधर्म्यं वक्तव्यं गतार्थत्वात्। यदा वक्तव्यमापतति, तदा लिङ्ग्यभावमुद्दिश्य लिङ्गाभावोपादानम् - यत्राग्निर्नास्ति तत्र धूमोपि नास्ति यथा तोयादिष्विति। यत्र भावेन भावः साध्यते तत्रैव विधिरूपं साधर्म्यम्, तत्प्रतिषेधरूपं च वैधर्म्यम्। यत्र तु मेघाभावादिना वृष्ट्याद्यभावः साध्यते, तत्र साधर्म्यमेव प्रतिषेधरूपम। यथा – यदा यत्र मेघोन्नतिर्नास्ति[२] तदा तत्र वृष्टिर्नास्तीति। वैधर्म्यं तु विधिरूपम्। यत्र वृष्टिरस्ति तत्र मेघोत्पत्तिरस्तीति। तेन यद्भिक्षुणोक्तम्—'प्रसज्यप्रतिषेधात्मकमेव वैधर्म्यम्' इति तदनादरणीयम्।

उसमें शैत्यका प्रत्यक्षसे विरोध है। उसमें उष्णता सम्भव नहीं। फिर भी अनुष्ण अग्निको ही वह हेतु सिद्ध करेगा। इसलिए धर्मि विशेषका जो विपर्यय साधन है, वह हेतुका दोष नहीं होता*।

हेतु दोषोंको बताकर उदाहरणका प्रतिपादन करते हैं 'उदाहरणं' इतिसे। उदाहरण दो प्रकारका होता है। साधर्म्य तथा वैधर्म्य। साधर्म्य कहते हैं लिंग (हेतु) को उद्देश्य करके, लिंगि (साध्य) को ग्रहण करना। उदाहरण जैसे—जो जो धूमवान् होते हैं महानसादिक वे सब अग्निमान देखे गए हैं। जहाँ ठीकसे साधर्म्यको कहदिया जाए, वहाँ वैधर्म्य कहनेकी कोई आवश्यकता नहीं, गतार्थ होनेके कारण। अर्थात् साधर्म्यको ठीक प्रकारसे कहने पर, अनुमिति उत्पन्न हो ही जाती है। वहाँ वैधर्म्य कहना अपेक्षित नहीं होता। यदि कहना चाहें तो लिंगि (साध्य) के अभावको उद्देश्य कर, लिंगाभावका ग्रहण करना चाहिए। जैसे जहाँ अग्नि नहीं है, वहाँ धूम भी नहीं है; यथा जलह्रद आदिकोंमें।

अब यह बताते हैं कि जहाँ भाव (पदार्थ) से भाव (पदार्थ) को साध्य मानते हैं, वहाँ विधिरूप साधर्म्य होता है और उसका प्रतिषेध रूप वैधर्म्य होता है। जहाँ मेघाभवसे वृष्टयादिके भावका अनुमान होता है, वहाँ साधर्म्य प्रतिषेध रूप ही होता है। उदाहरण जैसे—जहाँ मेघोत्पत्ति नहीं है, वहाँ उस समय वृष्टि भी नहीं होती। वैधर्म्य तो विधिरूप होता है। जहाँ वृष्टि है, वहाँ मेघोत्पत्ति है। इससे भिक्षु धर्मकीर्तिने न्याय बिन्दुमें कहा है—'वैधर्म्य प्रतिषेध रूप ही होता है' उनका यह कथन निरस्त हुआ।

---

* अर्थात् अग्निके सम्बन्धसे तृणादि भस्म होते हैं। यदि भस्म न भी हों तो कुछ रूप तो बदल ही जाता है। उनमें कुछ विकार होता है। बर्फमें उष्ण अग्निका होना सम्भव नहीं। अतः पूर्व पक्षीके मतमें शीताग्नि ही सिद्ध होगी। क्योंकि सपक्षमें दृष्ट विशेष, पक्षमें असम्भव होने पर भी हेतु साध्यका साधक होता है, ऐसा पूर्वपक्षीने माना है। अतः यह आपत्ति उनके मतमें है, सिद्धान्तमें नहीं।

१. अत्र मानमेयोदकारेण नारायणभट्टेन साध्यस्वरूपविरुद्धः, साध्यविशेषविपरीतविरुद्ध इति विरुद्धस्य द्वैविध्यं दर्शितम्। ग्रन्थकारस्तु-एक एव विरुद्ध इति मन्यते इति प्रागुपपादितमस्माभिः।

२. मेघोत्पत्तिरिति 'ख, ग' पुस्तकयोः पाठः।

साधर्म्याभासाश्च—साध्यविकलत्वादयः, वैधर्म्याभासाश्च—साध्याभाववैकल्यादयो वार्तिक एव द्रष्टव्या इति।

प्राभाकरव्याख्यानस्यानुवादनिरासौ

'तत्तु द्विविधम्' इति दृष्टस्वलक्षणविषयमेवानुमानमिति मन्वानान् निराकर्तुमदृष्टस्वलक्षणविषयमप्यनुमानं क्रियादिविषयमस्तीति दर्शयितुं द्वैविध्याभिधानम्। न हि क्रियास्वलक्षणं प्रत्यक्षेण कदाचिद् गृह्यते, पूर्वोत्तरदेशसंयोगविभागमात्रस्य प्रत्यक्षेण ग्रहणम्, ताभ्यामेवागन्तुकाभ्यामागन्तुकं कारणमनुमीयते, तच्च क्रियेत्युच्यते।

(उदाहरण स्वरूपको बताकर वार्तिकमें कहे हुए उदाहरण दोषोंका दिग्दर्शन कराते हैं) 'साधर्म्य' इति से। दृष्टान्तमें जो साध्यका अभाव होता है, वह साधर्म्याभास है। जैसे 'वह्निमान् धूमात् जलह्रद वत्' यहाँ जल ह्रदमें साध्यरूप वह्नि कभी देखा नहीं गया, इसीलिए साध्य विकलत्व आदि यह साधर्म्याभासका उदाहरण है, । वैधर्म्याभासका उदाहरण है—साध्याभाव वैकल्प आदि। यथा—जहाँ वह्नि नहीं है, वहाँ धूम भी नहीं है, महानसकी तरह। इस स्थलमें महानसमें वह्न्यभावका वैकल्य होनेसे यह वैधर्म्याभासका उदाहरण है। यह सब श्लोकवार्तिकमें देखना चाहिए❀।

अब 'तत्तु द्विविधम्' इस भाष्यकी प्राभाकर मतसे व्याख्या करते हैं 'तत्तु' इति से। (प्रभाकरमिश्रने बृहती टीकामें उक्त भाष्यका अभिप्राय बताकर अपनी व्याख्याकी है कि) जो भाट्ट मीमांसक अनुमानको दृष्टस्वलक्षण विषयक ही मानता है, उसके मतका निराकरण करनेके लिए अदृष्टस्वलक्षण विषयक अनुमान, क्रियादि विषयक भी है, इसको बतानेके लिए अनुमानके दो भेद कहे गए हैं, क्योंकि क्रियाका स्वरूप प्रत्यक्षसे कभी भी गृहीत नहीं होता। पूर्व देशका विभाग, उत्तरदेशका संयोग मात्र ही प्रत्यक्षसे गृहीत होता है, क्रिया नहीं। (संयोग—विभाग तो गुण है, अतः उनका प्रत्यक्षसे ग्रहण होता है) आगन्तुक इन दोनोंसे ही आगन्तुक कारणका अनुमान होता है, वही क्रिया कही जाती है। (इसलिए संयोग-विभागके द्वारा क्रियाका अनुमान होता है। अदृष्ट क्रिया विषयक भी अनुमान है, इस अभिप्रायसे भाष्यमें अनुमानके दो प्रकार बताए गए हैं, यह प्रभाकरका तात्पर्य है)

❀ अर्थात् दृष्टान्तमें साध्यका न होना, हेतुका न होना, साध्य-हेतु दोनोंकी व्याप्तिका न होना, इत्यादि रूपसे वहाँ दृष्टान्ताभासका वर्णन किया है। वैधर्म्यके उदाहरणको भी वार्तिककारने बड़े विस्तारसे समझाया है। यथा—

'सहभावित्वदृष्ट्या तु यदा व्याप्तिं न लक्षयेत्। परः साधर्म्यदृष्टान्तात् तं च नापेक्षते यदा ॥
वक्ता वा सह भावित्वं शुद्धं तेन वदेद् यदा। विपरीतान्वयं वापि तत्समाधित्सया तदा ॥
पूर्वज्ञानोपमर्देन वैधर्म्येणेष्ट साधनम्। व्याप्यव्यापकभावो हि भावयोर्यादृगिष्यते॥
तयोरभावयोस्तस्माद्विपरीतः प्रतीयते। धूमभावेऽग्निभावेन व्याप्तेऽग्निस्ततश्च्युतः ॥
अधूम एव विद्येतेत्येवं व्याप्यत्वमश्नुते। तस्माद्धूमेन साध्यत्वमग्नेः प्रार्थयते यदा ॥
तदानग्निरधूमेन व्याप्तो वाच्यो न चान्यथा। अनग्न्यधूमसाहित्ये व्याप्तेर्वापि विपर्यये ॥
न प्रस्तुतोपकारः स्यादन्यद्वापि प्रसाध्यते। यत्राप्यर्थस्य शून्यत्वं द्वाभ्यामेकेन वा भवेत् ॥
यदनित्यं तु तन्मूर्तमणुवद् बुद्धिवत् ख वत् ॥ इति ॥ (श्लोकवार्तिक, अनुमान परिच्छेद)

क्षणभंगवादस्य निरासः

ननु द्रव्यमेव कारणं स्यात्? न, तस्य प्रागपि[1] सद्भावात्। ननु क्षणान्तरेऽन्यद् द्रव्यं सर्वसंस्काराणां क्षणिकत्वात्, सादृश्यात्तु प्रत्यभिज्ञानम्। यदा समानदेशे पूर्वमुत्तरोत्तरमारभते तदा तिष्ठतीति लक्ष्यते। यदात्वनन्तरदेशेपूर्वपूर्वमुत्तरोत्तरमारभते तदा गच्छतीति लक्ष्यते। दीपगमनवच्छायागमनवच्च सदृशापरापरक्षणाना-मुत्तरोत्तरदेशप्रारब्धानां गमनावभासनिमित्तत्वात् कृतं क्रियया। किं चानुत्पन्नस्य क्षणस्य क्रियाश्रयत्वायोगात्, उत्पन्नस्य च विनाशग्रस्तत्वात् कथं क्रियारम्भकत्वम्? यथाहुः--'क्षणिकाः सर्वसंस्काराः, अस्थिराणां कुतः क्रिया' इति[2]। तदिदं शब्दाधिकरणे निराकरिष्यामः। ततः स्थिरत्वे सति तन्मात्रेणानुपपत्तेः क्रियानुमानं युक्तमिति।

शंका—यहाँ द्रव्य भी कारण हो सकता है, (अतः संयोग विभागके द्वारा क्रियाकी कल्पना नहीं हो सकती) उत्तर—नहीं, द्रव्य कारण नहीं हो सकता, क्यों कि द्रव्य संयोग विभागके पूर्वमें भी रहता है (अतः द्रव्यको कारण नहीं कह सकते। क्रिया ही कारण है। उसका संयोग-विभागके द्वारा अनुमान उपपन्न होता है)

शंका—द्रव्य भी तो प्रतिक्षण भिन्न-भिन्न होता है, (अतः द्रव्य ही संयोग-विभागका कारण होगा, कर्म नहीं) उत्तर—सभी पदार्थोंके क्षणिक होनेपर भी उनके सादृश्यको लेकर प्रत्यभिज्ञा होती है, (अतः आगन्तुक द्रव्य ही कारण है)

शंका—पदार्थके क्षणिक होनेपर, तिष्ठति, गच्छति, आदि प्रतीति कैसे होगी?

उत्तर—जब समान देशमें पूर्व-पूर्व क्षण, उत्तर-उत्तर क्षणका आरम्भ करता है, तब 'तिष्ठति' कहा जाता है। जब अनन्तर देशमें पूर्व-पूर्व उत्तर-उत्तरको आरम्भ करता है, तो 'गच्छति' व्यवहार होता है। उक्त अर्थका दृष्टान्त द्वारा उपपादन करते हैं—इसका यह आशय है, कि दीपकी ज्वाला तथा दीपके प्रकाशका प्रतिक्षण भेद होनेपर भी 'दीपो गच्छति' दीप जाता है, 'छाया गच्छति' छाया जाती है, ऐसा कहा जाता है। इसी प्रकार सदृशके उत्तरोत्तर क्षणोंका गमनादि क्रियाके रूपमें भान होनेके कारण, अतिरिक्त क्रियाकी कल्पना नहीं करनी चाहिए। और अनुत्पन्न जो क्षण है, वह तो क्रियाका आश्रय नहीं बन सकता। उत्पन्न तो विनाश ग्रस्त होनेसे नहीं है। वह क्रियाका आरम्भक कैसे होगा? नहीं हो सकता। इस अर्थको बौद्धोने यों कहा है—'जितने पदार्थ होते हैं, वे सब क्षणिक होते हैं। जो अस्थिर हैं, उनसे क्रिया कैसे हो सकती है?, अतः क्रियाका अनुमान नहीं होता। इसका शब्द नित्यत्वाधिकरणमें निरास करेंगे। द्रव्य तो स्थाई है, इतने मात्रसे काम नहीं चलेगा, इसलिए आगन्तुक संयोग-विभागसे क्रियाका अनुमान युक्त ही है*।

---

* इसी अभिप्रायको स्पष्ट करते हुए शालिकनाथजीने कहा है 'द्विविधमनुमानस्य प्रमेयम्, किञ्चिद्दृष्टस्वलक्षणम्, यथा वह्न्यादिकम्, किञ्चिचादृष्टस्वलक्षणम्, यथा कर्मादिकमिति'।

(प्रकरणपंचिका, अनुमान परिच्छेद, पृ० २१४)

१. समवायसम्बन्धेन क्रियां प्रति तादात्म्येन द्रव्यं कारणमिति न शक्यते वक्तुम्, द्रव्यस्य स्वरूपतो यावद्द्रव्यभावित्वेन क्रियाया यावद्द्रव्यभावित्वप्रसंगात्।

२. 'भूतिर्येषां क्रिया सैव कारकं सैव सोच्यते'॥ इत्युत्तरार्धम्। द्रष्टव्य-तत्त्वसंग्रहपञ्जिकायां पृ० ११।

क्रियानुमानस्य निरासः

न युक्तम्—कार्यं हि कारणमात्रमपेक्षते, तच्चेह दृष्टमेवास्ति। प्रयत्नविशेषानन्तरं हि शरीरे देशसंयोगविभागाख्यं फलमुत्पद्यमानमुपलभ्यते[1]। अतः स एव निमित्तम्। तद्वदात्मशरीरसंयोगश्चासमवायि, शरीरं च समवायीति किमत्राऽदृष्टकारणानुमानेन ?

नन्वसमवायिकारणभूतस्य संयोगस्य स्वाश्रये, स्वाश्रयसमवेते वा कार्यम्, नान्यत्र, तन्तुसंयोगानामिव स्वाश्रयेषु तन्तुषु पटः, तन्तुतुरीसंयोगस्य वा पटतुरीसंयोगः। प्रयत्नवदात्मसंयोगस्त्वनेवंविधे व्योम्नि कथं संयोगमारभते ? अतः कारणान्तरं कल्पनीयमिति चेत् ? न तन्तुसंयोगः स्वाश्रय एव पटमारभते, पटस्य बहुतन्तुव्यापित्वात् संयोगानां च द्वयोर्द्वयोरेव वृत्तेः।

किं च शरज्यासंयोगान्नोदनाख्याद् युगपदेव शरे शरावयवेषु च सर्वेष्वन्तर्बहिर्वर्तिषु बहूनि कर्माण्युत्पद्यन्ते। तत्र येषामवयवानां ज्यासंयोगो नास्ति, तेष्वस्वाश्रयेषु स्वाश्रयासमवेतेषु च ज्यासंयोगः कर्मारभत इति व्यभिचारः। नहि ते संयोगाश्रयीभूते शरे समवेताः, शरस्यैव तेषु समवायात्।

(इस प्रकार ग्रन्थकार अद्वैतवादका निराकरण करके, परिणामवादी भास्करके मतका 'केचित्' इत्यादि से उपपादन करते हैं) कुछ उपनिषद्के व्याख्याता भास्कर आदि मानते हैं कि परमार्थरूपसे ही आत्मा प्रपंचके रूपमें अपनी इच्छासे परिणत होता है। जैसे श्रुति है 'सृष्टिके पहिले यह सद्रूप ब्रह्म ही था और वह सजातोय—विजातीय स्वगतभेद शून्य था' 'उसने संकल्प किया मैं बहुत हो जाऊँ' इस प्रकार एक ही सन्मात्ररूपसे आत्मा सृष्टिके पहिले था। वही अनेक आकाशादि भेदसे भिन्न प्रपंच रूपसे परिणत होता है। जैसे वृक्ष बीजरूपसे परिणत होता है। उक्त अर्थके प्रतिपादक उपनिषद् वाक्य तथा पुराण वाक्य सैकड़ों दिखाई देते हैं। 'इस आत्मासे आकाश उत्पन्न हुआ' इत्यादि। कुछ श्रुतियाँ 'यह सब पुरुष ही है, इसमें नाना भेद है ही नहीं'। इत्यादि धर्मिका भेद न होनेके तात्पर्यसे कही गई हैं। इसीका दृष्टान्त द्वारा उपपादन करते हैं—जैसे एक वृक्ष बलिश्तमात्र ऊँचाईपर अनेक शाखाओंसे युक्त, दूरमें होनेवाले व्यक्तियोंको 'नाना वृक्ष हैं' ऐसा दिखाई देता है। और वृक्षको जाननेवाले व्यक्ति दूसरोंसे कहते हैं, कि यह नाना वृक्ष नहीं है, किन्तु एक ही वृक्ष अनेक शाखाओंके रूपमें अवस्थित है। उसी प्रकार नानारूप जो प्रपंच है, उसका यह नाम है, यह रूप है, ऐसे प्रपंचको देखनेवालोंको, मूल- कारण आत्मा एक ही है, उसका यह नानारूप परिणाम है, इस बातको जो नहीं जानते, उनको तत्त्व समझानेके लिए इस प्रकारके वाद हैं। सब एक हीका विस्तार है। इसमें कुछ भेद नहीं।

जो असत्ववाद हैं वे प्रपंचको विषय करते हैं। जैसे—'हे ईश्वर! आप अकेले ही परमार्थ हैं, दूसरा जगतका स्वामी और कोई नहीं'। अतः 'ज्ञानको छोड़कर और कोई वस्तु है ही नहीं 'परमार्थस्त्वमेवैको नान्योऽस्ति जगतःपते' 'तस्मान्न विज्ञानमृतेस्ति किंचित्, क्वचित्, कदाचिद् द्विजवस्तुजातम्'। इसी प्रकार प्रपंच विषयक अविद्यावाद भी हैं—

भवत्यभेदो, भेदश्च तस्याऽज्ञानकृतो भवेत्। चतुर्विधो विभेदोऽयं मिथ्याज्ञाननिबन्धनः॥

इसी प्रकार भ्रान्तिवाद भी हैं। जैसे—

१. अविकृतब्रह्मपरिणामवादिनो भास्करस्य मतमुत्थापयति केचिदित्यादिना, उपपन्नेत्यन्तेन।

ते सर्वे प्रपञ्चस्यानित्यत्वादौपचारिकाः । यथा मृगतोयरज्जुसर्पस्वप्नप्रपञ्चादयः किंचित्कालमाविर्भूय पश्चाद्विलीयन्ते, तथा भेदप्रपञ्चरूपो ब्रह्मपरिणामोप्याविर्भवति विलीयते चेत्याऽऽविर्भावतिरोभावधर्मकत्वसाम्यादसन्नित्युपचर्यते । तस्य चाऽसत्कल्पत्वे तद्विषयस्य ज्ञानस्यापि सिद्धयत्यौपचारिकं भ्रान्तित्वम् । मायानिबन्धनत्वं च—'इन्द्रो मायाभिः पुरुरूप ईयते' इत्यादिषु युक्तमुपचारेण वक्तुम् । 'आत्मैवैकः सत्यः' इति च तस्यैव नित्यत्वादुच्यते, यथा 'गो अश्वा' एव पशवोऽन्ये त्वपशवः' इति, तथेदं द्रष्टव्यम् ।

यस्त्वेवं विधान् वादान् यथाश्रुतार्थान् गृह्णाति स पश्वन्तरेष्वपशुत्ववादम्, 'आदित्यो यूपः' इत्यादि च यथाश्रुतं गृह्णीयात् । अथ तत्र प्रमाणान्तरविरोधः, सोऽत्रापि समानः । अथार्थवादत्वात्तत्र न यथाश्रुतार्थग्रहणम्, तदपि समानम्, प्रपञ्चस्याप्यसत्यत्वं वैराग्यजननार्थम्, आत्मनश्च परमार्थत्वं मुमुक्षूणामुत्साहजननार्थम् ।

'भ्रान्तिज्ञानेन पश्यन्ति जगद्रूपमयोगिनः' 'ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः ।
तदेवार्थस्वरूपेणभ्रान्तिदर्शनतः स्थितम् ॥

और मायावाद भी हैं—जैसे—'मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्' 'अस्मान्मायी सृजते विश्वमेतत् । तस्मिंश्चान्यो मायया संनिरुद्धः' इति । ये सब प्रपञ्चके अनित्य होनेसे औपचारिक हैं । इसमें दृष्टान्त है मृगतोय, रज्जु-सर्प, स्वाप्नप्रपञ्च आदि । ये कुछ कालतक आविर्भूत होकर, बादमें विलीन होते हैं । इसी प्रकार भेद प्रपंचरूप ब्रह्मका परिणाम भी आविर्भूत होकर विलीन होता है । अतः आविर्भाव तिरोभाव धर्मोंकी समानता होनेसे प्रपंच असत् है, ऐसा उपचारसे कहा जाता है । उसके असत्कल्प होनेसे तद्विषयक ज्ञान की भी औपचारिक भ्रान्ति सिद्ध होती है ।

इसी प्रकार माया के निमित्तको भी औपचारिक कहना उचित है । 'यह परमेश्र मायाशक्तियोंसे अनेक रूपको प्राप्त करता है' इत्यादि श्रुतियोंमें उपचारसे कहना युक्त है । 'आत्मा ही एक सत्य है' इस वाक्यसे उसीको नित्य कहा जाता है । (जैसे गौ और अश्वकी प्रशंसाके लिए गौ और अश्वसे भिन्न पशुओंको अपशु कहा गया है) 'गौ और अश्व ये ही दोनों पशु हैं और इनसे भिन्न अपशु हैं* । (अर्थात् पशु नहीं है)

जो (अद्वैती) पुरुष ऐसे वादोंको यथा श्रुत ग्रहण करता है, वह दूसरे पशुओंमें भी अपशुत्ववादको यथाश्रुत ग्रहण करेगा । 'यह यूप आदित्य है' इसको भी यथाश्रुत ही ग्रहण करेगा । शंका—यदि कहा जाए उक्त 'अपशवो गोऽश्वः' 'आदित्यो यूपः' इन स्थलोंमें प्रमाणान्तर (प्रत्यक्ष) से विरोध है । (अतः वहाँ ऐसा अर्थवाद माना गया है । प्रकृतमें तो कोई विरोध नहीं) उत्तर—

* मीमांसा दर्शनके अध्याय १, पाद ४, अधिकरण १६ में 'अपशवो वा अन्ये गोऽश्वेभ्यः, पशवो गोऽश्वाः' इत्यादि वाक्यको लेकर विचार किया गया है, कि यह वाक्य गुणविधि है या अर्थवाद है ? यहाँ पशुत्वका निषेध कर नहीं सकते । या पशु कार्यका निषेध भी नहीं कर सकते, अतः यह अर्थवाद है । यहाँ अजादिमें गवाश्वगत प्राशस्त्य नहीं है । किन्तु गौ और अश्वही प्रशस्त हैं, ऐसा सिद्धान्त किया है । उसी प्रकार प्रकृतमें भी आत्मा ही एक सत्य है । इत्यादि श्रुतियोंसे आत्माकी नित्यता बताई है, तदभिन्न प्रपंचका असत्व नहीं है, ऐसा समझना चाहिए ।

१. अपशवो वाऽन्ये गोश्वेभ्यः, पशवो गोऽश्वाः, (तै० सं० ५।२।६) इतिश्रुतेरर्थतः अनुवादोऽयम् ।

विस्पष्टं चैतन्मृत्पिण्डविकारदृष्टान्तदर्शनात् । सर्वत्र हि दृष्टान्तोपादानं साध्यप्रतिपादकस्य तात्पर्याभिव्यक्त्यर्थम्[1], ततश्च यथा कारणभूतमृत्पिण्डविज्ञानेन मृन्मयो विकारः सर्वो विज्ञातो भवति—शरावादिविकारो हि वाचारम्भणं नामधेयमात्रं मृत्तिकेत्येव सत्यम्, एवं प्रपञ्चोपि सद्विज्ञानेन विज्ञातो भवति। विकारो हि वाचारम्भणं नामधेयमात्रं सदित्येव सत्यम्, इत्युक्ते ज्ञायत एतत्—यथाविर्भावतिरोभावधर्मा नानाविधो विकारः शरावादिः प्रपञ्चो मृत्तिका च सर्वत्राऽनपायिनी तेषां कारणम्, कार्यकारणयोश्चावस्थामात्रभेदात् स्वरूपभेदाभावात् कारणज्ञानेन तत्सर्वं कार्यमवस्थाभेदेनाऽज्ञातमपि स्वरूपेण ज्ञातं भवति। तथा प्रपञ्चोप्याविर्भावतिरोभावधर्माऽनवस्थायी तत्कारणं चात्मा सद्रूपः सर्वानुयायी नाऽपायधर्मा, तस्मिन् विज्ञाते सर्वं तदात्मकमविज्ञातमपि व्यासरूपेण, समासेन ज्ञातं भवतीत्येतदत्र विवक्षितमस्ति, तस्मादेकस्यैवात्मनः परिणामोयं भेदप्रपञ्चो न त्वसन्नेव। असत्त्वे हि कथं सद्विज्ञानेन विज्ञातः स्याच्छशविषाणवत्। न हि मृत्पिण्डे विज्ञाते सति शशविषाणं विज्ञातं भवति, तथा प्रपञ्चोपि स्यात्, ततस्तु प्रस्तुतहानिरेव स्यात्। एकोप्यात्माऽन्तःकरणोपाधिभेदात् भिन्नो जीव इत्युच्यते, जीवभेदाच्च बन्धमुक्तिव्यवस्थाप्युपपन्नेति।

यहाँ भी विरोध समान है। शंका—यदि कहें वह अर्थवाद है, इसीलिए वहाँ यथाश्रुत अर्थका ग्रहण नहीं (प्रकृतमें तो अर्थवाद नहीं है) उत्तर—यह भी समान है। प्रपंचकी भी असत्यता वैराग्यको उत्पन्न करनेके लिए है। आत्माकी परमार्थता मुमुक्षु जनोंका उत्साह बढ़ानेके लिए है।

यह बात मृत्पिण्डका जो दृष्टान्त दिया है, उससे स्पष्ट है। सर्वत्र दृष्टान्तका उपादान साध्यका प्रतिपादक जो वाक्य है, उसका तात्पर्य व्यक्त करनेके लिए होता है। अतः कारणभूत मृत्पिण्डके ज्ञानसे सामान्य रूपसे मिट्टीका विकार (कार्य) सब ज्ञात होता है। क्यों कि शराव आदि विकार शब्द प्रयोग मात्र§ हैं। मृत्तिका की तरह जो कारण है, वह सत्य है। (अर्थात् कारणके ज्ञानसे कार्य ज्ञात होता है) इसी प्रकार प्रपंच भी सद्रूप ब्रह्मके विज्ञानसे ज्ञात होता है। विकार केवल शब्द प्रयोगका विषय है। नामधेय मात्र है। सत् ही सत्य है, ऐसा कहने पर ज्ञात होता है कि जैसे उत्पत्ति और विनाश धर्मवाले नाना प्रकारके विकार शराव (मिट्टीका ढकना) आदि प्रपंचमें मिट्टी सर्वत्र अनुस्यूत है, अतः मिट्टी उनका कारण है। कार्य और कारण इन दोनोंका अवस्था मात्रका भेद है, स्वरूपसे भेद नहीं। कारणके ज्ञानसे सभी कार्य अवस्थाभेदसे अज्ञात होनेपर भी स्वरूपसे ज्ञात होते हैं। इसी प्रकार प्रपंच भी उत्पत्ति विनाश धर्मवान् एवं स्थाई नहीं है। इसका कारण आत्मा सद्रूप है। सभीमें अनुगत है और विनाशी नहीं है। उसके जान लेनेपर तदात्मक सब कार्य विस्तारसे, अज्ञात होनेपर भी संक्षेपसे ज्ञात होते हैं, यही यहाँ विवक्षाका विषय है। अतः एक आत्माका ही परिणाम है यह भेद प्रपंच। यह असत् नहीं है। असत् होनेपर सद्रूप आत्माके विज्ञानसे वह कैसे ज्ञात होगा? शशविषाणकी तरह मृत्पिण्डका ज्ञान होनेपर, शशविषाण ज्ञात नहीं होता। वैसे प्रपंच भी ज्ञात नहीं होगा। अतः प्रस्तुत पक्षकी हानि होगी। एक ही आत्मा अन्तःकरण रूप उपाधिके

---

§ 'वाचारभ्यत इति वाचारम्भणं वागालम्बनं विकार उच्यते, परन्तु न परमार्थतो वस्त्वस्ति। यतो नामधेयं नामैव नामधेयं नाममात्रं नार्थोऽस्तीत्यर्थः। (छा० उ० ६।४ ॥)

---

१. सर्वत्रेत्यारभ्य······व्यक्त्यर्थमित्यन्तः पाठो न दृश्यते 'क' पुस्तके।

उक्तभास्करमतस्य निराकरणम्

तदिदमयुक्तम्—चिद्रूपस्यात्मनो जडरूपपरिणामाऽसम्भवात् । एकत्वे चात्मनः सर्वशरीरेषु प्रतिसन्धानं स्यात्—देवदत्तोहं यज्ञदत्तोहमेवेति, तथा देवदत्तशरीरे मे सुखं यज्ञदत्तशरीरे मे दुःखमिति, पादे मे सुखं शिरसि मे वेदनेतिवत् सर्वसुखदुःखोपलब्धिश्च स्यात् । अन्तःकरणभेदाद् व्यवस्थेति चेत् ? न, अचेतनत्वात्—न ह्यन्तःकरणं सुखदुःखे अनुभवति, अचेतनत्वात्, आत्मा त्वनुभविता, स च सर्वत्रैक इति कः प्रतिसन्धानं वारयेत् । तस्मादिदमपि नातीव सुन्दरमिति ॥इत्यविकृत ब्रह्मपरिणामवादनिरासः॥

आत्मभेदं प्रकृतिपरिणामं च जगत् साङ्ख्या मन्यन्ते । द्विविधं च साङ्ख्यम्—निरीश्वरं सेश्वरं च । निरीश्वरवादिनस्तावदाहुः—प्रकृतिरचेतना त्रिगुणात्मिका प्रधान-

---

भेदसे भिन्न होकर, जीव कहलाता है । जीवोंके भेदसे बन्ध और मुक्तिकी व्यवस्था भी सिद्ध होती है । (अतः उक्त मतका यह संक्षेप है कि सद्रूप आत्माका ही यह दृश्य प्रपंच परिणाम है, इसे अर्धजरतीय अद्वैत वाद समझना चाहिए)

उक्त मत अयुक्त है । चिद्रूप आत्माका जड़रूपसे परिणाम सम्भव नहीं॥ । शंका—आत्माको एक माननेपर सभी शरीरोंमें अनुभव होने लगेगा 'मैं देवदत्त हूँ,' 'यज्ञदत्त भी मैं ही हूँ' । इसी प्रकार 'देवदत्तके शरीरमें मुझे सुखका अनुभव होता है; यज्ञदत्तके शरीरमें मुझे दुःख हो रहा है, ऐसा अनुभव होने लगेगा । और मेरे पैरमें सुख हो रहा है, मेरे सिरमें वेदना हो रही है, इसकी तरह सभी सुख और दुःखोंका अनुभव होने लगेगा । (अर्थात् सभी शरीरोंमें रहनेवाले सुख दुःखादि परस्पर मिल जाएँगे, उन सबका अनुभव एकसाथ होने लगेगा)

शंका—यदि कहा जाए सभी शरीरोंमें एक आत्माके होनेपर भी अन्तःकरणके भेदसे सुख दुःखादिकी व्यवस्था बन सकती है । उत्तर—नहीं, अन्तःकरणके अचेतन (जड़) होनेके कारण । इसीको स्पष्ट करते हैं—अन्तःकरण सुख-दुःखका अनुभव नहीं करता, अचेतन होनेके कारण । (अतः अनुभवके अभावमें अन्तःकरणका भेद प्रयोजक नहीं, किन्तु सुख-दुःखका अनुभव-करने वाला चेतनका भेद ही प्रयोजक है) आत्मा तो अनुभविता है । वह सभी शरीरोंमें एक ही है । तब अनुभवको कौन रोक सकता है । अतः यह मत भी अत्यन्त सुन्दर नहीं ।

(इस प्रकार आत्मपरिणामवादका श्रीचन्द्रप्रभा नामक हिन्दी रूपान्तर समाप्त हुआ)

(अब सांख्य मतसे पूर्व पक्ष करते हैं 'आत्मभेद' इत्यादिसे) सांख्याचार्य कपिल मुनि प्रभृति मानते हैं कि जीवोंका भेद§ और यह सारा जगत प्रकृतिका परिणाम है । यह सांख्य दो प्रकारका है निरीश्वर और सेश्वरके भेदसे । निरीश्वर सांख्यवादियोंका कहना है कि प्रकृति

॥ अर्थात् स्वरूपका ही परिणाम होता है, विरूपका नहीं, अतः इसके परिहार में किसी प्रमाणकी आवश्यकता नहीं ।

§ संघातपरार्थत्वात् त्रिगुणादि विपर्यादधिष्ठनात् । पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च ॥
जननमरणकरणानां प्रतिनियमादयुगपत् प्रवृत्तेश्च । पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्याच्चैव ॥
(सां० का० क्रमशः १७-१८)

शब्दाभिधेया महदादिविशेषपर्यन्तेन प्रपञ्चरूपेण चेतनानामुपभोगाय परिणमतीति। सेश्वरवादिनोऽप्येवमाहुः। इयांस्तु विशेषः—पुरुषशब्दाभिधेयमीश्वरं क्लेशकर्मविपाकाशयैरपरामृष्टमाश्रित्य प्रकृतिर्जगत् सृजतीति। यथा हि संस्कृतं क्षेत्रमधिष्ठाय तत्सम्पर्कवशाद्बीजमङ्कुरादिक्रमेण महान्तं वृक्षमारभते तथा सर्वव्यापिनमीश्वरमधिष्ठाय सर्वव्यापिनी प्रकृतिस्तत्सम्पर्कवशान्महदहङ्कारतन्मात्रादिक्रमेण परिणमन्ती विशेषान्तं प्रपञ्चमारभत इति। इतिहासपुराणेष्वपि प्रायेणैतदेव मतम्। सेयं प्रकृत्युपादाना सृष्टिः, ईश्वरस्तु निमित्तमात्रम्, क्षेत्रज्ञास्तु भोक्तारः, प्रकृतिरेव तु सर्वकार्याणां कर्त्रीति भोग्या। सा च सर्वत्रैका, भोक्तॄणां च भेदाद् बद्धमुक्तव्यवस्थोपपत्तिः। तथा च 'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः जनयन्तीं सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोन्यः'॥ (श्वेताश्वतर) इति व्यक्तमेव भोग्यायाः प्रकृते रजस्सत्त्वतमोरूपाया

अचेतन है।§ सत्व-रज-तम रूप त्रिगुणात्मिका है। वह प्रधान शब्दसे कही जाती है। महत् अहंकार आदि विशेष पर्यन्त प्रपंचके रूपमें जीवोंके उपभोगके लिए परिणत्त होती है। सेश्वर सांख्य भी ऐसा ही कहते हैं, किन्तु अन्तर यह है कि पुरुष विशेष शब्दसे जिसका अभिधान होता है वही ईश्वर है। वह अविद्या आदि पांच क्लेश, कर्म फल और कर्म वासनासे जो असंस्पृष्ट है वही ईश्वर है। इसीका आश्रय लेकर, प्रकृति इस जगतका निर्माण करती है। उक्त अर्थको दृष्टान्त द्वारा स्पष्ट करते हैं 'तथाहि' इत्यादिसे। संस्कृत (भली प्रकार जोतकर और खाद-पानी आदिसे तैयार किए हुए) खेतको पाकर, उसके सम्पर्कसे ही बीज अंकुरादि क्रमसे महान् वृक्षको आरम्भ (उत्पन्न) करता है, वैसे ही सर्व व्यापी ईश्वरका आश्रय लेकर, सर्व व्यापिनी प्रकृति उसके सम्पर्कसे महत्, अहंकार, तन्मात्रा आदि तत्त्व क्रमसे परिणत होती हुई, विशेषान्त प्रपंचका आविर्भाव करती है। (यहाँ आरम्भ या उत्पत्ति शब्दसे आविर्भाव तथा विनाश या प्रलय शब्दसे तिरोभाव समझना चाहिए) प्रायशः इतिहास तथा पुराणोंमें भी इसी मतका वर्णन है। अतः इस दृष्टिका उपादान कारण है प्रकृति। ईश्वर निमित्त मात्र है। क्षेत्रज्ञ तो भोक्ता है। प्रकृति ही सभी कार्योंको करनेवाली है, अतः वही भोग्या है। वह भी सर्वत्र एक ही है। किन्तु भोक्ताओंके भेदसे कोई बद्ध है, कोई मुक्त है, ऐसी व्यवस्था सिद्ध होती है। उक्त अर्थमें श्वेताश्वतरका मंत्र प्रमाण रूपमें देते हैं (मंत्र मूलमें देखिए) अजा शब्दका अर्थ है प्रकृति, वह एक है। उसके तीन गुण हो स्वरूप हैं। (सत्वरजस्तमसां साम्यावस्था प्रकृतिः) मंत्रमें लोहित शब्दसे रजो गुण, शुक्लसे सत्व गुण तथा कृष्णसे तमो गुण कहे गए हैं, अतः त्रिगुणात्मिका है। अनेक जीवोंको जो चैतन्यसे समान हैं उत्पन्न करती है। एक जीव प्रकृतिसे समर्पित भोगोंको भोगता है, दूसरा जिसके द्वारा भोग किया जा चुका है, ऐसा विरक्त पुरुष प्रकृतिका परित्याग कर देता है। वह सत्व-रजस्तमोरूप त्रिगुणात्मिका

---

§ मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्नविकृतिः पुरुषः॥
त्रिगुणमविवेकिविषयः सामान्यमचेतनं प्रसवधर्मि। व्यक्तं तथा प्रधानं, तद्विपरीतस्तथा च पुमान्॥
प्रकृतेर्महांस्ततोऽहंकारस्तस्माद् गणश्च षोडशकः। तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि॥
तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः। एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च॥
(सां० का० क्रमशः ३, ११, २२, ३८)

एकत्वम्, भोक्तॄणां च भेदाद्बद्धमुक्तव्यवस्थानं दर्शितम्।

ऐकात्म्यवादास्तर्ह्यौपनिषदाः कथम्? अवैलक्षण्येनेति ब्रूमः। भेदशब्दो हि वैलक्षण्यवचनो लोके प्रसिद्धः। तथा हि—सुसदृशेषु वक्तारो भवन्ति—'नाऽस्याऽस्य च कश्चिद् भेदोस्ति' इति। तथात्मनामपि नरपशुतिर्यग्भेदभिन्नशरीरवर्तिनां शरीरसम्बन्धमपोह्य केवलं नैजरूपेण निरूप्यमाणानां पद्मरजःपरमाणुद्वयवन्न किंचिदपि वैलक्षण्यमस्तीत्यनेनाभिप्रायेणैकत्ववादा नानात्वनिषेधवादाश्च। एतदभिप्रायमेव चैतदपि भगवद्वासुदेववचनम्—

'विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः'॥ इति (गीता)

तथैव 'इन्द्रो मायाभिः पुररूप ईयते' इति स्वयमविलक्षणोप्यात्मा नरपश्वादिविचित्रशरीरसम्पर्कवशाद् भ्रान्त्या स्वयमपि विलक्षणरूपः प्रतीयत इत्यर्थः। ये च मुक्तानां क्षेत्रज्ञानामीश्वरेण सहैकत्ववादास्तेप्यत्यन्तसाम्याद् वैलक्षण्याऽभावाच्च। तथा च श्रुत्यन्तरम्—'यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्।
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति'॥

इतीश्वरसादृश्यापत्तिमेव मुक्तस्य दर्शयति। तथा भगवता वासुदेवेनाप्युक्तम्—

है और एक है। मोक्ता आत्माओंके भेदसे यह बद्ध है, यह मुक्त है, इस व्यवस्थाको भी दर्शाया है।

शंका—यदि आत्माओंका भेद मानते हैं, तो उपनिषदोंमें जो कहा गया है कि 'एक ही आत्मा है' ये एकात्मवाद कैसे उपपन्न होंगे? उत्तर—विलक्षणता न होनेसे। भेद शब्द विलक्षणता का वाचक है, यह लोकमें प्रसिद्ध है। इसीको दृष्टान्त द्वारा स्पष्ट करते हैं 'तथाहि' से। वक्ता लोग अत्यन्त सदृश पदार्थोंके विषयमें कहा करते हैं, कि इनका उनसे कोई भेद नहीं है। इसी प्रकार आत्माओंका भी जो मानव-पशु तिर्यक् आदि भेदसे भिन्न शरीरोंमें रहते हैं, उनके शरीर सम्बन्धको छोड़कर, केवल स्वरूपसे निरूपण करनेपर, कमल रजके दो परमाणुओंके समान कुछ भी विलक्षणता नहीं है। उसी आश्रयको लेकर, एकत्ववाद प्रवृत्त हुए हैं तथा नात्व निषेधवाद भी उपपन्न होते हैं। इसी आशयका भगवान वासुदेवका भी वचन है (श्लोक मूलमें देखिए) अर्थ=विद्या तथा विनयसे सम्पन्न ब्राह्मण, परम पवित्र गौ, हाथी, कुत्ता तथा चाण्डाल, इनको पण्डित लोग समान रूपसे देखते हैं।

इसी प्रकार 'इन्द्र=आत्मा, स्वयं विलक्षण न होने पर भी मायाओं से अर्थात् नर-पशु आदि विचित्र शरीरोंके सम्पर्कसे भ्रान्तिसे स्वयं विलक्षण प्रतीत होता है' यह मंत्रका अर्थ है। जो मुक्त अत्माओंकी ईश्वरके साथ एकताके प्रतिपादक वाक्य हैं, वे भी अत्यन्त साम्य होनेसे और विलक्षणताके न होनेसे उपपन्न होते हैं। इसमें दूसरी श्रुतिका प्रमाण देते हैं। मंत्रका अर्थ=जिस अवस्थामें साधक, स्वर्णके समान स्वयं प्रकाश आत्मा और कर्ता ईश्वर=ब्रह्मयोनि पुरुषको देखता है, उसी कालमें विद्वान् साधक, पुण्य-पापको छोड़कर, निरंजन=निष्कलमष होकर, परम साम्यको प्राप्त करता है। यह मंत्र मुक्त पुरुषकी ईश्वर सादृश्य प्राप्तिको बताता है।

और भगवान वासुदेवने भी कहा है 'इस ज्ञानको लेकर जो मेरे साधर्म्य को प्राप्त करते हैं, वे पुनः सृष्टिमें उत्पन्न नहीं होते और प्रलयकालमें नष्ट भी नहीं होते'। यह गीताका वचन है 'मेरा

'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेपि नोपजायन्ते प्रलये न व्यथन्ति च' ।। इति । (गीता)

यत्तु 'ममैवांशो जीवलोके जीव भूतः सनातनः' इति भगवद्वचनं तत् स्वामिभृत्यभावपरम्--यथा खल्वमात्या राज्ञोंशा व्यपदिश्यन्ते तथा जीवोऽपीश्वरांश इत्युच्यते, अन्यथा जीवत्वनाशात् सनातनत्वानुपपत्तिः । यान्यपि--

'विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति' ।।

इत्यादीनि पुराणवचनानि तेषामयमेवार्थः--वैलक्षण्यमात्मनो ब्रह्मणश्चाऽत्यन्तमविद्यमानमेवाऽज्ञाननिमित्तमज्ञाने विनष्टे स्वयमेव विलीयते, इति । विस्पष्टं हि परापरपुरुषयोर्भेदो गीतादिषूपदर्शितः--'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः' ।

'उपद्रष्टाऽनुमन्ता च कर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेस्मिन् पुरुषः परः' ।। इति । (गीता)

अलमतिदूरं गत्वा । तस्मात् प्रकृत्युपादानेयं प्रपञ्चसृष्टिरिति, नाऽनुपादानोपालम्भः ।

ही अंश जीव लोकमें जीव होकर, सनातन रहता है । 'मम' यहां षष्ठी है । इसका अर्थ है स्वस्वामिभाव सम्बन्ध । (अर्थात् जीव-ईश्वरका सेव्य-सेवक-भाव सम्बन्ध है, इसीको स्पष्ट करते हैं 'यथा खलु' से) जैसे मंत्री वर्ग राजाके अंश कहलाते हैं, वैसे जीव भी ईश्वरके अंश कहे जाते हैं । (विपरीतमें अनिष्टापत्ति बताते हैं 'अन्यथा' से) नहीं तो जीवत्वका नाश होनेसे सनातनत्वकी अनुपपत्ति होगी (इसी प्रकार विष्णु पुराणके वचन को भी समझना चाहिए । पर इतने से सन्तुष्ट न होकर ग्रन्थकार स्वयं उसकी व्यख्या करते हैं) श्लोकका अर्थ=भेदके स्थापक अज्ञानका❀ सर्वथा नाश होनेपर, जीव और परमात्माके अविद्यमान भेदको कौन कर सकता है । इत्यादि पुराण वचनोंका भी यही अर्थ है । आत्माकी विलक्षणता आत्मा और ब्रह्मकी अन्यता है, वह सर्वथा नहीं है । उसका निमित्त है अज्ञान । उसके नष्ट होनेपर वह स्वयं विलीन हो जाता है ।

गीता आदिमें स्पष्टतया जीवात्मा-परमात्माका भेद दर्शाया गया है । अर्थ यथा=उत्तम पुरुष=पुरुषोत्तम दूसरा है, जो परमात्मा कहा जाता है । वही उपद्रष्टा है । वही अनुमन्ता है । वही कर्ता भोक्ता और महेश्वर है । वही परमात्मा भी कहलाता है । इस शरीरमें होने वाला पुरुष दूसरा है । इस विषयमें अधिक दूर नहीं जाना चाहिए । अतः प्रपंच सृष्टिका प्रकृति ही उपादान कारण है । इसके पूर्वमें जो कहा गया सृष्टिके आदिमें सबका अभाव होनेसे, किस उपादान कारणसे यह जगद्रूप कार्य उत्पन्न होगा ऐसी अनुपादान कारणको निन्दाका होना सम्भव नहीं ।

❀ इसपर शंका है कि अज्ञान तथा जीवेश्वरका भेद ये सब अनादि हैं । इनमें—
'जीव ईशो विशुद्धाचित्तथा जीवेशयोर्भिदा । अविद्या तच्चि तो र्योगः षडस्माकमनादयः' ।। इत्यादि पद्य प्रमाण हैं । अनादिकी तो उत्पत्ति होतो नहीं । अत एव 'यतो वा इमानि भूतानि जायन्ते' इस श्रुतिका व्याख्यान लघुचन्द्रिकामें, अनादिसे भूत=कार्य उत्पन्न होते हैं, ऐसा किया है । तब अज्ञान भेदको उत्पन्न कैसे करेगा ? इसका उत्तर है कि अज्ञान भेद स्थितिका प्रयोजक है, उत्पादक नहीं, अतः कोई दोष नहीं ।

सांख्यमतस्य निराकरणम्

अत्राभिधीयते--कथं खल्वेकरूपा प्रकृतिर्नरपशुतिर्यग्भेदभिन्नं प्रपञ्चमारभते ? न ह्यविलक्षणं कारणं विलक्षणं कार्यं निर्मातुमर्हति। क्षेत्रज्ञगतधर्माधर्मसहायवैचित्र्याद् वैचित्र्यमिति चेत् ? न, अन्तःकरणवृत्तित्वाद्धर्माधर्मयोः, अन्तःकरणस्य च कार्यवर्गान्तःपातित्वात् सर्वस्य महदादेः कार्यस्य प्राकृतप्रतिसञ्चरे[1] प्रकृतौ विलीनत्वाद् धर्मोऽधर्मोवपि तस्यामवस्थायामविद्यमानावेवेति न तद्बलेन वैचित्र्यम्।

महदादिविकारारम्भे चास्याः किं कारणम्? स्वरूपमेवेति चेत्? सर्वदारम्भप्रसङ्गः। ततः प्रलयानुपपत्तिः। ईश्वरेच्छया विक्रियत इति चेत्? न, ईश्वरस्य समस्तक्लेशरहितस्याऽपास्तसमस्तकामस्येच्छाऽसम्भवात्। इच्छायाश्चाप्यन्तःकरणधर्मत्वात् तस्मिन् काले तदसम्भवात्।

किञ्च प्राकृते प्रलये प्रकृतिमात्रमात्मनश्च केवलमवतिष्ठन्ते, सर्वे चात्मानो निर्विशेषाः सर्वेषां चैतन्यमात्ररूपत्वात्, न च धर्माधर्मकृतमपि वैलक्षण्यमात्मनां सम्भवति, तयोरात्मधर्मत्वाभावात्। अन्तःकरणवृत्तित्वात्, तस्य च तदानीमभावात्, इत्युक्तम्। एवं च[2] धर्माधर्मरहितेषु निर्विशेषेषु पुरुषेष्वस्थितेषु सर्गकाले प्रकृतिः शरीरारम्भेणात्मनो बध्नाति चेत्? ये पूर्वसृष्टौ मुक्ता ये चामुक्ताः तान् सर्वान् बध्नीयादविशेषात्। तथा येऽश्वमेधमनुष्ठाय फलमभुक्त्वा पूर्वसृष्टौ स्थिताः, ये च ब्रह्महत्याकारिणः, तेषां सर्वेषामैकविध्यमेव स्यात्[3] पूर्वकृतयोर्धर्माऽधर्मयोर्नष्टत्वात्।

अब सिद्धान्त कहते हैं कि एक रूपा प्रकृति कैसे मनुष्य, पशु, पक्षी आदि भेदसे भिन्न प्रपंचको आरम्भ करेगी! अविलक्षण कारणसे विलक्षण कार्य उत्पन्न नहीं हो सकता। शंका—आत्मगत धर्म-अधर्मरूप सहायककी विचित्रतासे विचित्र प्रपंच हो सकता है। तब क्या दोष है? उत्तर—यह ठीक नहीं, क्योंकि धर्माधर्म अन्तः करणमें रहते हैं। अन्तःकरण कार्य-वर्गके अन्तर्गत है। सभी महदादि-कार्योंका प्रकृतिमें लय होता है, इस पक्षमें प्राकृत पदार्थोंका प्रकृतिमें लय होने पर उस अवस्थामें धर्माधर्म भी नहीं रहते। अतः उनकी विचित्रतासे प्रपंचका वैचित्र्य नहीं बन सकता।

शंका—यह बताइए कि महदादि कार्यके आरम्भमें प्रकृतिका कौनसा कारण है? उत्तर—स्वरूप ही कारण है, ऐसा नहीं कह सकते। उसके सर्वदा रहनेसे सृष्टि होती रहेगी। प्रलयकी अनुपपत्ति होगी। शंका—ईश्वरेच्छासे प्रपंचरूप कार्य होता है, ऐसा माना जाए? उत्तर—नहीं, ईश्वर समस्त क्लेशोंसे रहित है। उसकी सब कामनाएं पूर्ण हो चुकी हैं। अर्थात् आप्तकाम है। उसकी इच्छाका होना असम्भव है। और इच्छाके भी अन्तःकरणका धर्म होनेसे, प्रलय कालमें वह होगी कैसे?

और प्राकृतलयमें प्रकृति तथा आत्मा ही रहते हैं। सभी आत्मा निर्विशेष हैं, क्योंकि सबका चैतन्य मात्र रूप है। शंका—आत्माओंमें स्वतः कोई विशेषता न होनेपर भी धर्मा-धर्म द्वारा विलक्षणता हो सकती है। उत्तर—नहीं, धर्मा-धर्म आत्माके धर्म नहीं, वे तो अन्तःकरणकी वृत्तियां हैं। प्रलयमें अन्तःकरण नहीं रहता, यह पूर्वमें कह चुके हैं। शंका—धर्मा-धर्मसे शून्य निर्विशेष आत्माके होनेसे, सृष्टि कालमें प्रकृति शरीरारम्भके द्वारा आत्माको बन्धनमें डालती है? उत्तर—नहीं, जो पूर्व सृष्टिमें मुक्त हो चुके हैं और जो मुक्त नहीं हैं उन सभीको शरीरारम्भके द्वारा प्रकृति बन्धनमें

१. प्रकृतौ सर्वेषां प्रलयः इत्यस्मिन् पक्षे। २. लब्धावसरः शंकते। ३. साम्यमित्यर्थः।

अत्र सांख्याः स्वसिद्धान्तावष्टम्भेन शङ्कते

ननु नाशो नाम नात्यन्ताभावः किन्तुकारणे कार्याणां तिरोभावमात्रं विनाशः। उत्पत्तिरपि विद्यमानानामेव कारणे कार्याणामाविर्भावमात्रं नह्यत्यन्ताऽसतामुत्पत्तिः सम्भवति, शशविषाणस्याप्युत्पत्तिप्रसङ्गात्। असदुत्पत्तौ च सर्वत्र सर्वं स्यात्, नियमो न स्यात्--तन्तुभ्यः पटो मृदो घट इति। यथाहुः--

'असदकरणादुपादानग्रहणात्सर्वसंभवाभावात् ।

शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्'॥ इति॥ (सां० का० ७) तथा— 'नाऽसतो विद्यते भावो नाऽभावो विद्यते सतः।' इति भगवद्वासुदेववचनम्। तस्मात् प्रलये धर्मादेः शक्त्यात्मनावस्थितत्वात् तद्वशेन युक्तं सृष्टिवैचित्र्यम्।

डाल देगी, विशेषता न होनेके कारण। ऐसे ही जो अश्वमेधका अनुष्ठान कर, फल-भोगके बिना पूर्व सृष्टिमें रहते हैं, और जो ब्रह्महत्या किए हुए हैं, उन सबका एक ही प्रकार होगा। क्योंकि पूर्वकृत धर्मा-धर्म तो नष्ट हो गए हैं।

(अब सांख्य अपने सिद्धान्तके बलसे शंका करते हैं कि) नाश मेरे मतमें अत्यन्ताभाव नहीं है, किन्तु कारणमें कार्योंका तिरोभाव मात्र ही विनाश कहलाता है। और उत्पत्ति भी कारणमें विद्यमान कार्योंका आविर्भाव मात्र है। क्योंकि अत्यन्त असत्की उत्पत्ति नहीं होती। अन्यथा शशविषाणकी उत्पत्तिका प्रसंग होने लगेगा। अविद्यमान कार्य उत्पन्न होता है, ऐसे असदुत्पति पक्षमें सभीमें सब होने लगेंगे। जैसे तन्तुसे पट होता है। मिट्टीसे घट होता है, ऐसा कोई नियम नहीं रह जाएगा। उक्त अर्थका ईश्वर कृष्णकी कारिकासे समर्थन करते हैं*। अर्थ = असत्का कारण

---

* यहां 'कार्यसत् है' यह प्रतिज्ञा है। इसमें ५ हेतु देते हैं। 'न्यायकणिका' में इनको अवीतपंचकके नामसे कहा है। 'तदिदं सत्कार्यसाधनमवीतपञ्चकमाचख्युः साङ्ख्याः'।

(विधिविवेक, पृ० ३०)

पहिला हेतु 'असदकरणात्' है। कारण व्यापारके पूर्व कार्य यदि असत् है, तो कोई उसे सत् नहीं कर सकता। अतः कारण व्यापारके बाद भी उसके पूर्वमें भी कार्य सत् ही था। दूसरा हेतु है 'उपादान ग्रहणात्' यहां उपादान शब्दसे कारण विवक्षित है। उसका ग्रहण = कार्यके साथ कारणका सम्बन्ध। अर्थात् कारणके साथ कार्यका सम्बन्ध होनेसे कार्य सत् है। तीसरा हेतु है 'सर्वसम्भवाभावात्'। सबसे सबकी उत्पत्ति नहीं हो सकती। अर्थात् असम्बद्धको कार्य माननेपर सभी कार्य सभीसे उत्पन्न होने लगेंगे। इसलिये सम्बद्धसे ही सम्बद्ध कार्य होता है। चौथा हेतु 'शक्तस्य शक्यकरणात्' है। शक्ति कारणाश्रित है, अतः शक्त ही शक्यको उत्पन्न कर सकता है। यह कार्यसे सम्बद्ध है। असम्बद्ध होनेसे अव्यवस्था होगी। अतः सत् कार्य है। पांचवा हेतु है 'कारणभावाच्च' कार्य कारणात्मक होता है। यदि कार्य कारणसे भिन्न है, तो कारण सत् है। कार्य तो असत् है, दोनोंका सम्बन्ध कैसे होगा? क्योंकि जहां दोनों सत् हैं, वहां उन्हींका सम्बन्ध होता है। एक सत् हो, दूसरा असत् हो उनका सम्बन्ध नहीं होता। जहां दोनों असत् हैं उनका भी सम्बन्ध नहीं होता। अतः कार्य सत् है। इसका विशेष विवरण 'सांख्यतत्त्वकौमुदी' की कारिका ७ में देखिए।

तन्निरासः

नैतदेवम्—नहि मृत्पिण्डावस्थायां वा कपालवस्थायां वा घटरूपमस्ति दृश्यादर्शनविरोधात्।

यत्तु—'नाऽसतो विद्यते भावः' इति वचनम्, तदात्माभिप्रायम्।

पूर्वत्र हि— 'न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।
न चैव न भविष्यामः सर्वे वयमतः परम्'॥

इत्याऽऽत्मनित्यत्वं प्रतिपादयितुमपक्रान्तमेवानेनोच्यते—ना विद्यमानस्यात्मन उत्पत्तिः, न विद्यमानस्य विनाशः, सर्वे एवात्मानोऽनुत्पत्तिविनाशधर्माणो नित्या इति। न पुनः कार्यजातस्य सर्वस्य नित्यत्वाभिप्रायम्, असर्वगतत्वादनुपलब्धिविरोधाच्चेत्युक्तम्।

यदि परम्—उपादानोपादेययोरभेदमाश्रित्य, मृदात्मनाऽऽदौ घटोऽवस्थि इत्युच्यते। न च तावता कार्यसिद्धिः—न हि मृदवस्थेन घटेनोदकाहरणं क्रियते। तथा धर्माधर्मावपि स्वरूपेणाविद्यमानौ प्रकृत्यात्मना स्थितावपि न स्वकार्याय पर्याप्ताविति, न तद्वशेन वैचित्र्यसम्भवः। प्रमाणमपि महदादिक्रमेण प्रकृतिपरिणामे किं चिन्नास्ति—पुरुषवचसां प्रमाणान्तराऽगोचरार्थे प्रमाणत्वासम्भवात्, वेदानामपि पौरुषेयत्वात्, इतरपुरुषवचनवदप्रामाण्यात्।

नहीं होता। उपादान ग्रहण भी नहीं बन सकता। सबसे सबका होना सम्भव नहीं। सशक्त कारण ही शक्य कार्यको कर सकता है। कार्य-कारणभावसे भी कार्य सत् है। और भगवान वासुदेवका भी वचन है कि 'असत्का भाव नहीं होता, सत्का अभाव भी नहीं होता'। (अर्थात् असत्की उत्पत्ति नहीं होती, सत्का विनाश नहीं होता) अतः प्रलय कालमें धर्मादिके सूक्ष्मरूपसे रहनेके कारण, उनके अनुसार सृष्टिकी विचित्रता उपपन्न होती है।

(इस उपर्युक्त अर्थका निराकरण करते हैं। 'नैतदेवं' इत्यादिसे) उत्तर—ऐसा नहीं कह सकते, क्योंकि मृत्पिण्डावस्थामें या कपालावस्थामें घटका आकार नहीं रहता। यदि रहता तो दिखाई देता' अतः दृश्यादर्शनका विरोध है। और यह जो कहागया है 'असत्का सदभाव नहीं होता' इत्यादि गीता वचन है, वह आत्माके अभिप्रायसे कहा गया है। क्योंकि पूर्वमें 'हे अर्जुन ! मैं पहिले कभी नहीं था, ऐसी बात नहीं। तुम भी पहिले नहीं थे, यह भी नहीं। जो हमारे सामने राजा खड़े हैं, ये भी नहीं थे, यह बात नहीं। हम सब आगे नहीं रहेंगे, यह भी नहीं'। इस प्रकार ये गीता वचन आत्म नित्यत्वका प्रतिपादन करनेके लिए आरम्भ किये गये हैं, यही इससे ध्वनित होता है। अविद्यमान आत्माकी उत्पत्ति नहीं होती। विद्यमानका नाश नहीं होता, अतः सभी आत्मा उत्पत्ति विनाश धर्म रहित हैं। इसलिए वे नित्य हैं। इसका यह अर्थ नहीं कि सभी कार्य नित्य हैं। क्योंकि कार्य तो अनित्य होते हैं, अतः वे सर्वगत नहीं हो सकते। और अनुपलब्धिसे भी विरोध है अर्थात् मृदादि कारणमें घटादि कार्यका दिखलाई न देना, यही अनुपलब्धि विरोध है) यह पूर्वमें कह चुके हैं।

शंका—यदि कहा जाए उपादान कारण तथा कार्यका अभेद मानकर मृद्रूपसे पहिले घट था ऐसा कहा जाए ? उत्तर—नहीं कह सकते। इससे कार्यकी सिद्धि नहीं होती। अन्यथा मिट्टीमें स्थित घटसे जलाहरण क्यों नहीं करलेते ? इसी प्रकार धर्म-अधर्म दोनों अपने रूपसे नहीं रहते,

यदि तु[1] सृष्टिप्रलयपरम्परामनादिमङ्गीकृत्य प्रतिसृष्टि ऋतुलिङ्गन्यायेन—

'सर्वेषां चैव नामानि कर्माणि च पृथक् पृथक्।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे'॥ (मनु० १।२१)

इत्यादिवचनै तुल्यनामप्रभावव्यवहारवस्तूत्पत्त्या[2] शब्दानामऽनाद्यर्थसम्बन्धानां वेदानां च नित्यत्वमाश्रित्य प्रामाण्यमङ्गीक्रियते, तथाप्येकस्य प्रजापतेः संप्रदायप्रवर्तकत्वे कृतकाशङ्का स्यादेव।

अथ पुनः[3] 'अष्टाशीतिसहस्राणि संप्रदायप्रवर्तकाः' इयादिवचनानुरोधेन बहूनां महर्षिणां सृष्ट्यन्तराधीतं वेदं स्मरतां सुप्तप्रतिबुद्धन्यायेन संप्रदायप्रवर्तकत्वमाश्रित्य कृतकाशङ्कां निरस्य नित्यता समर्थ्येत, तथाप्यनुपादानं जगन्निर्माणमशक्यमभ्यु-

किन्तु प्रकृति रूपसे रहते हैं। ऐसा कहनेपर भी वे अपने कार्यके लिए पर्याप्त नहीं होते। अतः धर्मा-धर्मके द्वारा विचित्र कार्यका होना सम्भव नहीं। और सुनिए—प्रकृति महदादि क्रमसे परिणत होती है, इसमें कोई प्रमाण नहीं। क्योंकि पौरूषेय वाक्य प्रमाणान्तरका विषय न होने वाले अर्थमें प्रमाण नहीं होते। वेद भी पौरूषेय होनेसे दूसरे पुरुष वाक्योंकी तरह प्रमाण नहीं होगा।

शंका—वेद नित्य हैं, शब्दार्थ सम्बन्ध भी नित्य है, अतः वे प्रमाण हैं, इत्यादि मानकर यदि समाधान किया जाए तो, उनका प्रामाण्य उपपन्न हो सकता है। क्यों कि सृष्टि प्रलय परम्परा अनादि है। जैसे ऋतुके आरम्भमें जो पूर्व ऋतुमें चिन्ह थे, तत्सदृश ही आनेवाली ऋतुमें प्रकट होते हैं। 'अतः सृष्टि कर्ता प्रजापतिने प्रत्येक सृष्टिके आदिमें 'ऋतुर्लिंग न्याय' से सभीके नाम तथा कर्मकी, वैदिक शब्दोंको लेकर ही पृथक् पृथक् मर्यादा बनाई है'। इत्यादि वचनोंसे समान नाम, समान प्रभाव तथा समान व्यवहार (व्यापार) रूप वस्तुओंकी उत्पत्ति हो सकती है। (अतः अनित्यता दोषका प्रसंग नहीं)

उत्तर—ऐसा होनेपर भी प्रजापतिने सबको बनाते हुए पूर्वसृष्टिके वेदोंको पढ़ाया, नया नहीं बनाया, इसमें कोई प्रमाण नहीं। क्योंकि एक व्यक्तिको सम्प्रदायका प्रवर्तक माननेपर कृतका-शंका=वेदके पौरुषेय होनेकी शंका बनी ही रहेगी*।

शंका—'अठाईस हजार सम्प्रदाय प्रवर्तक महर्षि हुए हैं। उन्होंने पूर्व सृष्टिके वेदका स्मरण करके, सम्प्रदायका प्रवर्तन किया' इत्यादि वचनोंके अनुसार अनेक ऋषियोंके पूर्वसृष्टिमें अधीत वेदका स्मरण करके, 'सोया हुआ व्यक्ति जैसे जागता है' इस न्यायसे, उन ऋषियोंकी सम्प्रदाय प्रवर्तकताको मानकर, कृतकाशंकाके निराकरणके द्वारा नित्यताका समर्थन किया जा सकता है,

* अर्थात् सम्प्रदायका प्रवर्तक कोई एक ही व्यक्ति नहीं होता। जैसा कि वार्तिक कारने कहा है—
'एकस्य प्रतिभानन्तु कृतकान्न विशिष्यते'। 'अतश्च सम्प्रदाये च नैकः पुरुष इष्यते'॥
(श्लोक वा० चोदना, सूत्र, का० १५०) इसलिए सम्प्रदायमें एक पुरुष प्रधान रूपसे नहीं माना जाता।

१. यदि तु वेदानां नित्यत्वमाश्रित्य प्रामाण्यमङ्गी क्रियते, इति व्यवहृतेन सम्बन्धः।

२. तुल्येति 'क' पुस्तके नास्ति। ३. अथ पुनरेवं कृतकाशंकां व्युदस्य नित्यता समर्थ्येति व्यवहृतेन सम्बन्धः। तथापि यत्पूर्वंदूषणं सर्वाभावेहि नोपादानेन सर्वमिदमुपादेयमिति तन्न शक्यं परिहर्तुमि-त्यर्थः। यस्मात् प्रकृत्यादीनामुपादानत्वं निरस्तम्, अतिरिक्तस्य चासम्भव इति भावः।

पगन्तुम् । प्रकृत्यादीनां ह्युपादानत्वं निरस्तम् । औपनिषदास्तु सृष्टिप्रलयवादाः पौराणिकाश्चाऽर्थवादतया नेतव्या। भवतु[1] चैवम्, तथापि नास्माकं काचित् क्षतिः, सम्बन्धनित्यत्व वेदप्रामाण्ययोरविघातात् ॥ इति सांख्यमत निरासः ॥

यदि ऐसा कहें, तो भी ठीक नहीं । क्योंकि बिना उपादान कारणके जगतका निर्माण नहीं माना जा सकता । प्रकृति आदिकी उपादान कारणताका पहिले निराकरण किया जा चुका है । उपनिषदोंमें सृष्टि तथा प्रलयका प्रतिपादन है । पुराणोंमें भी उसे अर्थवादके रूपमें ग्रहण करना चाहिए । (अब सृष्टि-प्रलयको मानकर, अपने पक्षको सिद्ध करते हैं 'भवतु चैवं' से) सृष्टि तथा प्रलय होवें॰ । ऐसा माननेपर भी मीमांसकोंके मतमें कोई क्षति नहीं । क्योंकि मीमांसकाभिमत सम्बन्ध नित्यत्व तथा वेद प्रामाण्यका कोई विघातक नहीं§ ।

॥ इस प्रकार सांख्य मतका निरास किया गया ॥

(इस प्रकार सांख्य मत निरासका श्रीचन्द्रप्रभा नामक हिन्दी रूपान्तर समाप्त हुआ)

॰ क्योंकि वार्तिककारने कहा है—श्रुति, स्मृति, इतिहास आदिके प्रामाण्य होनेसे सृष्टि-प्रलय भी माने जाते हैं—'मन्त्रार्थवादेतिहासप्रामाण्यात् सर्गप्रलयावप्येष्येते' इति । (तं० वा०, पृ० १२६)

§ मीमांसक जगतको आदि सद्रूप मानते हैं 'न कदाचिदनीदृशं जगत' । अर्थात् यह जगत आज जिस रूपमें उपलब्ध होता है, इसके विपरीत न कभी था, न कभी होगा । अतः इनके मतमें सृष्टि-प्रलय नहीं होते ।

यहाँ प्रश्न है कि मन्त्र, अर्थवाद आदिमें सृष्टि तथा प्रलयका वर्णन है, वह कैसे संगत होगा ? जैसे 'धाता यथापूर्वमकल्पयत्, 'दिवञ्च पृथिवींचान्तरिक्षं अथोसुवः' यह अघमर्षण मन्त्र है । इसका अर्थ है विधाताने पूर्व कल्पमें जैसे थे वैसे ही द्युलोक, पृथिवी अन्तरिक्ष, स्वर्गलोक, सूर्य-चन्द्रमा आदिकी सृष्टि की । बादमें प्रजापतिने चाहा मैं प्रजाका सृजन करूँ, उसने प्रजाका सृजन किया' । 'प्रजापतिरकामयत प्रजा सृजेयेति, स प्रजा असृजत्' इति । ये सब कैसे संगत होंगे ?

इसका उत्तर है कि ये मन्त्र और अर्थवाद खण्ड-सृष्टि और खण्ड प्रलयका प्रतिपादन करते हैं, महासृष्टि तथा महाप्रलयका नहीं कहते, (उस समय सभी का उच्छेद हो जाता है, कोई वस्तु शेष नहीं बचती, इस विषयमें कोई प्रमाण नहीं । जैसे वार्तिकमें कहा गया है—

प्रलयेऽपि प्रमाणं न सर्वोच्छेदात्मके नहि ।
तस्मादद्यवदेवात्र सर्गप्रलयकल्पना ॥ (श्लोकवा० सम्ब०, का० ११३)

मत्स्यपुराणमें भी अवान्तर सृष्टिका निरूपण किया है । अतः ग्रन्थकारने 'तिर्यगधिकरण'में संसारको अनादि माना है । 'अनादौ संसारे' इत्यादि । अतः मीमांसक मतमें प्रपंच सत्य तथा अनादि है । शब्दार्थ सम्बन्ध नित्य है । वेदाध्ययन परम्परा भी अनादि है, अतः कोई अनुपपत्ति नहीं ।

इस प्रकरणमें शब्दार्थका सम्बन्ध कर्ता ईश्वर है, इसका विशेष रूपसे निराकरण किया

१. अभ्युपेत्यापि सृष्टिप्रलयौ स्वपक्षसिद्धिमाह भवत्विति । उक्तं च वार्तिके—
'श्रुतिस्मृतीतिहासप्रामाण्यात्सर्गप्रलयाविष्येते' । इति ।

वैशेषिकमतेन पूर्वपक्षः

वैशेषिकास्तु—पौरुषेयत्वमेव सव्दार्थसम्बन्धानां वेदानां चङ्गीकुर्वन्तोऽनुमानेन सृष्टिप्रलयावीश्वरं च सिषाधयिषन्तः प्रयोगमारचयन्ति, त्रिविधं हि वस्तुजातम्—संप्रतिपन्नचेतनकर्तृकं घटादि, संप्रतिपन्नाऽतत्कर्तृकं व्योमादि, विप्रतिपन्नतत्कर्तृकं महीधरदूर्वाङ्कुरादि[1]। तत्रान्तिममधिकृत्योच्यते—'क्षित्यादिकं बुद्धिमत्कर्तृकं कार्यत्वाद् घटादिवत्' कार्यत्वं च क्षित्यादेः सावयवत्वाद् घटादिवत्।

किं पुनः पृथिव्यादेः समवायिकारणम्? पार्थिवाप्यतैजसवायवीयपरमाणुजातं यथास्वं पृथिव्यप्तेजोवायूनां समवायिकारणम्। न हि प्रलये परमाणूनां प्रलयोऽस्माकमस्ति सांख्यादिवत्। कार्यद्रव्याणि तु द्व्यणुकादीनि सर्वाण्येवेश्वरेच्छया विश्लिष्टावयवानि प्रलीयन्ते, परमाणवस्तु मिथोऽसंयुक्तास्तिष्ठन्ति व्योमादयश्च। क्षेत्रज्ञाश्चात्मीयधर्माधर्मयुक्ता एवाऽवतिष्ठन्ते। सर्गकाले पुनरीश्वरेच्छां क्षेत्रज्ञाऽदृष्टं च निमित्तमासाद्य परमाणुषु कर्माण्युत्पद्यन्ते, तद्वशाच्च मिथस्संयुक्ताश्चतुष्टयेपि परमाणवो द्व्यणुकादिक्रमेण यथास्वं पृथिव्यादिकं भूतचतुष्टयमारभन्ते। निमित्तभूतक्षेत्रज्ञाऽदृष्टवैचित्र्याच्च जरायुजाऽण्डजोद्भिज्जस्वेदजभिन्नं शरीरभेदमीश्वरेच्छाकारितसंयोगविशेषवशात् परमाणव आरभन्ते।

(अब वैशेषिक मतसे सृष्टि-प्रलयमें दोष दिखानेके लिए कहते हैं 'वैशेषिकास्तु' इत्यादि 'आरभन्ते' इत्यन्त ग्रन्थ तक) वैशेषिक लोग शब्दार्थका सम्बन्ध तथा वेदको पौरुषेय मानकर, अनुमानके द्वारा, सृष्टि, प्रलय एवं ईश्वरको सिद्ध करनेके लिए अनुमान करते हैं। वस्तुएं तीन प्रकारकी होती हैं। जैसे घटादि। इनका कर्ता चेतन कुम्भकार है, यह सर्वविदित है। अतः यह सम्प्रतिपन्न चेतन कर्तृक है। आकाशादि दूसरा है, उसके कर्ताका पता नहीं, अतः सम्प्रतिपन्न चेतन अकर्तृक है। तीसरा पृथ्वी, पर्वत, दुर्वा अंकुरादिक हैं, इनके कर्ताके विषयमें विप्रतिपत्ति है। इनमें अन्तिमको लेकर कहा—जाता है—क्षित्यादि बुद्धिमत्कर्तृक है, कार्य होनेसे, घटादिकी तरह—'क्षित्यादिकं बुद्धिमत्कर्तृकम्, कार्यत्वात्, घटादिवत्' अतः क्षित्यादि कार्य हैं, सावयव होनेसे, घटादिकी तरह।

शंका—पृथिव्यादिका समवायिकारण कौन है?

उत्तर—१—पार्थिव परमाणु, २—आप्य (जलीय) परमाणु, ३—तैजस परमाणु, ४—वायवीय परमाणु। ये चारों क्रमशः पृथिवी, अप, तेज, वायु इन चारोंके समवायि कारण हैं। प्रलय कालमें हमारे (वैशेषिक) मतमें परमाणुओंका लय नहीं होता, जैसे सांख्य मतमें प्रधानका लय नहीं होता। सभी कार्य-द्रव्य द्व्यणुकादि ईश्वरकी इच्छाके अनुसार अवयवोंसे विभक्त होकर, अपने कारणमें लीन होते हैं। परमाणु तो परस्पर असंयुक्त ही रहते हैं। आकाश, काल, दिक् मन और क्षेत्रज्ञ, अपने-अपने धर्माधर्मसे संयुक्त होकर रहते हैं। सृष्टिके आरम्भमें ईश्वरेच्छा और क्षेत्रज्ञोंके अदृष्ट रूप निमित्तको पाकर, परमाणुओंमें क्रिया उत्पन्न होती है। उसके अनुसार चारों परमाणु

गया है। उसका अनुमान सिद्ध, तार्किक-सम्मत ईश्वरके निराकरणमें तात्पर्य है, वैदिक ईश्वरके निराकरणमें नहीं, वह तो मीमांसकोंको अभिमत हो है। इसका विशेष विवरण वेदापौरुषेयत्वाधिकरणमें देखना चाहिए।

---

१. महीति 'ग' पुस्तके नास्ति।

वैशेषिकमतखण्डनम्

नन्वेतदपि युक्तम्—नहीच्छामात्रेण प्रयत्नमन्तरेण परमाणुषु स्पन्दोत्पत्तिः सम्भवति, इच्छाकारितप्रयत्नवशेन शरीरस्पन्दोत्पत्तिरद्यत्वेपि दृश्यते । ईश्वरोपि प्रयतत इति चेत् ? न, अशरीरस्य प्रयत्नासम्भवात् । सर्वगता अपि ह्यात्मानः शरीरप्रदेश एव प्रयत्नमारभन्ते, न बहिः । अतः शरीरापेक्षः प्रयत्नः । प्रलयकाले च सर्वकार्याणां प्रलयात्, ईश्वरशरीरमपि प्रलीनमिति कथमशरीरः प्रयतेत् ? न चाऽशरीरस्येच्छापि सम्भवति मुक्तात्मनामिव । नापि ज्ञानं सम्भवति—इन्द्रियादेरभावात् ।

नित्यमस्य ज्ञानं नित्या चेच्छा नित्यश्च प्रयत्न इति चेत् ? न, सर्वज्ञानेच्छाप्रयत्नानामनित्यत्वव्याप्तेः । शक्यते हि प्रयोक्तुम्—क्षित्यादिकं नाऽशरीरिचेतनकर्तृकम्, न नित्यप्रयत्ननित्येच्छानित्यज्ञानकर्तृकम्, कार्यत्वाद् घटवदिति ।

आपसमें मिलकर, द्वयणुक-त्रसरेणु-आदि क्रमसे अपने-अपने पृथिव्यादि चारों भूतोंको आरम्भ करते हैं। और क्षेत्रज्ञोंके अदृष्ट रूप निमित्तकी विचित्रतासे १—जरायुज, २—अण्डज, ३—उद्भिज, ४—स्वेदज, इनसे भिन्न शरीर भेदको, ईश्वरेच्छासे उत्पन्न संयोग विशेषके अनुसार परमाणु ही आरम्भ करते हैं* ।

उत्तर—यह भी ठीक नहीं, इच्छा मात्रसे, प्रयत्नके बिना, परमाणुओंमें क्रिया (स्पन्दन) की उत्पत्ति नहीं हो सकती । इच्छासे जन्य प्रयत्नके द्वारा ही शरीरमें क्रियाकी उत्पत्ति आज-कल भी देखी जाती है । शंका—ईश्वर इच्छा मात्रसे ही जगतको उत्पन्न करता है, प्रयत्नकी क्या आवश्यकता है । उत्तर—ईश्वर भी प्रयत्न करता है यह नहीं कह सकते । बिना शरीरके प्रयत्नका होना सम्भव नहीं । सभी आत्मा सर्वगत हैं, तो भी शरीर देशमें ही प्रयत्न आरम्भ करते हैं बाहर नहीं, अतः प्रयत्न शरीरकी अपेक्षा रखता है । प्रलय कालमें सभी कार्योंका लय होनेसे, ईश्वरका शरीर भी प्रलीन हो जाता है । अतः वह बिना शरीरके कैसे प्रयत्न करेगा ? बिना शरीरके इच्छाका होना भी सम्भव नहीं । जैसे मुक्त आत्माओंकी इच्छा उत्पन्न नहीं होती । इसी प्रकार ज्ञानका होना भी सम्भव नहीं, इन्द्रियोंके न रहनेके कारण ।

शंका—यदि माना जाय ईश्वरका ज्ञान नित्य है, इच्छा नित्य है, प्रयत्न भी नित्य है (अतः ईश्वरके शरीरके बिना भी कार्य उत्पन्न हो सकते हैं)

उत्तर—ऐसा नहीं कह सकते, क्योंकि सभी ज्ञान, इच्छा, प्रयत्न आदि अनित्य होते हैं। बिना शरीरके ज्ञानादि नहीं हो सकते । इसमें प्रयोग सुनिए—ऐसा अनुमानकर सकते हैं—'क्षित्यादि अशरीरि चेतन कर्तृक नहीं है, कार्य होनेसे, घटकी तरह—'क्षित्यादिकं नाशरीरिचेतनकर्तृकम्, कार्यत्वात्, घटवत्' यह पहिला, अनुमान है । दूसरा अनुमान सुनिए—'क्षित्यादिकं न नित्यप्रयत्न नित्येच्छानित्यज्ञानकर्तृकम्, कार्यत्वात्, घटवत्' इति । (अतः बिना शरीरके ज्ञानादिका होना सम्भव नहीं)

---

* अतः जगतके प्रति परमाणु समवायि कारण हैं । ईश्वर निमित्त कारण हैं, वे ही सृष्टिके आदिमें शब्दार्थका सम्बन्ध करते हैं । वेदका भी निर्माण करते हैं । अतः वैशेषिकोंके मतसे सृष्टि, प्रलय तथा लोक यात्रा आदि सम्पन्न होते हैं । यह उनके मतका संक्षेप है ।

ननु घटस्यापीश्वरकर्तृकत्वमस्त्येवेति साध्यहीनो दृष्टान्तः? तथापि कुलालस्यापि कर्तृत्वान्न केवलेश्वरकर्तृकत्वं घटस्य। ततश्चैवं प्रयोक्तव्यम्—क्षित्यादिकं न केवलाशरीर्यात्मकर्तृकं कार्यत्वाद् घटवदिति, वस्तुत्वाद् व्योमवदिति हेतुदृष्टान्तौ सर्वथापि निर्दोषौ। तथा क्षित्यादिकं न बुद्धिमत्कर्तृकम्, शरीरिकर्तृकत्वविरहाद् व्योमवदिति साक्षादेव प्रतिसाधनं कर्तव्यम्।

ईश्वरस्य नित्यशरीरमङ्गीकृत्याशंका

अथेश्वरशरीरं नित्यमङ्गीकृत्य प्रलयेपि सशरीरमेवेश्वरमभ्युपगच्छेत्? ततः सावयवत्वमीश्वरशरीरेऽनैकान्तिकं न क्षित्यादेः कार्यत्वं साधयेत्, सशरीरकर्तृकत्वं च दूर्वाङ्कुरादीनामनुपपन्नम्, अनुपलब्धिविरोधात्।

किञ्च प्रतिकार्यं प्रयत्नभेदेन भवितव्यम्, अन्यो हि पादसञ्चरणे प्रयत्नः, अन्यश्च बाहूद्धरणे, तथा सति यद्यपीश्वरे प्रयत्नो नित्यः स्यात्, तथापि तस्यैकत्वान्न विचित्रकार्योदयहेतुत्वं सम्भवतीति, व्यर्थ एवासौ। यदि त्वनन्तकार्यानुरूपा अनन्ता एव प्रयत्नाः

शंका—उक्त अनुमानमें दृष्टान्त घटमें ईश्वर कर्तृकत्व तो है ही, अतः साध्यविकल दृष्टान्त है। उत्तर—दृष्टान्त घटमें कुलालके भी कर्ता होनेसे, केवल ईश्वर कर्तृकत्व नहीं है, अतः अनुमानका यह स्वरूप होना चाहिए—'क्षित्यादिकं न केवलाशरीर्यात्मकर्तृकम्, कार्यत्वात्, घटवत्'। और दूसरा वस्तुत्व हेतु है, आकाश दृष्टान्त है। उपर्युक्त अनुमानोमें हेतु और दृष्टान्त दोनों सर्वथा दोष रहित हैं। (यदि चाहें तो उक्त अनुमानका सत्प्रतिपक्ष कह सकते हैं, वह इस प्रकार है) क्षित्यादि बुद्धिमत्कर्तृक नहीं हैं, शरीरिकर्तृकत्वके न होनेसे, आकाशकी तरह—'क्षित्यादिकं न बुद्धिमत्कर्तृकम्, शरीरिकर्तृकत्वविरहात्, आकाशवत्। यह साक्षात् ही सत्प्रतिपक्ष देना चाहिए।

शंका—यदि ईश्वर शरीरको नित्य मानकर, प्रलयकालमें भी ईश्वरको सशरीर ही मानें, तो क्या दोष है? उत्तर—सावयत्व ईश्वर शरीरमें अनैकान्तिक है, वह पृथिव्यादिको कार्य सिद्ध नहीं कर सकेगा और सशरीर कर्तृकत्व दुर्वा, अंकुर आदिमें अनुपपन्न है। अनुपलब्धिके विरोध से*।

और भी बात है कि प्रत्येक कार्यके लिये भिन्न-भिन्न प्रयत्न होने चाहिएं। जैसे पैरके चलानेमें दूसरा प्रयत्न है, हाथके उठानेमें दूसरा। ऐसा होनेपर यद्यपि ईश्वरका प्रयत्न नित्य हो सकता है तथापि उसके एक होनेसे विचित्र कार्योत्पत्तिमें वह हेतु नहीं बन सकता। अतः नित्य प्रयत्न मानना

---

* इस प्रकार क्षित्यादिकोंको कार्य सिद्ध करनेमें जो सावयवत्व हेतु दिया है, वह ईश्वर शरीरमें व्यभिचारी है। अतः साध्यको सिद्ध नहींकर सकता। शंका—ईश्वरका शरीर किस वस्तुसे बनेगा? सृष्टिके आदिमें पृथिव्यादि तो है ही नहीं। भोगका आयतन ही शरीर कहलाता है। शरीरका लक्षण तो घटेगा नहीं। तब शरीर कैसे कहलाएगा? और हितैषी ईश्वर दुःखप्रायः जगतकी सृष्टि भी नहीं कर सकता। बिना साधनके सृष्टि कर्तृत्व भी उपपन्न नहीं होता। धर्माधर्म जीवात्माके साधन हैं, यह कह नहीं सकते, क्योंकि सृष्टिके पहिले वे नहीं थे। केवल धर्माधर्म मात्रसे सृष्टि भी तो नहीं हो सकती। लोकमें मिट्टी घटादिके, तन्तु पटादिके उपादान कारण होते हैं। और सृष्टिके प्रति यदि ईश्वरको अनुकम्पा ही कारण है, तो ईश्वरको संहार करनेकी इच्छा नहीं होगी। अतः सृष्टिकी तरह बुद्धिपूर्वककारी ईश्वरके द्वारा संहार भी नहीं हो सकता, क्योंकि संहारका कोई प्रयोजन नहीं दीखता।

सर्वदैवेश्वरेऽवतिष्ठेरन् , तथा सति प्रलयकारिणीभूतस्य परमाणुविश्लेषकस्य प्रयत्नस्य सर्गकालेप्यवस्थानात्, संयोजकस्य च सर्गहेतोः प्रलयकालेप्यवस्थानात् , उभयोः परस्पर-विघातान्न सृष्टिः स्यात् न प्रलयः ।

यच्च क्षेत्रज्ञादृष्टवैचित्र्यात् कार्यवैचित्र्योपपत्तिरिति, तदप्ययुक्तम्—नहि दृष्टकारण-वैलक्षण्यमन्तरेणाऽदृष्टवैलक्षण्यमात्रात् कार्यवैलक्षण्यं सिध्यति । न ह्यदृष्टशतेनापि ताल-बीजमन्तरेण तालवृक्षो निष्पद्यते । विनापि बीजमीश्वरमहिम्ना सर्वं सिध्यतीति चेत् ? न, तत्रैव प्रमाणाभावात् । नित्यत्वे हि वेदानामवसिते तत्प्रामाण्यबलेनेश्वरस्याऽपरिच्छेद्यो महिमा, सृष्टिप्रलयौ च ऋतुलिङ्गन्यायमाश्रित्य सिध्येयुर्न वा वेदांस्त्वनादृत्य दृष्टानुसारेण पर्वते इवानुमानमत्यन्तालौकिकेर्थे प्रवर्तयतामुपेक्षैवोत्तरमित्युपरम्यते । तस्मान्न सर्गादिकालेपि सम्बन्धकरणम् ।

व्यर्थ है । शंका—अनन्त कार्योंके अनुरूप, अनन्त प्रयत्न माने जाएं । वे ईश्वरमें सर्वदा रहेंगे । तब उपपत्ति हो सकती है । उत्तर—नहीं, ऐसा माननेपर, प्रलयका कारण जो परमाणुओंको विभक्त करता है, प्रयत्न विशेष, वह सृष्टि कालमें भी रहता है और प्रमाणुओंका संयोजक प्रयत्न जो सर्गका कारण है, उसके प्रलय कालमें भी रहनेके कारण, दोनोके परस्पर विघात (सुन्दोपसुन्द न्याय) से न सृष्टि होगी, न प्रलय होगा ।

शंका—और जो क्षेत्रज्ञोंके अदृष्ट भिन्न-भिन्न होते हैं, उनके वैचित्र्यसे कार्यका वैचित्र्य होता है, यह कहा था ? उत्तर—यह ठीक नहीं, क्योंकि दृष्ट कारणकी विलक्षताके बिना, अदृष्टकी विलक्षणता मात्रसे, कार्यकी विलक्षणता नहीं सिद्ध होती । (इसीका व्यतिरेक दृष्टान्त द्वारा उपपादन करते हैं) 'नहीति' से । सैकड़ों अदृष्टोंसे ताड़ बीजके बिना, ताल-वृक्ष उत्पन्न नहीं होता । शंका—यदि माना जाय बिना बीजके भी ईश्वरकी शक्तिसे सभी सिद्ध होता है ऐसा कहा जाय ? उत्तर—नहीं, ऐसा होनेमें कोई प्रमाण नहीं । वेदोंका नित्यत्व निश्चित होनेपर, उनके प्रामाण्यके बलसे, ईश्वरकी महिमा अपरिच्छेद्य है, यह सिद्ध होगा । ऋतुलिग न्यायको लेकर, सृष्टि तथा प्रलय सिद्ध होंगे अथवा नहीं । जो वेदोंका अनादर कर, दृष्टके अनुसार पर्वतमें वह्नि-अनुमानकी तरह अत्यन्त अलौकिक अर्थमें प्रवृत्त होते हैं, वे यथेच्छाचारी हैं । ऐसे वैशेषिकोंकी उपेक्षा करना ही उनका उत्तर है । अतः यहीं विराम लेते हैं । इसलिए सर्गके आदि कालमें भी सम्बन्धका निर्माण नहीं हो सकता॰ ।

॰ सम्बन्ध सकर्तृक है, शब्दार्थ सम्बन्ध होनेसे, 'वृद्धिरादैच' इत्यादि सम्बन्ध की तरह, यह अनुमान हो सकता है ? उत्तर—नहीं, जो सकर्तृक होता है, वह स्मृतिके विषय कर्तृकत्वका प्रयोजक होता है, इसलिए आपका हेतु अप्रयोजक है । यानी सम्बन्ध कर्ताको सिद्ध नहीं कर सकता । यदि कहा जाए अगृहीत सम्बन्ध शब्दसे अर्थ प्रतीति नहीं होती, अतः अर्थापत्ति प्रमाणसे सम्बन्ध कर्ताकी कल्पना होती है ? उत्तर—यह भी नहीं कह सकते, अनादि वृद्ध-व्यवहारसे सम्बन्धका ग्रहण होता है, इसलिए कोई अनुपपत्ति नही । इसी अभिप्रायसे ग्रन्थकारने उक्त विचारका निगमन किया है 'तस्मात्' इत्यादिसे ।

शब्दार्थसम्बन्धस्य नित्यत्वस्थापनम् (सम्बन्धाक्षेपपरिहारः)

अशक्यं च कर्तुं सर्वशब्दानां सम्बन्धकरणम्--यदा न कश्चिदपि शब्दः केनाप्यर्थेन सम्बद्ध आसीत्, तदा कथं सम्बन्धः क्रियेत् ? सम्बन्धं हि कुर्वताऽवश्यं केनचिद्वाक्येन स कर्तव्यः—गौः सास्नादिमानित्यादिना। न चाऽप्रसिद्धमर्थप्रतिपादकत्वेन[1] सास्नादिशब्दमर्थप्रतिपादनाय शक्नोति कर्त्तोच्चारयितुम्, तथा हस्तसञ्ज्ञादयोपि प्रतिपादकत्वासिद्धेः।

नन्वेवमप्रसिद्धसम्बन्धस्य कथनमप्यनुपपन्नम्—यद्यपि हि तदा वक्तुः प्रसिद्धसम्बन्धत्वात् सम्बन्धकथनाय वाक्योच्चारणं संभवति, तथापि श्रोतारोऽप्रसिद्धसमस्तपदार्था बालाः कथं वाक्येन सबन्धं प्रतिपद्येरन्? तस्मात् करणवत् कथनमप्यनुपपन्नम्। नैष दोषः—कथयितुस्तावन्न कर्तुरिवाऽशक्तिः—उपायसम्भवात्, प्रतिपत्तारस्तूपायाभावान्न प्रतिपद्यन्त इति दृष्टविरुद्धम्। दृश्यन्ते ह्यप्रसिद्धसमस्तशब्दार्था[2] बाला वृद्धेभ्यः सबन्धं प्रतिपद्यमानाः।

किं चास्त्युपायो बालानाम्—नाऽवश्यं सम्बन्धकथनवाक्येनैव वृद्धेभ्यो बालाः सम्बन्धं प्रतिपद्यन्ते, किन्तु यदा वृद्धाः प्रसिद्धसम्बन्धाः स्वकार्यार्थेन व्यवहरन्ति, तदा तेषामुपशृण्वन्तो बालाः सम्बन्धं प्रतिपद्यन्ते। यदा हि केनचित् 'गामानय' इत्युक्तः कश्चित्

अब सिद्धान्ती कहते हैं कि सभी शब्दोंका सम्बन्ध करना भी अशक्य है, क्योंकि जब कोई शब्द किसी अर्थसे सम्बद्ध नहीं था, तब सम्बन्ध कैसे किया जाएगा ? सम्बन्ध करनेवाले पुरुषको अवश्य ही किसी वाक्यसे ही करना होगा। जैसे 'गौ सास्नादि मती है'। 'घट कम्बुग्रीवादि मान् है'। इत्यादि अर्थप्रतिपादकतारूपसे अप्रसिद्ध सास्नादि शब्दको अर्थ प्रतिपादनके लिए कर्ता उच्चारण नहींकर सकता। प्रतिपादकताके असिद्ध होनेसे। इसी प्रकार हाथका संकेत आदि भी नहींकर सकता।

शंका—ऐसा होनेपर जिस शब्दका सम्बन्ध अप्रसिद्ध है, उसका कथन भी तो अनुपपन्न है। यद्यपि उस समय वक्ता सम्बन्धको जानकर, उसे कहनेके लिए वाक्योच्चारण करता है, फिर भी सुनने वाले बालक, जिन्होंने अप्रसिद्ध समस्त पदार्थोंको नहीं समझा है, वे वाक्यसे सम्बन्धको कैसे समझ सकेंगे ? अर्थात् नहीं समझ सकते। अतः सम्बन्ध करणकी तरह कथन भी अनुपपन्न है। उत्तर—उपर्युक्त दोष नहीं हैं। जैसे करनेवालेकी अशक्ति है, वैसे कहनेवालेकी अशक्ति नहीं; उपायके सम्भव होनेसे। समझनेवाले तो उपायाभावके कारण नहीं समझते हैं। यह प्रत्यक्ष विरुद्ध है। क्योंकि यह देखा जाता है कि जो बालक समस्त शब्दोंको नहीं समझते हैं, वे वृद्धोंसे सम्बन्धको समझने हुए देखे जाते हैं। सम्बन्ध कथनसे अन्य शक्तिग्रहरूप उपाय भी बालकोंके लिए हों, पर वे सम्बन्ध बतानेवाले वाक्यसे ही वृद्धोंके द्वारा सम्बन्धज्ञान करें, ऐसा नहीं।

किन्तु जब वृद्ध लोग (व्युत्पन्न पुरुष) सम्बन्धको जाननेवाले अपने प्रयोजनके लिए व्यवहार करते हैं, तो उसे सुनकर बालक भी सम्बन्धको समझ लेते हैं। जब किसीने 'गामानय' इस वाक्यका उच्चारण किया। दूसरा उसे सुनकर सास्नादिमान् गौको ले आता है। तब समीपस्थ

१. अर्थप्रतिपादकत्वेनाप्रसिद्धं सास्नादिशब्दमिति सम्बन्धः। २. पदार्था इति 'क' पुस्तके पाठः।

सास्नादिमन्तमानयति, तदा समीपस्थो बालोऽगवच्छति यस्मादयमेतद्वाक्यश्रवणान्तरमस्मिन्नर्थे प्रवर्तते, तस्मादस्माद्वाक्यादयमर्थः प्रत्यायित इत्येवं संमुग्धरूपेणावगतं प्रत्यायकत्वं[1] पश्चाद्बहुषु प्रयोगेष्वन्वयव्यतिरेकाभ्यां वाक्यभागानां पदानां पदभागानां च प्रकृतिप्रत्ययानां वाक्यार्थभागेषु पदार्थेषु विविच्यते, तस्मान्न पौरुषेयः सम्बन्ध इति, न तद्वशेन पुरुषापेक्षास्तीति सिद्धमनपेक्षं वेदानां प्रामाण्यम् ॥ इति सम्बन्धाक्षेपपरिहारः ॥

अथ चित्राक्षेपपरिहारः

यच्चानन्तरफलानुपलब्ध्या चित्रादीनां न पश्वादिफलत्वमिति। स्यादेवम्, यदि प्रत्यक्षादिपञ्चकमेव प्रमाणं स्यात्? तदा ह्यनन्तरफलोपलम्भादेव तत्साधनत्वं स्यात्,

बालक समझता है कि वह इस वाक्यको सुननेके पश्चात् इस अर्थमें प्रवृत हुआ है। अतः इस वाक्यसे यह अर्थ उसे अवगत करा दिया है। इस प्रकार संमुग्धरूपसे जानी हुई प्रत्यायकताका, बादमें अनेक प्रयोगोमें अन्वय-व्यतिरेकके द्वारा वाक्यके अंश पद, पदोंके अंश प्रकृति-प्रत्यय आदिका, वाक्यार्थके अंश पदार्थोंमें विवेक कर लेता है। (अर्थात् व्युत्पित्सु बालक पदोंका पदार्थोंमें सम्बन्धरूप शक्तिग्रह है, ऐसा निश्चयकर लेता है) अतः सम्बन्ध पौरुषेय नहीं हो सकता※। इस प्रकार सम्बन्धके द्वारा पुरुषकी अपेक्षा नहीं। इसलिए वेदोंका प्रामाण्य निरपेक्ष सिद्ध होता है।

(इस प्रकार सम्बन्धाक्षेपपरिहारका श्रीचन्द्रप्रभा नामक हिन्दी रूपान्तर समाप्त हुआ)

यह जो कहा गया है कर्मानुष्ठानके अनन्तर फलके न मिलनेसे चित्रादिका§ पशु आदि फल नहीं होता, यह तब हो सकता है, यदि प्रत्यक्ष आदि पाँच ही प्रमाण होते। इस स्थितिमें अनन्तर फलकी प्राप्तिसे ही चित्रादि याग फलके साधन हो सकते हैं, अन्यथा नहीं। शब्द भी यथार्थ ज्ञानका

※ इस प्रकार सिद्धान्तीने सम्बन्ध नित्यत्वको सिद्धकर, अपने पक्षको स्थिर किया। उक्त अर्थको सूत्रकारने 'उपदेश' शब्दसे सूचित किया है। इससे वृद्ध व्यवहार प्रत्यक्ष है, इस बातका बोधन कराया गया है। क्योंकि व्यवहार करनेवाले प्रत्यक्ष हैं। सम्बन्धकर्ता तो अनुमेय हैं। प्रत्यक्ष विरोधी अनुमान नहीं हो सकता। एक पुरुष सभी देशोंमें जाकर सम्बन्ध नहींकर सकता। अनेक सम्बन्धकर्ता सभी देशोमें जाकर, सम्बन्ध करेंगे, यह भी सम्भव नहीं। सम्बन्धके बिना कोई काल भी निश्चित नहीं होता। अतः सभी देश, सभी कालोमें सम्बन्धका अव्यतिरेक होनेसे कर्ताकी कल्पना अनुपपन्न है।

और सुनिए—प्रमाणान्तरसे अज्ञातार्थमें नाम करण भी असम्भव है। विशेष ज्ञानके लिए ही तो नाम रखे जाते हैं, विशेषताको न जाननेसे नाम रखने व्यर्थ हैं। अतः शब्दार्थका सम्बन्ध अपौरुषेय है, यही सिद्ध होता है।

§ भाष्यकारने चित्राक्षेपका वर्णन किया है। फलके दिखाई न देनेसे कर्मकालमें शब्द फलोत्पत्तिमें निमित्त नहीं होता। कालान्तरमें कर्मका अभाव है, ऐसा आक्षेपकर, उसका परिहार किया है।

यहां यह शंका है कि चित्राक्षेप तथा उसका परिहार असौत्र हैं। अर्थात् सूत्रसे ज्ञात नहीं होते। उत्तर है, नहीं, क्योंकि 'अर्थेऽनुपलब्धे तत् प्रमाणम्' इतने अंशको प्रकृतमें लगा सकते हैं। अतएव सूत्रकार जैमिनिके आशयको जाननेवाले भाष्यकारने इसका परिहार किया है। और विद्वानोंका कथन है, कि जो भाष्य और वार्तिकमें है, वह सब सूत्रोंमें है, क्योंकि सभी अर्थोंके उत्पत्ति स्थान सूत्र ही हैं—'सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ यच्च वार्तिके' इति।

१. अत्र प्रत्यायकत्वं विविच्यत इत्यनुषङ्गः।

नाऽन्यथा। शब्दस्यापि तु प्रमितिजनकतया प्रत्यक्षादिवत् प्रमाणत्वात्, तेन च चित्रादीनां पशुसाधनत्वाऽवगमादसत्यप्यनन्तरोपलम्भे सिध्यति तत्साधनत्वम्।

ननु प्रमाणान्तरविरोधादप्रामाण्यमित्युक्तम्। न, तदभावात्। नहि शब्द 'अनन्तरमेव चित्रा फलसाधनम्' इति ब्रूते, येन विरोधः स्यात्। साधनत्वमेव प्रतिपन्नं तन्मात्रवचनात्, तस्य चापूर्वद्वारेण कालान्तरेपि तैलपानादिवत् फलसाधनत्वोपपत्तेः

यत्तु प्रागनुष्ठानाच्छास्त्रार्थावधारणवेलायां नाऽपूर्वमन्तर्भावितमित्युक्तम्, यद्यप्येवम्, तथापि पश्चादेवमवगच्छति—साधनत्वमात्रेपि शब्देनोक्ते भ्रान्त्या मया साक्षात्साधनत्वमेव प्रतिपन्नम्, तच्चेदानीमन्यथा जातम्, अतो नूनमस्य केनापि द्वारेण कालान्तरे फलमिति।

प्रागपि च शक्यमेवाऽपूर्वमवगन्तुम्—अनेकेषामङ्गप्रधानकर्मणां क्षणिकानामपूर्वमन्तरेण यौगपद्याऽसम्भवात्, पश्वादीनां च दृष्टकारणापेक्षत्वान्न क्षणमात्रेणोत्पत्तिः संभवतीत्यवश्यंभाव्यपूर्वम्। न च पश्वाद्युत्पत्तिमत्रं फलम्, उपभोगस्य तु चिरकालत्वाद् यावदुपभोगमवस्थास्यमानेन केन चिद्भवितव्यम्, न च क्रियायास्तावत्कालमव-

---

जनक होनेसे प्रत्यक्षादिकी तरह प्रमाण है। अतः इस शब्द प्रकरणसे चित्रादिकी पशुसाधनताके ज्ञानसे, अनन्तर फलोपलब्धिके न होनेपर भी, चित्रादिकी फल साधनता सिद्ध होती है।

शंका—प्रमाणान्तर (प्रत्यक्ष) से विरोध होनेके कारण शब्द अप्रमाण है, यह कहा गया है। उत्तर—नहीं, प्रत्यक्षसे विरोध नहीं, विषय भेद होनेके कारण। इसीको स्पष्ट करते हैं 'नहि' त्यादिसे। शब्द = 'चित्रया यजेत पशुकामः' यह वाक्य, अनन्तर ही चित्रा याग पशुफलका साधन है, यह नहीं बताता, जिससे विरोध हो सके। इतना कहनेसे साधनत्व मात्र ही ज्ञात हुआ। उस यागकी अपूर्व द्वारा कालान्तरमें भी फल साधनता उपपन्न होती है। इसमें दृष्टान्त है तैल पान। जैसे तैलपान कालान्तरमें बल पुष्टि आदिका वर्धक होता है, वैसा प्रकृतमें भी समझ लेना चाहिए।

शंका—यह जो कहा गया है—अनुष्ठानके पूर्व शास्त्रार्थका निर्णय करते समय अपूर्वका शास्त्रार्थमें अन्तर्भाव नहीं किया ? अपूर्वको लेकर समाधान करते हैं, कि यह कथन संगत नहीं। उत्तर—यद्यपि शास्त्रार्थ निर्णय कालमें अपूर्वको नहीं लिया है। तथापि बादमें पुरुष ऐसा समझता है, कि शब्दने तो साधन मात्रको बताया है, मैंने भ्रान्तिसे साक्षात् साधन समझ लिया है। वह अब अन्यथा होगया है। अतः इसका कोई दूसरा द्वार (अवान्तर व्यापार) होना चाहिए। उसीसे कालान्तरमें फल होता है। (उक्त अर्थको ही स्पष्ट करनेके लिए कहते हैं कि) अनुष्ठानके पूर्व भी अपूर्वको समझ सकते हैं, क्योंकि अनेक अंग है तथा प्रधान कर्म हैं, ये सब क्षणिक होते हैं। इनका स्वरूपसे एक कालमें होना सम्भव नहीं। अतः अपूर्वके द्वारा सहभाव मानना होगा। अपूर्वके विना सहभावका होना सम्भव नहीं। पश्वादि फल भी दृष्ट कारणकी अपेक्षा रखते हैं। उनकी क्षण मात्रसे उत्पत्ति नहीं हो सकती। अतः अपूर्वका होना आवश्यक है। पश्वादिकी उत्पत्ति मात्र ही फल नहीं; किन्तु उन्हें भोगना फल है। इस उपभोगके चिरस्थाई होनेसे जबतक यह रहता है, तबतक स्थिर रहनेवाली कोई वस्तु होनी चाहिए।

स्थानं संभवतीत्यपूर्वमङ्गीकर्तव्यमिति तद्द्वारेण युक्तं कर्म कालान्तरे फलदमिति नाऽनन्तरानुपलब्ध्या शास्त्रस्य बाधः ॥ इति चित्राक्षेपपरिहारः ॥

आत्मवादारम्भः
कहता है कि 'मेरा कोई नहीं है, सब कुछ मैं ही हूँ। इसका दूसरा सम्बन्धि कोई नहीं, यहां इतना ही अर्थ विवक्षित है। उक्त अर्थका उपसंहार करते हैं इस प्रकार मुक्ति अवस्थामें आत्माका आत्मा ही सब कुछ है, अतः दूसरे सम्बन्धिका अभाव मात्र ही विवक्षित है। प्रपंच स्वरूपका अभाव नहीं। इसलिए प्रपंच विलय मोक्ष है। यह पक्ष ठीक नहीं। 'किन्तु' इत्यादिसे अपना पक्ष बताते हैं प्रपंच सम्बन्ध ही बन्ध है, प्रपंच सम्बन्धका विलय ही मोक्ष है।

प्रपंच जीवको तीन प्रकारसे बांधता है—भोगायतन-शरीर है। (अर्थात् शरीरावच्छेदेन ही आत्मामें सुख-दुःख आदिका उपभोग होता है) भोग साधन इन्द्रियां चक्षु आदिक हैं। भोग्य शब्दादि विषय हैं। भोगसे सुख-दुःख-विषय अपरोक्ष अनुभव कहा जाता है। उक्त इन तीन प्रकारके बन्धनोंका आत्यन्तिक विलय ही मोक्ष है।

शंका—प्रपंच विलयमें आत्यन्तिक विशेषण दिया गया है, यह क्या वस्तु है? उत्तर—पूर्वमें उत्पन्न शरीर, इन्द्रिय, विषय इन तीनों का विनाश तथा अनुत्पन्न शरीर, इन्द्रिय, विषयोंका आत्यन्तिक अनुत्पाद (सर्वथा उत्पन्न न होना) यही आत्यन्तिकता है। शंका—शरीर, इन्द्रिय, विषयोंकी अत्यन्त = सर्वथा अनुत्पत्ति कैसे? उत्तर—शरीरादिके उत्पादक धर्माधर्मका निःशेष = सर्वथा क्षीण होनेसे। यही प्रपंचका सम्बन्ध ही बन्ध है और उस सम्बन्धका छूटना ही मोक्ष है॥।

॥ अर्थात् सुख-दुःखादि आत्माके विशेष गुणोंका उच्छेद ही मोक्ष है। सुख-दुःखका उच्छेद भी उसके कारण भूत धर्म-अधर्मके उच्छेदसे होता है। धर्म-अधर्म भी दो प्रकारका है—उत्पन्न और उत्पाद्य। अर्थात् एक उत्पन्न हो चुका है। एक अनागतमें होने वाला है। उनमें उत्पन्न धर्म और अधर्मका उपभोगसे ही उच्छेद होता है। नित्य-नैमित्तिक कर्मोंके अनुष्ठानसे तथा आत्मज्ञानसे उनका विरोध है। उत्पाद्य वे कहलाते हैं जो काम्य कर्मोंके अनुष्ठानसे होते हैं। बिना अनुष्ठान किए उनकी उत्पत्ति नहीं होती। और विहित कर्मोंको न करनेसे तथा निषिद्धका अनुष्ठान करनेसे जो अधर्म होता है, उसका विहित कर्मोंके अनुष्ठानसे तथा निषिद्ध कर्मोंके न करनेसे परिहार होता है। अर्थात् सभी धर्माधर्म नष्ट हो जाते हैं। शरीरारम्भके कारण न होनेसे, वर्तमान शरीरका नाश होनेपर आत्मा बिना शरीरका रह जाता है। इस प्रकार शरीरसे भिन्न आत्माको जो जानता है, उसका पूर्व कर्मोंके उपभोगसे क्षय होता है। वर्तमान शरीरका पात होने पर, अनागत कर्म नहीं हैं। शरीरादि सम्बन्ध भी नहीं है। यही मोक्ष है। श्लोकवार्तिकमें इसका इसप्रकार निरूपण किया गया है—

न च क्रियायाःकस्याश्चिदभावः फलमिष्यते। तत्र ज्ञातात्मतत्त्वानां भोगात्पूर्वं क्रियाक्षये॥
उत्तरप्रचयासत्त्वाद्देहो नोत्पद्यते पुनः। कर्मजन्योपभोगार्थं शरीरं नः प्रवर्तते॥

आनन्दमोक्षवादानुवादनिरासौ

नन्वेवमशेषधर्मक्षयान्मुक्तस्य न किं चित्सुखं स्यात्। ततश्चाऽपुरुषार्थो मोक्षः स्यात्। नैष दोषः—न हि धर्मजन्यो मुक्तस्यानन्दः, तथा सत्युत्पत्तिमत्वाद् विनाशी स्यात्, तत्राऽपुनरावृत्तिश्रुतेर्विरोधः स्यात्। स्वाभाविकस्त्वात्मानन्दः संसारेणाभिभूतः सन् निर्मुक्तसंसारस्याभिव्यक्तो भोग्यो भवति, स्वाभाविकत्वे चानन्दस्य। 'आनन्दं ब्रह्म' (बृ० उ०) इत्यादिश्रुतिसहस्रं प्रमाणम्।

ननु सुखाभावेपि श्रुतिरस्ति—'अशरीरं वा वसन्तं न प्रियाप्रिये स्पृशतः' इति? (छां० उ०। अ० ८)। सत्यम्, विषयसुखाभिप्रायं त्वेवंजातीयकम्, अन्यथाऽऽनन्दश्रुतिविरोधात्। अथ सुखाभाववचनबलेनानन्दवचनमेव दुःखाभावाभिप्रायं किमिति न व्याख्यायते? सुखाभाववचनानामत्यल्पत्वात्, तेषामेवान्यथाकरणं युक्तम्, न भूयसामानन्दवचनानाम्। किं चानन्दशब्दस्य दुःखाभावपरत्वेऽत्यन्तस्वार्थहानिः स्यात्, सुखशब्दस्य तु सामान्यवचनस्य विशेषेऽपिव्याख्याने[1] नातीव स्वार्थहानिरिति तदेव युक्तम्।

शंका—मोक्ष अवस्थामें सभी धर्माधर्मका क्षय होनेसे मुक्त पुरुषको कुछ भी सुख नहीं होगा। अतः मोक्ष पुरुषार्थ नहीं हो सकेगा। उत्तर—यह दोष नहीं है। क्योंकि मुक्त पुरुषका आनन्द धर्मसे जन्य नहीं। धर्मसे जन्य मानने पर आनन्द उत्पत्तिमान् होगा। अर्थात् कार्य हो जाएगा। जो कार्य होता है वह विनाशी होता है। मोक्षको तो सभी नित्य मानते हैं। और सुनिए मुक्त पुरुष पुनः नहीं लौटता—'न स पुनरावर्तते' इस श्रुतिका विरोध होगा। स्वाभाविक जो आत्मानन्द है, वह संसारसे अभिभूत होकर रहता है। वह आनन्द जो संसारसे मुक्त हो गए हैं, उनमें अभिव्यक्त होकर, उनका भोग्य होता है। मुक्तिमें आनन्द स्वाभाविक है। इनमें आनन्दको ब्रह्म जानो 'आनन्दं ब्रह्मेतिव्यजानात्' इत्यादि हजारों श्रुतियां प्रमाण हैं।

शंका—मोक्षावस्थामें सुख नहीं होता, इसमें भी श्रुति प्रमाण है। जिसका शरीर नहीं रहता उसे सुख-दुःख स्पर्श नहीं करते। उत्तर—ठीक है। उक्त श्रुति वैषयिक सुखके तात्पर्यसे कही गई है। नहीं तो आनन्द श्रुतिसे उसका विरोध होगा। शंका—सुखाभाव परक वचनोंके बलसे आनन्द वचन ही दुःखाभाव परक हैं, ऐसा व्याख्यान क्यों न किया जाए? उत्तर—दुःखाभाव परक वाक्य कम हैं। आनन्द परक वाक्य अधिक हैं। अतः भूयोऽनुग्रहन्यायसे* सुखाभाववचनोंको ही अन्य परक लगाना युक्त है। अधिक जो आनन्दपरक वाक्य हैं उनका अन्यथाकरण युक्त नहीं और आनन्द शब्दको दुःखाभावपरक माननेमें स्वार्थका त्याग करना पड़ेगा। यह ठीक नहीं। सुख शब्द तो सामान्य रूपसे नित्य सुख और विषय सुखमें रहता है। उसका विषय सुख अर्थ करनेपर स्वार्थ हानि नहीं होती। इसलिए वही युक्त है।

* भूयोऽनुग्रहन्याय—जहाँ अनेक धर्म हों और दूसरी ओर एक धर्म हो, उन दोनोंमें किसे अपनाया

तदभावेन कश्चिद्धि हेतुस्तत्रावतिष्ठते। मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः॥
नित्यनैमित्तिकेकुर्यात्प्रत्यवायजिहासया॥
(श्लोकवा० सम्बन्धाक्षेपपरिहार, का० १०७-११०)

१. विशेषव्याख्यानेऽपि इति 'ग' पुस्तके पाठः।

ननु विद्यमानोप्यानन्दोऽननुभूयमानोऽकिंचित्कर एव, नच मुक्तस्य सर्वकरण-हीनस्यानन्दानुभवः सम्भवति। स्वप्रकाशोयमानन्द इति चेत्? न, संसारावस्थायाम-प्रकाशात्। ननु तत्राप्यानन्दस्वभावः पुरुषः प्रकाशत एव आत्मनि प्रेमोत्पत्तेः। न ह्यसुखे प्रेमोत्पत्तिः सम्भवति, नाप्यविज्ञाते सुखे। किमिदानीमस्माभिरात्मा सुखरूपोनु-भूयते? सत्यमिति ब्रुवाणस्यातिसाहसिकस्य नोत्तरं वाच्यम्। यदि संसारिणोपि परमानन्दमनुभवेयुः, ततो मुक्तस्य न कश्चिदतिशय इति, तदेवापुरुषार्थत्वं मोक्षस्यापद्येत। अतो बलादसुखरूपस्याप्यात्मनः प्रेमविषयत्वं दृष्टत्वादङ्गीकर्तव्यम्।

अथ स्वप्रकाशोप्यानन्दः संसारावस्थायामभिभूतो न प्रकाशते? कोयं प्रकाश-मानस्याऽभिभवो नाम? प्रकाशनिवारणं ह्यभिभवः, न च प्रकाशमानस्याऽप्रकाशनं सम्भवति। यदि तु नैव प्रकाशते संसारावस्थायाम्? तस्यामवस्थायामसतः प्रकाशस्य मुक्तावस्थायामुत्पद्यमानस्य कारणं वक्तव्यम्। विज्ञानमेव च प्रकाशाख्यस्य फलस्य कारणम्, तच्चेन्द्रियाधीनम्। न च मुक्तस्येन्द्रियाणि सम्भवन्तीति कथमानन्दानुभवः स्यात्?

शंका—विद्यमान आनन्द भी जबतक अनुभवका विषय नहीं होता, तबतक वह अकिंचित्कर ही है। मुक्त पुरुष सभी इन्द्रियोंसे विहीन होता है। उसे आनन्दका अनुभव नहीं हो सकता। यदि माना जाए यह आनन्द स्वप्रकाश* है? उत्तर—नहीं। संसारावस्थामें आनन्दका प्रकाश न होनेसे।

शंका—मुक्ति दशामें भी आनन्द स्वभाव आत्मा प्रकाशित होता ही है, आत्मामें प्रेम उत्पन्न होनेसे। सुखके न रहनेपर प्रेम उत्पन्न नहीं होता। और न ही अज्ञात सुखमें प्रेम उत्पन्न होता है।

उत्तर—क्या अब हमलोग आत्माको सुख रूपसे अनुभव करते हैं? हाँ कहनेवाले अत्यन्त साहसी व्यक्तिको उत्तर न देना ही श्रेयस्कर है। यदि संसारी लोग भी परम आनन्दका अनुभव करते तो, मुक्त पुरुषकी और उनकी कोई विशेषता न रह जाएगी। वही मोक्षकी अपुरुषार्थता हो जाएगी। इसलिए दृष्ट होनेसे सुखरूप आत्माकी प्रेमास्पदता माननी ही चाहिए।

शंका—स्वप्रकाश आनन्द भी संसार अवस्थामें अभिभूत होकर, प्रकाशित नहीं होता। उत्तर—बताइए प्रकाशमानका अभिभव होना क्या वस्तु है? प्रकाशका निवारण ही तो अभिभव कहलाता है। प्रकाशमान् वस्तुका अप्रकाशन सम्भव नहीं। शंका—यदि संसार अवस्थामें आनन्द प्रकाशित नहीं होता तो, अविद्यमान प्रकाशका मुक्ति दशामें उत्पन्न होनेका कारण बताइए। विज्ञान ही प्रकाश नामक फलका कारण है। वह इन्द्रियाधीन (इन्द्रियजन्य) है। मुक्त पुरुषकी इन्द्रियाँ नहीं होती। उसे आनन्दानुभव कैसे होगा?

---

* अर्थात् विद्वानोंका कहना है कि आत्मामें अनौपाधिक प्रेम कृमी कीटादिका भी नित्य सिद्ध है—'प्रेमानुपाधिरसुखात्मनि नोपलब्धः स प्रत्यगात्मनि कृमेरपिनित्यसिद्धः' इति।

जाए, किसे त्यागा जाए? ऐसी शंका होनेपर, विरुद्ध धर्मका समावेश होनेसे अनेक धर्मोंका ही ग्रहण होना चाहिए, एकका नहीं, यही भूयोऽनुग्रहन्याय है। जैसे—'विप्रतिषिद्धधर्मसमवाये भूयसां स्यात् सधर्मत्वम्' इत्यादि। इस प्रकार निष्कर्ष यह है कि सुख शब्द दुःखाभाव परक है, आनन्द शब्द नहीं। इसका विशेष विवरण द्वादश अध्यायमें देखना चाहिए।

उच्यते—बाह्येन्द्रियाण्येव मुक्तस्य निवर्तन्ते, मनस्तु तस्यामवस्थायामनुवर्तते इति, आनन्दश्रुतिबलादेवाध्यवसीयते। एवं ज्ञानं च 'नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते' इतिश्रुतेः, विज्ञानघनश्रुतेश्च। तस्मान्मुक्त्यवस्थायां मानसप्रत्यक्षेण परमानन्दमनुभवन्नात्माऽवतिष्ठते।

तदुक्तम्—'निजं यत्त्वात्मचैतन्यमानन्दश्चेष्यते च यः।
यच्च नित्यविभुत्वादि तैरात्मा नैव मुच्यते'॥ इति।
यत्तु—'तस्मात्कर्मक्षयादेव हेत्वभावेन मुच्यते[1]।
न ह्यभावात्मकं मुक्त्वा मोक्षनित्यत्वकारणम्'[2]॥

इतिवार्तिकं तत्परमतमित्येवमानन्दमोक्षवादिनो मतम्[3]।

अपरे[4] त्वाहुः—अभावात्मकत्ववचनमेव स्वमतम्, उपपत्त्यभिधानात्। आनन्दवचनं तूपन्यासमात्रत्वात् परमतम्, न हि मुक्तस्यानन्दानुभवः सम्भवति, करणाभावात्। मनः स्यादिति चेत्? न, अमनस्कत्वश्रुतेः—'अमनोऽवाक्' इति।

उत्तर—मुक्त पुरुषकी बाह्य इन्द्रियाँ नहीं होतीं। मन तो उस अवस्थामें भी अनुगमन करता है, ऐसा आनन्द श्रुतिके बलसे माना जाता है। इसी प्रकार ज्ञान भी रहता है—'विज्ञाताका जो विज्ञान है, उसका लोप नहीं होता, यह श्रुति है। 'विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय' इत्यादि श्रुतिसे आत्मा विज्ञानघन है, यह प्रतिपादित होता है। (मुक्त दशामें आत्मस्वरूपका नाश नहीं होता। उस समय ज्ञान भी रहता है) अतः मुक्ति अवस्थामें मानस प्रत्यक्षसे परमानन्दका अनुभव करते हुए आत्मा रहता है। इसमें प्रमाण देते हैं 'तदुक्तं' से। अर्थ—जो स्वाभाविक आत्म चैतन्य तथा आनन्द है और जो नित्य विभुत्व आदि धर्म हैं, उनसे आत्मा कभी विमुक्त नहीं होता*'।

(ग्रन्थकार 'यत्तु' इत्यादिसे अनुवाद करते हैं—) यह जो कहा गया है कर्मका क्षय होनेसे ही कारणके अभावमें मुक्त होता है, मोक्ष अभावात्मक है। इसके बिना मोक्षके नित्य होनेमें कोई कारण नहीं, यह वार्तिकका अर्थ है। यह वार्तिक किसी दूसरेका मत है, ऐसा आनन्दरूप मोक्ष माननेवालेका कथन है।

---

* अर्थात् उस समय मन भी नहीं रहता। क्योंकि श्रुति इसका निषेध करती है। यह सब सांख्य मतके निराकरण प्रसंगमें कह दिया गया है। यहाँ सन्देह होता है कि आनन्द रूप मोक्ष है, इस पक्षका वार्तिकने स्वयं खण्डन किया है, तब यह पक्ष वार्तिक-सम्मत कैसे हो सकता है? इसका उत्तर है—कि मोक्षमें यह अनित्य है ऐसा दोष दिया गया है। इसका परिहार किया जा सकता है। अतः आनन्दरूप मोक्ष है, यही वार्तिककारका अभिमत पक्ष है, ऐसा किसी व्याख्याताका मत है। अपने पक्षका तो वार्तिककारने स्वयं समर्थन किया है। उसमें युक्ति भी दी है। और इस पक्षके अनन्तर दूसरे पक्षका उपन्यास भी नहीं किया गया हैं, अतः यही पक्ष वार्तिककारको अभिमत है।

---

१. श्लो० वा० सं० क्षेप०, का १०६। २. श्लोकवा० सं० क्षेप०, का १०७।

३. परमतनिराकरणप्रसंगेनोक्तत्वादित्यर्थः। ४. स्वामिप्रेतं वार्तिकाभिप्रायमाह अपरेत्वाहुरिति। एतदनन्तरं मतान्तरानुपन्यासात्, अत्र च युक्त्यभिधानात्, तदेव वार्तिककृन्मतमस्ति।

मोक्षावस्थायां ज्ञानाभावस्योपपादनम्

यत्तु—'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते' इति, तज्ज्ञानशक्त्याभिप्रायम्, अन्यथा हि सुषुप्तावपि ज्ञानानुवृत्तिरुक्ता स्यात्। सा च संविद्विरुद्धेत्युक्तम्। विस्पष्टं चास्य शक्त्यभिप्रायत्वम्। एवं हि श्रूयते—'यद्वै तन्न पश्यति, पश्यन् वै तन्न पश्यति, न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते, अविनाशित्वात् 'न तु तद्द्वितीयमस्ति, ततोऽन्यद्विभक्तं यत् पश्येत्'।

एवमन्यान्यपि वाक्यानि—'जिघ्रन् वै तन्न जिघ्रति, न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यते' 'न श्रोतुः श्रुतेर्विपरिलोपो विद्यये'—'न स्प्रष्टुः स्पृष्टेर्विपरिलोपो विद्यते' 'न ज्ञातुर्ज्ञातेर्विपरिलोपो विद्यते' इति, तत्र तत्र दृष्टि-घ्राति-श्रुति-स्पृष्टि-शब्दाश्चक्षुर्घ्राणश्रोत्र-त्वगिन्द्रियजन्यानां रूप-गन्ध-शब्द-स्पर्श विषयाणां विज्ञानविशेषाणां वाचकाः, नार्थान्तरविषयाणाम्, नापि विज्ञानसामान्यस्य। न चैषां ज्ञानविशेषाणां सुषुप्तौ मुक्तौ वा कथं चिदप्यपरिलोपः सम्भवति। न हि तदानीमिन्द्रियाणि सन्ति, नापि गन्धादयो ज्ञायन्ते। तदुभयाभावे च न श्रुत्यादिशब्दवाच्यज्ञानविशेषाः सम्भवन्ति।

दूसरे लोग तो कहते हैं कि अभावात्मक वचन ही अपना मत है। अर्थात् वार्तिककारको यही पक्ष अभिमत है, क्योंकि उसमें युक्तिका कथन है। आनन्द वचन तो उपन्यास मात्र होनेसे दूसरेका मत है। क्योंकि मुक्त जीवको आनन्दका अनुभव नहीं होता, इन्द्रियोंका अभाव होनेसे। शंका—इन्द्रिय न हों, मन तो है, इसलिए आनन्दका अनुभव हो सकता है। उत्तर—नहीं श्रुति बताती है मन नहीं है 'जिसके मन और वाणी नहीं है' यह श्रुतिका अर्थ है❀।

अब 'इन्द्रिय और विषयके अभावमें विज्ञाताके विज्ञानका नाश नहीं होता' इस वाक्यको अपने मतसे व्याख्या करते है—'यत्तु' इत्यादि से। यह श्रुति मोक्ष दशामें ज्ञानका नाश नहीं बताती, किन्तु इसका यह तात्पर्य है कि उस समय ज्ञान-शक्तिका नाश नहीं होता। नहीं तो सुषुप्ति अवस्थामें भी ज्ञानकी अनुवृत्ति होती है, ऐसा कहना होगा। यह अनुभव विरुद्ध है, यह पूर्वमें कह चुके हैं। और इसका शक्ति ही अभिप्राय है ऐसा स्पष्ट रूपसे कह भी सकते हैं। श्रुतियाँ इस बातको बताती हैं—'यह जो उसको नहीं देखता, वह देखता हुआ भी नहीं देखता है, द्रष्टाकी दृष्टिका नाश नहीं होता, अविनाशी होने से। वह दूसरा कुछ है नहीं, जिसको दूसरा पृथक् देख सके'।

इसी प्रकारके जो और भी वाक्य हैं, उनका भी शक्तिके अभिप्रायसे व्याख्यान करना चाहिए। जैसे—'सूंघता हुआ भी नहीं सूंघता है, क्योंकि सूंघने वालेकी घ्राण करनेकी शक्तिका लोप नहीं होता है। इसी प्रकार 'श्रोताकी श्रुतिका नाश नहीं होता' 'जो स्पर्श करने वाला है उसको

❀ अर्थात् मुक्त पुरुषका आनन्दभोक्तृत्व तथा मनकी सत्ताको श्रुतियाँ स्पष्ट बताती हैं—'स वा एष दिव्येन चक्षुषा मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके' 'स तत्र पर्येति जक्षत् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा, स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ति' सूत्रञ्च—संकल्पादेव तच्छ्रुतेः'

ननु यथा प्रकाश्यासंनिधावपि सवितुः प्रकाशकत्वं नित्यम्, एवमिन्द्रियाभावेपि नित्यैव दृष्टिरिति चेत् ? स्यादेवं यदि ज्ञानमात्रं दृष्ट्यादिशब्दानां वाच्यं स्यात्, न तु तथास्ति, लोकप्रसिद्ध्यभावात्। यथा लोके च शब्दार्थावधारणम्, न यथेच्छम्। न हि लोके गन्धादन्यद् घ्राणं जिघ्रतीत्युच्यते, गन्धमपि यदा घ्राणादन्येनानुमानादिना जानाति तदा न जिघ्रतीत्युच्यते, तस्माद् घ्राणादीन्द्रियजन्यगन्धादिविषयज्ञानविशेषवाचिनोघ्रात्यादि-शब्दाः। न च तेषां सुषुप्तौ मुक्तौ वा सम्भवत्यपरिलोपः, तस्माद् घ्राणादिशक्तावेव प्ररोचनार्थं घ्राणाद्युपचारः। यथा 'तेन ह्यन्नं क्रियते' इति शक्तिवर्तमानत्वेन प्ररोचनार्थं 'क्रियते' इति वर्तमानत्वोपचारः[1], तस्मात् 'न ज्ञातुर्ज्ञातेर्विपरिलोपो विद्यते' इत्येतदपि शक्त्यभिप्रायमेव।

स्पृष्टिका नाश नहीं होता' 'ज्ञाताके ज्ञानका विपरिलोप नहीं होता' इस प्रकार तत् तत् वाक्योंमें❀ दृष्टि, घ्राति, श्रुति, स्पृष्टि शब्द क्रमशः चक्षु, घ्राण, श्रोत्र, त्वगिन्द्रियसे होनेवाले जो ज्ञान विशेष हैं, जिनके क्रमशः रूप, गन्ध, शब्द, स्पर्श विषय होते हैं, उन ज्ञानोंके वाचक हैं। अन्य विषयक ज्ञानोंके वाचक नहीं। विज्ञान सामान्यके भी वाचक नहीं। (यहाँ विज्ञान शब्दसे अनुमान समझना चाहिए) इन ज्ञान विशेषोंका सुषुप्तिमें या मुक्तिमें किसी भी प्रकार भान नहीं होता, यह बात नहीं, क्योंकि उस समय न इन्द्रियाँ हैं न गन्ध आदि विषय हैं, जो ज्ञानके विषय होते हैं। इन दोनोके अभावमें श्रुति, स्पृष्टि आदि शब्दके वाच्य ज्ञान विशेष नहीं हो सकते§।

शंका—इन्द्रिय और विषयके अभावमें ज्ञान हो सकता है, जैसे प्रकाश्य घटादिकी असन्निधिमें भी सूर्य प्रकाश करता है, यह नित्य सिद्ध है। वैसे इन्द्रियोंके अभावमें दृष्टि नित्य ही है।

उत्तर—यह तब हो सकता है यदि दृष्टि आदि शब्दोंका ज्ञान मात्र वाच्य होता। ऐसा तो

❀ ग्रन्थकारने मूलमें जो प्रतीक रूपमें श्रुतियां दी हैं, वे सम्पूर्ण रूपसे इस प्रकार हैं—

'यद्वै तन्न पश्यति पश्यन् वै तन्न पश्यति। न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात्। न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्' ॥ २३ ॥

'यद्वै तन्न जिघ्रति जिघ्रन् वै तन्न जिघ्रति। न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यतेऽविनाशित्वात्। न तु तद् द्वितीय मस्ति ततोऽन्यद्विभक्तं यज्जिघ्रेत' ॥ २४ ॥

'यद्वै तन्न शृणोति शृण्वन् वैतन्नशृणोति। न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यतेऽविनाशित्वात्। न तु तद् द्वितीयमस्ति ततोऽन्यद्विभक्तं यच्छृणुयात्' ॥ २७ ॥

'यद्वै तन्न स्पृशति स्पृशन् वैतन्न स्पृशति। न हि स्प्रष्टुः स्पृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात्। न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्स्पृशेत्' ॥ २९ ॥

'यद्वै तन्न विजानाति। विजानन् वै तन्न विजानाति। नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वात्। न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्विजानीयात्' ॥ ३० ॥

(द्रष्टव्य बृ० उ०, अ० ४, ब्राह्मण ३)

§ अर्थात् यथाश्रुत अर्थ माननेपर वाक्य अनर्थक हो जाएंगे। इसलिए उनका ज्ञान शक्तिके बोधनमें तात्पर्य है, ऐसी ही व्याख्या करनी चाहिए।

---

१. तत्प्रवाहमध्यपतित्वादिति 'ख' पुस्तके पाठः।

यत्त्वादित्यप्रकाशकत्ववदिति, किं तस्य प्रकाशकत्वमभिप्रेतम् ? यदि तिमिरोत्सारणम् ? तन्नित्यमस्त्येव, सर्वदा ह्यसावव्यवहितेषु देशेषु तिमिरमुत्सादयत्येव, न त्वेवमात्मा सर्वदा शृणोति सुषुप्तावश्रवणात्। अथ ज्ञानजनकत्वमादित्यस्य प्रकाशकत्वम् ? न तन्नित्यम्, तत्सामर्थ्यमेव तत्रापि नित्यम्। तस्माज्ज्ञानशक्त्यभिप्रायमिदं नित्यत्वाभिधानम्।

एषा ह्यत्र वचनव्यक्तिः—तदेतत् सुषुप्तौ मुक्तौ वात्मा न पश्यति पश्यन्नेव द्रष्टुं

नहीं है, लोक प्रसिद्धि न होनेसे*। लोकमें घ्राणेन्द्रिय गन्धसे अन्य किसी विषयको सूंघती है, यह नहीं कहा जाता। गन्धको भी जब घ्राणेन्द्रियसे भिन्न अनुमानादिसे जानता है तो 'सूंघता है' यह नहीं कहा जाता। अब उक्त अर्थका निगमन करते हैं 'तस्मात्' इत्यादिसे। अतः घ्राणादि इन्द्रियोंसे उत्पन्न होनेवाले गन्ध आदि, ज्ञान विशेषके वाचक हैं घ्राति आदि शब्द। सुषुप्ति या मुक्तिमें उनका नाश नहीं होता, ऐसी बात नहीं, किन्तु नाश होता है। अतः शक्तिमें स्तुतिके लिए ही घ्राणादिका उपचार किया है। इसमें दृष्टान्त देते हैं 'यथा' इत्यादिसे§। जैसे 'उससे अन्न किया जाता है' ऐसे शूर्पमें शक्तिके न रहने पर भी वर्तमानके रूपमें स्तुति करनेके लिए 'क्रियते' यह वर्तमानताका उपचार किया जाता है। अतः 'ज्ञाताके ज्ञानका विपरिलोप नहीं होता' यह वाक्य भी शक्तिके तात्पर्यसे ही कहा गया है।

यह जो कहा गया है कि आदित्यका प्रकाश नित्य है, वैसे ही यह ज्ञान नित्य है, इत्यादि। इसका उत्तर देते हुए विकल्प करते हैं—उसकी प्रकाशकता आपको किस रूपसे अभिमत है। इसमें दो विकल्प हैं—जैसे सूर्यका अन्धकारको दूर करना ही उसकी प्रकाशकता है ? या ज्ञान जनकता है ? इसमें प्रथम पक्ष ठीक नहीं; क्योंकि उसकी प्रकाशकता नित्य है ही। सदा यह आदित्य अव्यवहित देशोंमें अन्धकारका नाश करता ही है। आत्मा तो ऐसा नहीं है; क्योंकि सर्वदा श्रवण नहीं करता है। सुषुप्तिमें श्रवणका अभाव हो जाता है (अतः प्रथम पक्ष ठीक नहीं)

तब दूसरा पक्ष लीजिए ज्ञान जनन ही आदित्यकी प्रकाशकता है, वह तो नित्य नहीं है। अतः सामर्थ्य = शक्तिसे ही वहां भी नित्य है। इसलिए 'दृष्टुः दृष्टेर्विपरिलोपो न विद्यते, अविनाशित्वात्' इत्यादि श्रुतियोंका ज्ञानशक्तिमें ही तात्पर्य है। अर्थात् ज्ञानशक्तिको लेकर ही नित्य कहा गया है। यहां इस वचनका विन्यास इस प्रकारका है—'यह जो सुषुप्ति या मुक्तिमें आत्मा नहीं देखता है, देखते हुए देखनेका सामर्थ्य होनेपर भी नहीं देखता है' अन्यथा दृष्टा आत्माकी

---

* शब्द-शक्तिका निश्चय लोकमें व्युत्पन्न पुरुषके व्यवहारसे होता है। अपनी इच्छासे नहीं, यों भाष्य तथा वार्तिककारने कहा है—'लोके येष्वर्थेषु प्रसिद्धानि पदानि तानि तदर्थान्येव' (मी० द० भा०, पृ० १)

श्लोकवार्तिक, प्रत्यक्षसूत्र, का १३२ में भी कहा गया है कि—

वृद्धप्रयोगगम्याश्च शब्दार्था सर्व एव नः। तेन यत्र प्रयुक्तोऽयं न तस्मादपनीयते ॥ इति ॥

§ चातुर्मास्य प्रकरणमें 'शूर्पेण जुहोति तेन ह्यन्नं क्रियते' यह वाक्य पढ़ा गया है। शूर्पसे होम करना चाहिए क्योंकि उससे अन्नका परिष्कार आदि किया जाता है। यहाँ जब अन्न क्रियामें करण होता है शूर्प, उस कालमें होम साधन तो होगा नहीं। शक्ति उसमें है, अतः यहाँ स्तुतिके लिए वर्तमानताका उपचार किया गया है। उसीके समान यहाँ भी समझना चाहिए।

शक्नुवन्नेव न पश्यति। नहि द्रष्टुरात्मनो या दर्शनशक्तिस्तस्याः कदा चिदपि लोपो विद्यते। सा ह्यविनाशिनीति, न द्रष्टुर्द्वितीयमन्यद् दर्शनसाधनं चक्षुर्व्यापाररूपम्, दृश्यं वा तस्यामवस्थायामस्ति, यतो दर्शनं स्यात्। यद्यपि दृश्यं रूपादिकं स्वरूपतस्तस्यामवस्थायामस्ति, तथापि दृश्यता = दर्शनयोग्यता तस्यामवस्थायां नास्तीति तेन रूपेणाभावाद् दृश्यं नास्तीत्युच्यते। तस्मात्साधनान्तरवैकल्यात् तस्यामवस्थायां न पश्यति, न शक्तिवैकल्यात्। शक्तिस्तु न कदा चिदपि लुप्यते इति। एवमन्येषामपि वाक्यानां योजना। तथा ज्ञानशक्त्यपरिलोप एव ज्ञानापरिलोप उच्यते, ज्ञातिशब्दश्चात्रानुमानादिज्ञानपरः, चक्षुरादिज्ञानानां स्वशब्दैरुक्तत्वात्।

एवम्—'विज्ञानं ब्रह्म' 'विज्ञानघनः' इत्यादीनामपि शक्तिपरत्वं वेदितव्यम्। स्वयमेव श्रुत्या शक्तिपरत्वं व्याख्यातम्—'विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति' इति। भूतेन्द्रियनाशादात्मापि प्रमाणागोचरत्वमापन्नो विनष्ट इव भवतीति। न तस्येतः प्रेतस्य = मुक्तस्य संज्ञास्तीति। एवं याज्ञवल्क्येनोक्ते मैत्रेयी चोदयति स्म—'अत्रैव भगवान् मा मोहितवान्—विज्ञानघन[1] इति, न चास्ति संज्ञेति विरुद्धाभिधानात्' इति। षष्ठाध्याये तु विनाशाविनाशविरोधश्चोदयिष्यत इति विवेकः। एवंचोदितो याज्ञवल्क्यः परिहारमाह—'न वा अरे अहं मोहम् = 'परस्परविरुद्धं ब्रवीमि'

दर्शन शक्तिका कभी भी लोप नहीं होता, क्योंकि वह अविनाशिनि है। अतः दृष्टा पुरुषका दूसरा कोई दर्शनका साधन = चक्षुका व्यापार या दृश्य वस्तु उस अवस्थामें नहीं है। अतः उस रूपसे अभाव होनेसे दृश्य नहीं है, यह कहा जाता है। इसलिए साधनान्तरकी विकलतासे उस अवस्थामें नहीं देखता है, न कि शक्तिकी विकलतासे। शक्ति तो कभी भी लुप्त नहीं होती। इस प्रकार और जो छः पर्याय हैं, उन्हें भी इसी तरहसे शक्तिके तात्पर्यसे लगाना चाहिए। ऐसे ही ज्ञान शक्तिका लोप न होना ही ज्ञानका अपरिलोप कहलाता है। यहाँ ज्ञाति शब्द अनुमानादि ज्ञान परक है यह पूर्वमें कह चुके हैं, क्योंकि चक्षु आदि ज्ञानोंके स्ववाचक शब्दोंसे दृष्ट्यादि शब्द कहे गए हैं।

शंका—ऐसे (ज्ञाति = ज्ञान आदि शब्दोंका शक्तिपरक व्याख्यान करनेपर 'विज्ञान ब्रह्म है' इत्यादि श्रुतियोंकी कैसे व्याख्या करेंगे?) उत्तर—इस प्रकार 'विज्ञान ब्रह्म है' 'विज्ञानघन है' इत्यादि श्रुति वाक्योंकी भी शक्तिपरक व्याख्या समझनी चाहिए। शंका—(ज्ञानादि शब्दोंकी शक्तिपरक व्याख्या करनेपर, श्रुतहानि, अश्रुतकल्पना आदि दोष हो जाएँगे?) उत्तर—स्वयं ही श्रुति शक्तिपरक व्याख्यान कर देती है। जैसे 'विज्ञानघन ही इन भूतोंसे निकल कर, उनके नाशके अनन्तर यह भी नष्ट होता है, इस रूपसे भूत और इन्द्रियोंके नाशसे आत्मा भी प्रमाणका विषय न होकर, विनष्टकी तरह हो जाता है। उस प्रेतकी अर्थात् मुक्तकी कोई संज्ञा नहीं रहती। (अतः श्रुतिकृत व्याख्यानमें उपर्युक्त दोष नहीं) इस प्रकार याज्ञवल्क्यके कहनेसे मैत्रेयीने प्रश्न किया कि भगवन्! आपने तो यहींपर मुझे मोहमें डाल दिया। वह यह है कि आप उस आत्माको विज्ञानघन भी कहते हैं और उसकी संज्ञा नहीं है यह भी कहते हैं। इस कथनका तो पूर्वापर विरोध है। (उक्त विरोध चतुर्थ अध्यायमें बताया गया है) छठे अध्यायमें तो विनाश-अविनाश

---

१. अर्थतोऽनुवादोऽयम्, न तु श्रुतेरानुपूर्वी।

'अलं वा अरे इदं विज्ञानाय' अत्रात्मतत्त्वं सर्वास्ववस्थासु विज्ञानायसमर्थमित्यर्थः, तेन विज्ञानघनत्वाभिधानं सामर्थ्याभिप्रायमिति व्याख्यातं भवति। सम्भवति च शक्तस्यापि ज्ञानाभाव इति नास्ति विरोध इत्यभिप्रायः। अनया श्रुत्या सर्वविज्ञानश्रुतयः शक्त्यभिप्राया व्याख्याताः।

यदि शक्तिरस्ति, तस्यामवस्थायां ततः केन ज्ञानानुत्पत्तिः? ज्ञानसाधनानामिन्द्रियाणां ज्ञेयानां च विषयाणामभावात्। तदाह—'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति, यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत्?' इत्यादि। तदेतत् प्रागेव व्याख्यातम्। एवमर्थान्तरज्ञाने साधनाभावान्निराकृते सति आत्मानमेव मुक्तावस्थायां जानात्वित्याशङ्क्याह—'विज्ञातारमरे केन विजानीयात्' इति, न ह्यात्मापि विना साधनेन ज्ञातुं शक्यते, मनसा खल्वसौ संसारावस्थायां ज्ञायते। न च मुक्तस्य मनस्सम्बन्धोस्ति,

---

नाशका विरोध कहा जाएगा; यह दोनोंका विवेक है*। इस प्रकार पूछे जानेपर याज्ञवल्क्य उसका परिहार करते हैं—'अरी मैं मोह नहीं करता' अर्थात् 'मैं परस्पर विरुद्ध वचन नहीं करता हूँ, अतः ब्रह्मसाक्षात्कारके लिए यह पर्याप्त है। यहाँपर आत्माका स्वरूप सभी अवस्थाओंमें विज्ञानके लिए समर्थ है; यह उसका अर्थ है। अतः आत्माको विज्ञान-घन कहना उसकी सामर्थ्यके अभिप्रायसे व्याख्यात हुआ है। सशक्तके ज्ञानका अभाव भी हो सकता है; यह सम्भव है। अतः कोई विरोध नहीं, यह तात्पर्य है। इस श्रुतिसे सर्वविज्ञान श्रुतियोंकी भी शक्तिके अभिप्रायसे व्याख्याकी गई है।

शंका—यदि शक्ति है तो उस अवस्थामें किस कारणसे ज्ञान उत्पन्न नहीं होता? उत्तर—ज्ञानके साधन इन्द्रियां तथा ज्ञेय विषय हैं, उनके न रहनेसे। इसी बातको श्रुति बताती है—'जिस अवस्थामें द्वैतकी तरह होता है, उस अवस्थामें दूसरा दूसरेको देखता है; जिस अवस्थामें उसका सब कुछ आत्मा ही हो गया है, तब किससे किसको देखेगा' इत्यादि। इसका पूर्वमें व्याख्यान हो चुका है। इस प्रकार दूसरे अर्थका ज्ञान-साधन न होनेसे निराकृत होनेपर आत्माको ही मुक्ति अवस्थामें जान लें, यह आशंका कर, श्रुति बताती है—'अरी मैत्रेयी! विज्ञाताको किससे जानें? आत्मा बिना साधनके नहीं जाना जा सकता। मनसे ही वह संसारावस्थामें जाना जाता है। मुक्तका मनसे कोई सम्बन्ध नहीं, अतः किससे उसको जानें? इस प्रकार स्पष्ट ही मुक्त पुरुषमें

---

* शुक्ल यजुर्वेदके शतपथ ब्राह्मणके अन्तर्गत वृहदारण्यक उपनिषद् है। उसमें छः अध्याय हैं। प्रथम, द्वितीय अध्यायका नाम आगम काण्ड है। तृतीय, चतुर्थ अध्यायको ऋषि काण्ड या याग्यवल्क्य काण्ड कहते हैं। पंचम, शष्ठ अध्यायोंको खिल काण्ड कहा जाता है; परन्तु ब्राह्मणके क्रमसे इसके आठ अध्याय हैं। उसमें प्रथम दो अध्याय प्रवर्ग्य नामक कर्मके प्रतिपादक हैं। अतः ये कर्मकाण्डके अन्तर्गत हैं। ब्राह्मण क्रमसे चौथे अध्याय तथा छठे अध्यायमें याग्यवल्क्य-मैत्रेयीका संवाद है। उसमें आत्माको विज्ञानघन कहा गया है। साथ ही 'न प्रेत्यसंज्ञास्ति' कहा है। इन दोनोंमें विरोध है। छठे अध्यायमें विनाश-अविनाशका विरोध बताया गया है। पर विषय भेद होनेसे विरोध नहीं है। सिद्धान्त पक्षमें आत्मज्ञान ही को प्राप्त करे; यह निर्णय किया गया है।

आत्मनः ज्ञानानन्दस्वरूपस्य खण्डनम्

अतः 'केनात्मानं जानतु' इति व्यक्त एव मुक्तस्यात्मज्ञानस्याभावः[1], ज्ञानशक्तिमात्रस्यावस्थानं श्रुत्या दर्शितम्, तस्मान्निसम्बोधो[2] निरानन्दश्च मोक्षः।

ननु नात्मनोऽन्यद्विज्ञानम्, आनन्दो वा, किन्त्वात्मैव ज्ञानमानन्दश्च, 'विज्ञानं ब्रह्म' 'आनन्दं ब्रह्म' इति श्रुतेः। आत्मा च सुषुप्तितुरीययोरपि भवतीति कथं विज्ञानस्य चानन्दस्य चाभावः? नैतदेवम्—यद्धि वस्त्वन्तरप्रकाशजननस्वभावं वस्तु = यस्मिन् सति किमप्यर्थान्तरं प्रकाशत एव, तल्लोके विज्ञानशब्देनोच्यते। न चात्मनि सति किं चिदन्यत् शकाशत एव। विद्यमानेपि तस्मिन् सुषुप्त्यवस्थायामर्थान्तरस्य कस्यचिदप्यदर्शनात्। अतो न ज्ञानमात्मा।

ननु प्रकाशजननस्वभावोपि सहकारिवैकल्यान्न जनयेत्। सत्यं न जानयति, यस्मिंस्तु सहकारिसंन्निधाने तत्कृते वाऽन्यस्मिन्नागन्तुके सति नियमेन प्रकाशत एवार्थान्तरम्, तज्ज्ञानशब्दवाच्यम्।

तथा गीतिश्रवण - प्रियालिङ्गन-चन्द्रदर्शन—मधुरास्वाद—सुरभिघ्राणादिजन्यमाह्लादमानन्दसुखशब्दावभिदधाते। न चैवंरूपत्वमात्मनोस्ति। यथा ह्यन्यसुखे षुसुखरूपं प्रत्यभिज्ञायते, नैवमात्मनि प्रत्यभिजानीमः, येनानन्दशब्दस्याभिधेयः स्यात्।

आत्मज्ञानका अभाव है। ज्ञान-शक्ति मात्र आत्माका होना श्रुतिसे दिखाया गया है। अतः मोक्षमें न ज्ञान रहता है, न आनन्द। इसलिए विना ज्ञान और बिना आनन्दका मोक्ष है।

(अद्वैतवेदान्तीका कहना है, कि आत्मा ज्ञान तथा आनन्दरूप है, उनके इस कथनका निरास करनेके लिए अनुवाद करते हैं 'ननु' इत्यादिसे) शंका—आत्मासे ज्ञान या आनन्द भिन्न होता तो आत्मा ज्ञान-आनन्द-स्वरूप न होता। किन्तु आत्मा ही ज्ञान तथा आनन्द स्वरूप है इस बातको श्रुति बताती है—'ब्रह्म विज्ञान है' 'आनन्द ही ब्रह्म है' इत्यादिसे। अतः आत्मा ज्ञानरूप और आनन्दरूप है। ऐसा होनेपर सुषुप्ति तथा मुक्ति अवस्थामें भी आत्मा रहता ही है। तब ज्ञान तथा आनन्दका अभाव कैसे होगा? उत्तर—यह ऐसा नहीं है। क्योंकि जिस वस्तुका दूसरी वस्तुको प्रकाशित करना ही स्वभाव है, उस वस्तुके रहनेपर दूसरी किसी न किसी वस्तुका प्रकाश होता ही है, उसीको लोकमें 'विज्ञान' शब्दसे कहते हैं। आत्माके रहनेपर किसी दूसरी वस्तुका प्रकाश होता ही है, यह नहीं कह सकते। आत्माके रहनेपर भी सुषुप्ति अवस्थामें दूसरे किसी पदार्थका दर्शन नहीं होता, अतः आत्मा ज्ञान नहीं है।

शंका—आत्मा ज्ञान स्वरूप है। दूसरी वस्तुको प्रकाशित करना उसका स्वभाव भी है तथापि सहकारी कारणके न रहनेसे प्रकाश नहीं करेगा। उत्तर—ठीक है, नहीं उत्पन्न करता है। जिस सहकारीका कारणके पास रहनेसे या उससे भिन्न दूसरे आगन्तुक कारणके रहनेपर, नियमसे अर्थान्तर प्रकाशित होता ही है; वही ज्ञान शब्दका वाच्य है।

इसी प्रकार गीतिकाका श्रवण, प्रियाका आलिंगन, चन्द्रमाका दर्शन, मधुर रसका आस्वादन, सुरभि गन्धका आघ्राण आदिसे पैदा होनेवाले आह्लाद-आनन्द शब्दसे और सुख शब्दोंसे कहे

१. आत्मज्ञानाभाव इति 'ग' पुस्तके पाठः। २. निःसम्बन्ध इति 'क' 'ख' पुस्तकयोः पाठः।

यनि पुनर्यदेवात्मरूपं प्रतीयते, तस्यैव ज्ञानमिति च, आनन्दमिति च संज्ञेत्युच्यते ? न सा लौकिकी, नापि वैदिकी । यदि परं वृद्ध्यादिवत् परिभाष्येत् ? तदस्तु यथाकामम् । यत्तु 'विज्ञानं ब्रह्म' 'आनन्दं ब्रह्म' इति च सामानाधिकरण्यम् , तद् धर्ममात्रवचनत्वेन धर्मधर्मिणोरभेदान्नीलोत्पलादिवदुपपन्नम् ।

नन्वानन्दादिशब्दा गुणमात्रनिष्ठा न नीलादिवद्गुणिनि वर्तन्ते ? सत्यम् न बाहुल्येन वर्तन्ते, कदाचित्तु गुणमात्रवचनानामपि गुणिनि प्रयोगो भवति । यथा शीतो मधुरो रसः स्निग्धो गुरुश्चेति रसशब्दो द्रव्ये प्रयुज्यते, अन्यथा शीतादिशब्दसामानाधिकरण्याऽयोगात् । किं च 'रसं ह्येवायं लब्ध्वानन्दी भवति' इति मत्वर्थीयनिर्देशादात्मानन्दयोर्भेदोऽवगम्यते । तथा 'आनन्दं ब्रह्मणो विद्वान्' 'स एको ब्रह्मणः आनन्दः' इति षष्ठ्यानन्दाद् ब्रह्म व्यतिरिच्यते ।

किं च 'न मे साम्प्रतं किंचिदपि सुखम् , दुःखमेव तु सर्वात्मना मम' इति सुखाभावे दुःखानुभवे चानुसन्धीयमानस्यात्मनः कथमानन्दरूपता स्यात् ? किं च स्वप्रकाशानन्दरूपमात्मानमभ्युपगच्छतामस्माकं चैतावदविवादम्—सुषुप्तितुल्या मुक्तिरिति ।

जाते हैं । आत्माका ऐसा स्वरूप तो नहीं है, जैसे अन्य सुखोंमें सुखरूपकी प्रत्यभिज्ञा होती है । इस प्रकार आत्मामें सुखकी प्रत्यभिज्ञाका ज्ञान हम लोग नहीं करते हैं । जिससे वह आनन्द शब्दका वाच्य हो ।

शंका—यदि कहा जाए जो कुछ आत्माका स्वरूप प्रतीत होता है, उसीकी ज्ञान और आनन्द संज्ञा है, ऐसा कहा जाता है ।

उत्तर—नहीं, यह संज्ञा न लौकिक है, न वैदिक । यदि कहा जाए 'वृद्धिरादैच' 'अदेङ्गुणः' इत्यादिकी तरह यह संज्ञा पारिभाषिक है, तो यथेच्छ होवे, कोई आपत्ति नहीं । शंका—'तब विज्ञान ब्रह्म है' 'आनन्द ब्रह्म है' ऐसा सामानाधिकरण्य कैसे होगा ? उत्तर—विज्ञान आदि शब्द उसके धर्म मात्रके वाचक होते हैं । धर्म और धर्मीका अभेद मानकर सामानाधिकरण्य उपपन्न होता है । इसमें दृष्टान्त है नीलोत्पल । (अर्थात् नील उत्पलका धर्म है । धर्म और धर्मीका अभेद मानकर, सामानाधिकरण्य होता है, वैसे प्रकृतमें समझना चाहिए)

शंका—नीलादि शब्द गुण और गुणी दोनोंके वाचक होते हैं, आनन्द शब्द तो गुण मात्र का वाचक है, अतः दृष्टान्त-दार्ष्टान्तिकमें विषमता है । उत्तर—ठीक है, बहुलतासे नहीं रहते । कदाचित् गुणमात्रके वाचक शब्दोंका गुणीमें प्रयोग होता है । जैसे 'यह रस मधुर है, शीतल है, स्निग्ध है तथा गरिष्ठ भी है । यहाँ रस शब्द द्रव्यमें प्रयुक्त हुआ है । अन्यथा शीत आदि शब्दोंका सामानाधिकरण्य नहीं बन सकेगा । और सुनिए—'रसको पाकर यह जीव आनन्दित होता है' यह श्रुति है । इसमें मत्वर्थीय प्रत्ययका निर्देश है इसका यह अर्थ है 'आनन्द जिसका है वह आनन्दी कहलाता है, अतः मत्वर्थीय प्रत्ययसे आत्मा और आनन्दका भेद स्पष्ट प्रतीत होता है । इसी प्रकार 'ब्रह्मानन्दको जाननेवाला' 'यह एक ब्रह्मका आनन्द है' इन श्रुतियोंमें 'ब्रह्मणः आनन्दः' ऐसे षष्ठी विभक्तिका निर्देश है । इससे भी आनन्दसे ब्रह्म भिन्न होता हैं । अतः उपर्युक्त तीन कारणोंसे आत्मा और आनन्द दोनों भिन्न हैं । (अतः आत्माकी आनन्दरूपता सिद्ध नहीं होती)

संसारानुवृत्त्यननुवृत्तिमात्रं भिद्यते, अन्यत्सर्वं तुल्यम्। तथा च श्रुतिरपि—'ता एताः प्रजा अहरहर्ब्रह्मलोकं यन्ति, अहरहरागच्छन्ति' इति सुषुप्तिं ब्रह्मलोकशब्देन वदन्ती तुल्यत्वमेतयोर्दर्शयति। सुषुप्तिश्चास्माकमपि गोचरः, न च तत्रानन्दानुभवोस्तीति व्यक्त मेतत्। तस्मान्निरानन्दो मोक्षः, दुःखपरिलोपाच्च पुरुषार्थत्वम्।

सुखलोपादपुरुषार्थत्वमपीति चेत्?

नैवमल्पं हि संसारे सुखं तदपि सूरयः।
बहुप्रयाससाध्यत्वाद् दुःखमेवानुजानते ॥२९॥
जन्ममृत्युजराव्याधिदुःखान्यनुदिनं नृणाम्।
स्वयमेव विना यत्नान्निपतन्ति सहस्रधा ॥३०॥
विहिताऽकरणान्नित्यं प्रतिषिद्धनिषेवणात्।
महदामुष्मिकं दुःखं यन्नरैर्नैव गम्यते ॥३१॥
बहुदुःखपरिष्वक्तं यन्नाम स्वल्पकं सुखम्।
सुरापानादिसुखवद्वर्जनीयं विवेकिनाम् ॥३२॥
एवं भूतेपि संसारे ये रक्ताः सुखतृष्णया।
न तेषामधिकारोस्ति मुक्तिशास्त्रे कथं चन ॥३३॥

और सुनिए—'आजकल मुझे कुछ भी सुख नहीं है, सभी प्रकारसे दुःख ही दुःख है'। इस प्रकार मुझे सुखाभावमें दुःखानुभवका अनुसन्धान होता है। अर्थात् सुखाभावरूप दुःखानुभवका अनुसन्धान करनेवाले आत्माकी आनन्दरूपता कैसे हो सकती है? और स्वप्रकाश आनन्द रूप आत्मा है, ऐसा माननेवाले वेदान्तियोंके साथ हम मीमांसकोंका इतने अंशमें कोई विवाद नहीं कि मुक्ति सुषुप्तिके तुल्य है और संसारकी अनुवृत्ति सुषुप्तिमें है, मुक्तिमें नहीं है। बस इतना फर्क है। और सब तो समान ही है। श्रुति भी इसी अर्थको बताती है—'ये प्रजाएं प्रतिदिन ब्रह्मलोक जाती हैं और प्रति दिन आती हैं'। इसी प्रकार सुषुप्तिको 'ब्रह्मलोक' शब्दसे कहती हुई श्रुति इन दोनोंको समानताको दर्शाती है। सुषुप्ति तो हम लोगोंको प्रत्यक्ष है, किन्तु वहाँ आनन्दका अनुभव नहीं होता, यह स्पष्ट है। अतः मोक्ष निरानन्द है। दुःखका अत्यन्तिक उच्छेद होनेसे पुरुषार्थ भी है।

शंका—यदि आप मोक्षमें दुःख निवृत्तिको पुरुषार्थ मानते हैं, तो उस समय सुखका भी सर्वथा उच्छेद होनेसे वह पुरुषार्थ नहीं होगा। उत्तर—ऐसा नहीं कह सकते। श्लोकोंका अर्थ = संसारमें सुख बहुत कम होता है। उसके भी अत्यन्त प्रयत्न साध्य होनेसे उस सुखको विद्वान् लोग दुःख ही समझते हैं ॥ २९ ॥ मनुष्योंको प्रतिदिन जन्म-मृत्यु, जरा-व्याधि आदि दुःख स्वयं ही बिना प्रयत्नके हजारों कारणोंसे आ पड़ते हैं ॥ ३० ॥ और विहित कर्मोंके न करनेसे, प्रतिदिन निषिद्ध कर्मोंके सेवनसे बड़े ही पारलौकिक दुःख होते हैं, जिनका मनुष्योंको ज्ञान नहीं होता ॥ ३१ ॥ अनन्त दुःखोंसे युक्त थोड़ा बहुत सुख भी सुरापानादि सुखके समान विवेकी पुरुषोंके लिए त्याज्य है ॥ ३२ ॥ इस प्रकारके दुःख बहुल, सुख स्वल्प संसारमें, सुखकी तृष्णासे आसक्त व्यक्तियोंका, मुक्ति शास्त्रमें किसी भी प्रकार अधिकार नहीं है ॥ ३३ ॥ जो संसारसे उद्विग्न हैं, जिन्होंने संसारकी उत्कृष्ट

संसाराद्‌द्विजन्ते ये दृष्टलोकपरावराः ।
त एव खलु मुच्यन्ते न तु यः प्राकृतो जनः ॥३४॥
तेषामेवापवर्गाख्यः पुरुषार्थो महात्मनाम् ।
तेषामेवाधिकारश्च मुक्तिशास्त्रे मनीषिणाम् ॥३५॥
तेनाऽभावात्मकत्वेपि मुक्तेर्नाऽपुरुषार्थता ।
सुखदुःखोपभोगो हि संसार इति शब्द्यते ॥३६॥
तयोरनुपभोगं तु मोक्षं मोक्षविदो विदुः ।
श्रुतिरप्येतमेवाह भेदं संसारमोक्षयोः ॥३७॥
न ह वै सशरीरस्य प्रियाऽप्रियविहीनता ।
अशरीरं वा व सन्तं स्पृशतो न प्रियाऽप्रिये॥३८॥
आनन्दात्मकमात्मानं ये वदन्ति स्वयंप्रभम् ।
तन्मतेपि च संसारान्मुक्तेरेतावती भिदा ॥३९॥
आत्मा ह्यानन्दरूपोसौ संसारेपि प्रकाशते ।
तावानेव स मोक्षेपि नाधिक्यं तस्य किंचन ॥४०॥
अथ संसारवेलायामानन्दो न प्रकाशते ? ।
न ह्यप्रकाशनं युक्तं स्वप्रकाशस्य वस्तुनः ॥४१॥
यद्यसौ न प्रकाशेत किं तर्ह्यन्यत् प्रकाशते ? ।
आत्मस्वरूपमिति चेत् ? ननु चानन्द एव तत् ॥४२॥

अपकृष्ट वस्तुओंको जान लिया है, वे ही मुक्त होते हैं। जो प्राकृत सामान्य जन हैं, वे मुक्त नहीं होते ॥ ३४ ॥ संसारसे विरक्त तथा अपवर्गको चाहनेवाले महाँपुरुषोंके लिए ही मोक्ष पुरुषार्थ है और उन्हीं विद्वनोंका मुक्ति-शास्त्रमें अधिकार है ॥ ३५ ॥ इससे अभावात्मक मुक्तिमें अपुरुषार्थताकी आशंका भी नहीं करनी चाहिए, क्योंकि सुख-दुःखका उपभोग हो संसार कहलाता है ॥ ३६ ॥ उन सुख-दुःखोंका उपभोग न करना ही मोक्ष है, ऐसा मोक्षको जाननेवाले विद्वान् लोग कहते हैं। भगवती श्रुति भी इसी प्रकार संसार और मोक्षका भेद बताती है ॥ ३७ ॥ जब तक शरीरका सम्बन्ध रहता है, तब तक सुख-दुःखका अभाव नहीं होता। जब शरीरका सम्बन्ध नहीं रहता तो सुख-दुःख भी स्पर्श नहीं करते* ॥ ३८ ॥ जो अद्वैत वेदान्ती आत्माको आनन्दात्मक तथा स्वयं प्रकाश मानते हैं, उनके मतमें भी संसारसे मुक्तिका यही भेद है, कि संसारमें सुख-दुःखका स्पर्श होता है, मुक्तिमें उसका अभाव है ॥३९॥ आत्मा आनन्द रूप होकर संसारमें भी प्रकाशित होता है। वैसे ही यदि मोक्षमें भी हो. तो उसकी कोई विशेषता न रह जाएगी ॥ ४० ॥ यदि संसारावस्थामें आनन्दका भान नहीं होता, तो ऐसा नहीं कह सकते, क्योंकि स्वयं प्रकाशित होनेवाली वस्तु प्रकाश न करे, यह कभी सम्भव नहीं ॥ ४१ ॥ आप ही बताइए कि यदि आत्मा प्रकाशित नहीं होता, तो दूसरा कौन प्रकाशित होता है ? यदि कहो कि आत्माका स्वरूप ही भासित होता है, तो आनन्द भी तो आत्माका

---

* उक्त अर्थकी प्रतिपादिका यह श्रुति है—'न ह वै सशरीरस्य सतः प्रियप्रिययोरपहतिरस्ति । अशरीरं वा वसन्तं न प्रियाप्रिये स्पृशतः । (छा० उ०, प्रपा० ३।१०।१)

तच्चेत् प्रकाशते नूनमानन्दोपि प्रकाशते।
तेन शब्दादिविषयजन्ययोः सुखदुःखयोः ॥४३॥
निवृत्तिरेव संसारादपवर्ग इतीर्यते।
ततश्च सुखलोपेन मुक्तेरपुरुषार्थता ॥४४॥
यद्यस्माकं भवेत्तर्हि तुल्यैषा भवतामपि।
सुखहानिमतस्तस्य भूयोदुःखविवर्जनात् ॥४५॥
मोक्षस्य पुरुषार्थत्वमावयोरुभयोः समम्।
सुखदुःखविहीनोऽतो मुक्तः स्वस्थोऽवतिष्ठते ॥४६॥

सिद्धान्ते मुक्तिस्वरूपकथनम्।

किमिदं स्वस्थ इति? येह्यस्यागमापायिनो धर्मा बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारास्तानपहाय यदस्य स्वं नैजं रूपं ज्ञान-शक्ति-सत्ता-द्रव्यत्वादि तस्मिन्नवतिष्ठते[1] इत्यर्थः। यदि तु संसारावस्थायामविद्यमानोप्यानन्दो मुक्तावस्थायां जन्यत इत्युच्यते, ततो जनिमत्वादनित्यो मोक्षः स्यात्। केन चासावनुभाव्यः? न हि स्वप्रकाशत्वं कस्यचित्सम्भवतीत्युक्तम्। न च मनसाऽनुभवः सम्भवति, मुक्तस्य मनसोऽभावात्, अमनस्कत्वश्रुतेरित्युक्तम्। अत एव 'नित्योप्यानन्दः संसारदशायामभिभूतत्वादननुभूतोपिमुक्तावऽ-

स्वरूप ही है ॥४२॥ वह यदि प्रकाशित होता है, तो निश्चित आनन्द प्रकाशित होता है। इस कारणसे शब्द-स्पर्श आदि विषयोंके सम्बन्धसे होनेवाले सुख-दुःखोंकी निवृत्ति ही संसारसे अपवर्ग कहलाता है। इसलिए सुखके लोपसे मुक्तिमें अपुरुषार्थताकी शंका करना युक्त नहीं ॥ ४३-४४ ॥ क्योंकि जो हम लोगोंको इष्ट है, वह आपको भी अभीष्ट है, अतः दोनोंमें समानता है। सुख हानिमान् मोक्ष है※। अर्थात् मोक्षमें सुख नहीं होता और बहुत दुःखोंके वर्जनसे पुरुषार्थता आप और हम दोनोंमें समान है। अतः सुख-दुखसे विहीन मुक्त जीव स्वस्थ ही रहता है ॥ ४५-४६ ॥

(पूर्वमें यह कहा गया है कि सुख और दुःखसे विहीन मुक्त आत्मा स्वस्थ रहता है) अब प्रश्न है कि यह स्वस्थता क्या वस्तु है? (अर्थात् स्वस्थ किसको कहते हैं) उत्तर—उत्पत्ति तथा विनाश धर्मवाले बुद्धि, सुख, दुःख, इच्छा, द्वेष, प्रयत्न, धर्म-अधर्म, संस्कार पर्यन्त जो गुण हैं, उन्हें छोड़कर आत्माका अपना स्वाभाविकरूप है—ज्ञान, शक्ति, सत्ता या द्रव्यत्वादिक। उन्हीं में मुक्त पुरुष रहता है (अर्थात् बुद्धि आदि संस्कार पर्यन्त धर्मोंको छोड़कर अपने स्वरूपमें रहना ही स्वरूपस्थता है। ज्ञान-शक्ति आदि तो उसके स्वरूपके अन्तर्गत ही हैं) जब संसारावस्थामें अविद्यमान भी आनन्द मुक्तावस्थामें उत्पन्न होता है, यह कहें तो उत्पत्तिमान् होनेसे मोक्ष अनित्य हो जाएगा। अब बताइए कि वह किसका अनुभाव्य होगा? यह पूर्वमें कह चुके हैं कि किसी चीजकी स्वप्रकाशता नहीं होती। शंका—यदि कहा जाए मनसे अनुभव हो सकता है। उत्तर—नहीं, मुक्तात्माके मनका अभाव होनेसे। इसमें 'अमना' यह श्रुति प्रमाण है, यह पूर्वमें कह चुके हैं। अतएव इससे यह जो कहा जाता है—'नित्य भी आनन्द संसारावस्थामें आवृत होनेके

※ 'अथ सुखहानिमतोऽपि मोक्षस्य दुःखनिवृत्यैवपुरुषार्थत्वं तदस्माकमपितुल्यमित्याह-तस्येति'।

१. यस्मिन्नवतिष्ठत इति 'ख' पुस्तके पाठः।

भिभवे निवृत्ते मनसाऽनुभूयते' इत्येतदपि निरस्तम् ।

किं च सुखविशिष्टात्मानुभवः पुरुषार्थः । न सुखमात्रानुभवः न च मुक्तावात्मानुभवः सम्भवति, 'विज्ञातारमरे केन विजानीयात्' इति कण्ठेनैव श्रुत्यानिषिद्धत्वात् 'अलं वा अरे इदं विज्ञानाय' इति च श्रुत्या विज्ञानशब्दस्य शक्तिपरत्वं व्याचक्षाणया मुक्तौ शक्तिमात्रमवतिष्ठते, न ज्ञानमिति व्यक्तमेवोक्तमिति श्रुतिविरुद्धं मुक्तस्य विज्ञानमशक्यमभ्युपगन्तुम्। न ह्यस्याः श्रुतेः प्रियाप्रियाऽस्पर्शश्रुतेश्च तत्त्व-कथनं मुक्त्वा कथंचिदन्यपरत्वं सम्भवति। विज्ञानश्रुतयस्तु शक्तावेव विज्ञानोपचारं कुर्वन्ति प्ररोचनार्थतयेत्युपपन्नम् । एवमानन्दश्रुतयोपि पुरुषार्थत्वसामान्यात् सुखत्वोपचारेण प्ररोचनार्थतया प्रवृत्ताः ।

उक्तं चैतत्—'वचनयोर्विरोधेऽन्यतो निर्णयः' इति! विरोधश्चात्रानन्दप्रियाऽभाववचनयोः। न चाऽभाववचनं वैषयिकाभिप्रायम्, इतरत्तु स्वाभाविकाभिप्रायमिति शक्यं वक्तुम्। उभयत्रापि सामान्योपादानात्, अत्यन्तसमानविषयत्वात्। अतः

कारण अनुभवका विषय नहीं होता, मुक्ति दशामें आवरण निवृत्त होनेपर मनसे अनुभव किया जाता है, यह भी निरस्त हुआ।

और सुनिए—सुख विशिष्ट आत्माका अनुभव ही पुरुषार्थ कहलाता है, सुख मात्रका अनुभव नहीं। मुक्ति दशामें आत्माका अनुभव नहीं होता, इस बातका श्रुति स्पष्टतया निषेध करती है। श्रुतिका अर्थ = 'अरी मैत्रेयी! सबको जाननेवाले ज्ञाताको किससे जाना जाए?' अर्थात् उसे जाननेका कोई साधन नहीं। और सुनिए—'अरी मैत्रेयी! यह उपदेश आत्म साक्षात्कारके लिए पर्याप्त है'। इस श्रुतिसे विज्ञान शब्द शक्तिपरक है, ऐसी व्याख्या करती हुई श्रुति कहती है कि मुक्ति दशामें शक्ति मात्र ही रहती है, ज्ञान नहीं रहता है, यह स्पष्ट ही कहा गया है। अतः मुक्त आत्माका श्रुति विरुद्ध आत्मज्ञान माननेके योग्य नहीं। उक्त श्रुति और प्रियाप्रियस्पर्श श्रुति 'अशरीरं वा वसन्तं न प्रियाप्रिये स्पृशतः' इन दोनोंके तत्त्व कथनको छोड़कर, किसी भी प्रकारसे अन्यपरकताका होना सम्भव नहीं। 'विज्ञानं ब्रह्म' इत्यादि श्रुतियां तो शक्तिमें ही विज्ञान शब्द औपचारिक है, यह बताती हैं। स्तुतिके लिए यह उपपन्न है।

इसी प्रकार 'आनन्द ब्रह्म' इत्यादि श्रुतियां भी पुरुषार्थत्वके सामान्यसे सुखत्वका उपचार करते हुए स्तुतिके लिए प्रवृत्त हैं। (अर्थात् सुख और दुःखाभाव दोनोंमें पुरुषार्थता समान है, अतः दुःखाभावमें सुखत्वका उपचार है) यह उचित भी है।

इसी बातको कहा है कि 'दो वचनोंके विरोधमें दूसरेसे निर्णय होता है'। अब प्रकृतमें 'आनन्दं ब्रह्म' यह श्रुति आनन्दको बताती है। 'न प्रियाप्रिये स्पृशतः' यह श्रुति प्रियाभावको कहती है। यहाँ दोनों वचनोंमें विरोध है। इस विरोधका परिहार दूसरेसे निर्णीत होता है।

शंका—यदि कहा जाए—'प्रियाभाव वचन वैषयिक सुख परक है, 'आनन्दं ब्रह्म' यह वचन स्वाभाविक सुख परक है।

उत्तर—ऐसा नहीं कह सकते, क्योंकि दोनों वचनोंमें सामान्यका ग्रहण है। अतः दोनों अत्यन्त समान विषयक हैं। इसलिए पूर्वोक्त वचनके अनुसार आनन्द वचन दुःखाभाव परक है।

प्रमाणान्तरवशादानन्दवचनं दुःखाभावपरम्, इतरत्तु यथाश्रुतमिति न्याय्यम्। तस्मात्[1] सुखदुःखादिसमस्तवैशेषिकात्मगुणोच्छेदो मोक्षः[2]। सुखदुःखोच्छेदश्च धर्माऽधर्मयोरुच्छेदात्। धर्माधर्मयोरुच्छेदश्चोत्पन्नानां धर्माधर्माणामुपभोगेन, नित्यनैमित्तिककर्मानुष्ठानेन, आत्मज्ञानेन च निरोधात्,[3] उत्पाद्यानां च काम्यानुष्ठाननिमित्तानां धर्माणां तदननुष्ठानेनानुत्पादात् विहिताकरण-प्रतिषिद्धानुष्ठाननिमित्तानां चाधर्माणां विहितानुष्ठानेन प्रतिषिद्धाऽकरणेन च परिहारात्, असति शरीरारम्भे पूर्वशरीरनिपाते च, अशरीरोवस्थितो मुक्तो भवति।

प्रियाभाव वचन यथाश्रुत है, ऐसा मानना ही उचित है। (उक्त अर्थका ही 'बहुकृत्वोपि पथ्यं वदितव्यं' इस न्यायसे पूर्वमें उक्त अपने सिद्धान्तको ही पुनः कहते हैं 'तस्मात्' से 'मुक्तो भवति' इति तक) उक्त सुख-दुःखादि, उत्पत्ति विनाशशील समस्त जो आत्माके विशेष गुण हैं, उनका उच्छेद ही मोक्ष है। शंका—सुख-दुःखका उच्छेद कैसे होगा ? उत्तर—धर्म और अधर्मके उच्छेदसे होगा। धर्माधर्मका उच्छेद भी उत्पन्न धर्माधर्मके उपभोगसे होता है। और नित्य-नैमित्तिक कर्मोंके अनुष्ठान तथा आत्मज्ञानसे उच्छेद होता है। क्योंकि उनसे इनका विरोध है❀। इस प्रकार उत्पन्न धर्मा-धर्मका नाश होता है। ऐसे उत्पाद्य जो धर्माधर्म हैं, जो काम्य कर्मोंके अनुष्ठानसे उत्पन्न होते हैं, उनके अननुष्ठानसे अनुत्पाद है। और जो अधर्म विहित कर्मोंके न करनेसे तथा निषिद्ध कर्मोंके अनुष्ठानसे होनेवाले हैं, उनका परिहार विहित कर्मोंके अनुष्ठानके द्वारा तथा प्रतिषिद्ध कर्मोंके न करनेसे होता है§। शरीरका आरम्भ न होनेसे तथा वर्तमान शरीरका पात होनेपर बिना शरीर सम्बन्धके आत्मा स्वस्वरूपमें अवस्थित = मुक्त होता है।

(इस प्रकार आत्मवाद प्रकरणका श्रीचन्द्रप्रभा नामक हिन्दी रूपान्तर समाप्त हुआ।)

❀ यहाँ 'ज्ञानाग्निसर्वकर्माणि भस्मसात् कुरुतेऽर्जुन' इत्यादि गीता वचनोंका भी यही तात्पर्य है। और यहाँ 'ज्ञान' शब्द उपासना परक है।

§ अर्थात् काम्य-निषिद्ध कर्म अपने अपने फलका भोग करानेके लिए शरीरका आरम्भ करते हैं। जो शरीर की उत्पत्ति नहीं चाहता, उसे ये दोनों कर्म नहीं करने चाहिएँ। और नित्य-नैमित्तिक कर्म पूर्व संचित अधर्मके क्षयके लिए करनें ही चाहिएँ। इसी प्रकार आत्मोपासना भी पूर्व संचित कर्मोंके क्षयके द्वारा ही मोक्षका साधन है। शंका—अग्निहोत्र आदि नित्य कर्म ही स्वर्गार्थ भी होते हैं, वे मोक्षके साधन कैसे होंगे ? उत्तर—फल-कामनासे क्रियमाण कर्म ही फल देकर जीवको बाँधते हैं, जो फलाभिसन्धि रहित हैं, वे तो मोक्षके ही साधन बनते हैं। इसी अभिप्रायको लेकर गीतामें भी भगवानने कहा है—'अनाश्रितः कर्मफलं कार्यंकर्म करोति यः' इत्यादि। और शरीरसे आत्मा भिन्न है, इस प्रसंगमें अपुनरावृत्ति श्रवण केवल अर्थवाद मात्र है। शरीरसे अतिरिक्त आत्माको जा नेवाला ही देह सम्बन्धसे विरक्त होकर, उक्त मोक्ष साधनोंके अनुष्ठानसे युक्त होता है, यह अर्थवादका विषय है।

---

१. बहुकृत्वोऽपि पथ्यं वदितव्यमिति न्यायेनोक्तमेवार्थं पुनराह तस्मादिति।
२. एतदर्थसंवादकं वार्तिकमस्माभिः पूर्वमेव लिखितम्, तदत्रानुसन्धेयम्।
३. 'क' पुस्तके विरोधादिति पाठो दृश्यते।

आत्मज्ञानस्य क्रत्वर्थत्ववर्णनम्

नन्वात्मज्ञानं क्रत्वर्थम् ? सत्यम्, पुरुषार्थमपि तत्, संयोगभेदात्। यत्तावत्—'अविनाशी वा अरेऽयमात्मा' इत्यादिना शरीराद्यतिरिक्तनित्यात्मस्वरूपसद्भावज्ञानम्, तत्पारलौकिकफलकर्मानुष्ठानौपयिकत्वात् कर्मज्ञानवदेव सामर्थ्यतः क्रतुसंयोगात् क्रत्वर्थम्। यथा हि ज्योतिष्टोमादिवाक्याध्ययनं दृष्टेनैवानुष्ठानौपयिकं ज्ञानं जनयतीति,

---

शंका— धर्म-अधर्मका आत्म ज्ञानसे उच्छेद होता है, यह कहा गया है। यह ठीक नहीं, क्योंकि आत्मज्ञान क्रतुका उपकारक होनेसे क्रत्वर्थ कहलाता है। उत्तर—ठीक है, वह आत्मज्ञान पुरूषार्थ भी होता है। संयोगके भेदसे। (अर्थात् संयोग पृथक्त्व न्यायसे विनियोजक वाक्योंका भेद है❀) यह जो कहा गया है—'अरो मैत्रेयी ! यह आत्मा अविनाशी है' इत्यादि वचनोंसे शरीरसे अतिरिक्त नित्य आत्माके स्वरूप सद्‌भावका ज्ञान दृष्टोपयोगी होनेसे क्रत्वर्थ है, यह ज्ञान कर्मानुष्ठानके लिए उपयोगी है। उस कर्मका फल पारलौकिक है (अर्थात् पारलौकिक फल साधन कर्मानुष्ठानका उपाय है) अतः कर्मज्ञानकी तरह सामर्थ्य रूप लिंगसे§ क्रत्वर्थ होता है, क्रतु संयोग होनेसे। उक्त अर्थका ही 'यथा हि' से उपपादन करते हैं। जैसे 'ज्योतिष्टोमेन स्वर्गकामो यजेत्' इत्यादि वाक्योंका अध्ययन दृष्ट अर्थज्ञान रूप प्रयोजनसे कर्मानुष्ठानके

❀ यहाँ संयोग नाम है विनियोजक वाक्यका। उसका भेद उभयार्थ होनेमें हेतु है। अर्थात् एक ही द्रव्य या कर्मका सम्बन्ध बोधक वाक्य जहाँ भिन्न भिन्न है, (उससे वह उभयार्थक होता है। यथा—'दध्ना जुहोति' दहीसे हवन करे। 'दध्नेन्द्रियकामस्य जुहुयात्' दधिसे इन्द्रियको प्राप्त करे; इस पहिले वाक्यसे दधि होमार्थ (क्रत्वर्थ) है। द्वितीय वाक्यसे इन्द्रियके लिए है। अतः विनियोजक वाक्योंका भेद होनेसे दधि उभयार्थ होता है। इसीको संयोगपृथक्त्व न्याय कहते हैं। सूत्र है—'एकस्य तूभयत्वे संयोगपृथक्त्वम्' (मी०मा० द० ४।३।३) एकके उभयार्थ होनेमें संयोगपृथक्त्व वाक्य भेद कारण है। प्रकृतमें आत्मज्ञान क्रत्वर्थ है, यह 'अविनाशि वा अरे' इत्यादि वाक्यसे ज्ञात होता है। 'आत्मानमुपासीत' 'आत्मा वा अरे द्रष्टव्यः' इत्यादिसे पुरुषार्थ मालूम होता है, अतः विनियोजक वाक्यके भेदसे आत्मज्ञान उभयार्थ है।

§ अर्थात् सामर्थ्यको लिंग कहते हैं। उसीका दूसरा नाम है रूढी। यह दो प्रकारका है। जो सम्बन्ध बोधक दूसरे प्रमाणकी अपेक्षा नहीं करता, वह निरपेक्ष सामर्थ्य कहलाता है। दूसरा सामान्य सम्बन्धके बोधक प्रमाणान्तरकी अपेक्षा रखता है, वह प्रमाणान्तरके ही प्रकरण होते हैं सन्निधि या समाख्या। पहिलेका उदाहरण है अर्थज्ञान कर्मानुष्ठानका अंग होता है। अर्थज्ञानके बिना कर्मोंका अनुष्ठान नहीं हो सकता। 'बुध्वा कर्माणि कुर्वीत' यह शास्त्रका कथन है। अतः यह अर्थज्ञान निरपेक्ष लिंगका उदाहरण है। ऐसे प्रकृतमें शरीरसे अतिरिक्त आत्माका ज्ञान क्रतुका अंग है, इसका विनियोजक 'अविनाशी वा' इत्यादि वाक्य है। अतः यह दूसरे लिंगका उदाहरण है। और दूसरा उदाहरण भी सुनिए—'बर्हिर्देवसदनं दामि' यह मंत्र है। यह बर्हिर्लवनका प्रकाशन करता है। किन्तु इस मंत्रके बिना भी बर्हिर्लवन सिद्ध होता है। अतः मंत्र बर्हि स्वरूपमें अनर्थक है। इस आनार्थक्यका परिहार करनेके लिए मंत्र प्रकरणसे अदृष्टार्थ होता है। अर्थात् इस मंत्रसे लवन करनेके कारण यागापूर्व होता है। अतः प्रकरण सहकृत लिंगसे मंत्र लवनका अंग होता है।

तदर्थतयैवाध्ययनविधिना विधीयते, तथा 'अविनाशी वा अरेऽयमात्मा' इत्यादिवाक्यानामप्यध्ययनविधिरेव कर्मानुष्ठानोपयोग्यात्मज्ञानार्थतां विधत्ते। तद् यदि प्रमाणान्तरेणात्मनः शरीरादिविवेको नैकान्ततः सिध्यति, ततो दृढविवेकप्रतिपादकानामुपनिषद्वाक्यानां विस्पष्टमेव फलम्। यथोक्तम्—

'इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्रयुक्त्या।
दृढत्वमेतद्विषयः प्रबोधः प्रयाति वेदान्तनिषेवणेन'[1] ॥ इति ॥

अथ त्वन्यतोपि सिध्यति ? ततो यथैवान्यथापि क्रतुज्ञानसम्भवेध्ययनोपात्तवेदवाक्यावगतकर्मरूपाणामेव पुंसां कर्मस्वधिकारः, तथैवाध्ययनोपात्तोपनिषद्वाक्यावगतात्मतत्त्वानामेवाऽधिकार इत्यध्ययनविधिबलादेव कल्प्यते।

उपयोगी ज्ञानको उत्पन्न करता है। अतः उसके अंगके रूपमें अध्ययनविधिसे अध्ययनका विधान होता है। उसी प्रकार 'अरे यह आत्मा अविनाशी है' इत्यादि वाक्योंके अध्ययनको भी अध्ययन विधि ही कर्मानुष्ठानका उपयोगी जो आत्मज्ञान है, उसके अंग रूपसे अध्ययनका विधान करती है। इसलिए यदि प्रमाणान्तर (प्रत्यक्षादि) से आत्माका शरीरादिसे भेद नियमसे नहीं सिद्ध होता, तो अवाधित विवेकका प्रतिपादन करनेवाले उपनिषद् वाक्योंका स्पष्ट ही फल है, कि आत्मा शरीरसे अत्यन्त भिन्न है। (शंका—'मैं स्थूल हूँ, मैं जाता हूँ' इत्यादि अनुभवसे शरीरमें ही अहन्ताका अनुभव होनेसे आत्माका शरीर आदिसे विवेक पुष्ट नहीं होता। उत्तर—विवेक पुष्ट करनेके लिए वेदान्त वाक्य ही मुख्य साधन हैं) इसी बातको वार्तिककारने आत्मवादके अन्तमें स्पष्ट कहा है। अर्थ='इस प्रकार भाष्यकारने नास्तिक (बौद्ध मत) का निराकरण करते हुए युक्तिके द्वारा आत्माके अस्तित्वका प्रतिपादन किया है। इस विषयका निष्कृष्ट=अवाधित ज्ञान=उपनिषदोंके निषेवणसे प्रपुष्टताको प्राप्त करता है*।

शंका—यदि दूसरे से भी विवेक सिद्ध होता, तो प्रकारान्तरसे क्रतुका ज्ञान सम्भव है। उत्तर—सम्भव नहीं, अध्ययनके द्वारा परिगृहीत वेदवाक्योंसे कर्म स्वरूपको जिन्होंने जान लिया है, अर्थात् वेदाध्ययनके द्वारा तत् तत् विधि वाक्योंका जिन्होंने ज्ञान प्राप्तकर लिया है, उन पुरुषोंका ही कर्मोंमें जैसे अधिकार होता है, वैसे ही अध्ययनके द्वारा परिगृहीत उपनिषद् वाक्योंसे जिन्होंने आत्मतत्त्वको जान लिया है, उन्हींका कर्मोंमें अधिकार है, यह अध्ययनविधिके बलसे ही कल्पना की जाती है।

---

* अर्थात् नित्य आत्माकी सत्ता मात्रसे वेदका प्रामाण्य सिद्ध होता है ? यह भाष्यकारने कहा है। जो आत्मविषयक ज्ञानको प्रपुष्ट करना चाहते हैं, उन्हें वेदान्तोपदिष्ट श्रवण, मनन, निदिध्यासनमें प्रयास करना चाहिए। यहाँ भाष्यकारने नित्य आत्माके प्रतिपादक वेदान्त वाक्योंका उद्धरण दिया है। आत्मा कर्ता-भोक्ता नहीं है, इन वाक्योंका उदाहरण नहीं दिया। यदि उदाहरण देते तो कर्म ही जिनकी शरण है, उनका कर्मोंमें शैथिल्य पड़ जाता। अतः भाष्यकारने उन उपनिषद् वाक्योंका उद्धरण नहीं दिया।

---

१. श्लोक वा०, आत्मवाद, का० १४८।

यत्वात्मसद्भावप्रतिपादनोपक्रमे विधिसरूपं वाक्यम्—'आत्मा वारे द्रष्टव्यः' इत्यादि, तद्वक्ष्यमाणस्यार्थस्यातिगहनत्वान्महोपयोगत्वाच्च 'कथं हि नामालस्यं हित्वा श्रद्धाविशेषेण वक्ष्यमाणमर्थं प्रतिपद्येत' इत्येतावन्मात्रार्थम्। तस्मादेतज्ज्ञानं दृष्टोपयोगित्वात् क्रत्वर्थम्।

आत्मज्ञानस्याभ्युदयनिःश्रेयसरूपफलार्थत्वम्

यानि पुनरितिकर्तव्यताविशेषयुक्तान्युपासनात्मकानि विधीयन्ते, तेषां क्रतौ दृष्टोपयोगाभावाददृष्टफलत्वम्। अदृष्टं च फलं वाक्यशेषाद् द्विविधम्—अभ्युदयरूपं निःश्रेयसरूपं च। 'सर्वान् कामानाप्नोति'। 'सोऽश्नुते सर्वान् कामान्' इत्याद्यभ्युदयफलम्। 'न स पुनरावर्तते' इत्यादि निःश्रेयसफलमिति विवेकः'।

आत्मनित्यत्वेनाधिकरणोपसंहारः।

यत्तु 'विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय, तान्येवाऽनुविनश्यति, न प्रेत्य-

---

(इस प्रकार शरीरातिरिक्त आत्मज्ञानका क्रतुमें विनियोग बताकर) जो आत्मतत्त्वके प्रतिपादनके प्रसंगमें विधिवाक्योंके समान वाक्य हैं, 'अरे आत्मा दर्शन करने योग्य है' इत्यादिक, उनसे वक्ष्यमाण अर्थके अति गहन और अत्यन्त उपयोगी होनेसे लोग आलस्यको त्यागकर, अत्यधिक श्रद्धासे वक्ष्यमाण अर्थको कैसे समझेंगे, उनका इतना मात्र अर्थ है। (अर्थात् आत्मज्ञान क्रत्वर्थ है, उन वाक्योंसे एतावन्मात्र अर्थ कहा गया है) उक्त अर्थका उपसंहार करते हैं 'तस्मादेतत्' इत्यादिसे। इसलिए यह आत्मज्ञान दृष्टोपयोगी होनेसे क्रत्वर्थ है*।

(क्रत्वर्थ आत्माज्ञानको बताकर पुरुषार्थरूप आत्मज्ञानको 'यानि' इत्यादिसे 'विवेकः' इत्यन्त ग्रन्थसे कहते हैं) जो उपासनाएँ इतिकर्तव्यतारूप गुण विशेषोंसे विशिष्ट विहित होती है, उनका क्रतुमें दृष्ट उपयोग न होनेसे अदृष्ट ही फल है। यह अदृष्ट फल भी दो प्रकारका है—एक अभ्युदयरूप तथा दूसरा निःश्रेयस रूप है। (ये दोनों फल वाक्यसे प्रतिपादित होते हैं) क्रमशः वाक्यशेषोंको बताते हैं 'सर्वांश्च' इत्यादिसे। अर्थ=यहाँ (श्रुतिमें काम शब्द 'काम्यन्त इति कामाः' इस कर्मपरक व्युत्पत्तिसे फलपरक है, अतः) 'साधक सभी फलोंको प्राप्त करता है' यह अर्थ है। 'वह ब्रह्मज्ञानी साधक सभी फलोंका उपभोग करता है' इत्यादि यहाँ अभ्युदय फल है। 'वह साधक पुनः नहीं लौटता' इत्यादि निःश्रेयस फल है। इस प्रकार इन दोनोंको विशेषता है§।

(श्रुति और युक्तिके द्वारा आत्माको नित्य सिद्ध किया। अब वाक्यान्तरसे उत्पन्न हुए भ्रमका निवारण करनेके लिए आरम्भ करते हैं 'यत्तु'से) जो यह कहा गया है 'विज्ञानघन ही

---

* वार्तिकमें इसका विवरण इस प्रकार है—

'आत्मा ज्ञातव्य इत्येतन्मोक्षार्थं न च चोदितम्। कर्मप्रवृत्तिहेतुत्वमात्मज्ञानस्य लक्ष्यते'। विवेकज्ञानस्य पारलौकिकफलेषु ज्योतिष्टोमादिषु प्रवृत्तिर्दृष्टमेव प्रयोजनमित्यर्थः।

§ यहाँ यह ध्यानदेने योग्य है कि दृष्ट प्रयोजनके न होनेसे उपासना रूप ज्ञान कर्ममें या पुरुषमें उपकारक नहीं है, अतः अदृष्टकी कल्पना करनी पड़ती है। इस पक्षमें भी अङ्गताके बोधक श्रुति लिंगादि प्रमाणोंके न होनेसे क्रत्वर्थका होना सम्भव नहीं, अतः वाक्यशेष द्वारा बताया हुआ अभ्युदय या निःश्रेयस फल ही मानना होगा, वही पुरुषार्थ है।

सञ्ज्ञास्ति' इत्यनेन ब्राह्मणेन भूतचैतन्यमुक्तमित्याशङ्क्यते, तत् स्वयमेव ब्राह्मणेनात्रैव 'मा भगवन् मोहान्तं प्रापितवान् पूर्वमजरामृतत्वमभिधाय, अधुना विनाशीत्यभिधानात्' इति पूर्वपक्षं चोद्याख्यमुक्त्वा सिद्धान्तपरिहार उक्तः। 'अविनाशी वा अरेऽयमात्मा अनुच्छित्तिधर्मा' इत्युक्त्वा, कथं तर्हि विनाशवचनमित्याशङ्क्य 'मात्रासंसर्गस्त्वस्यभवति' इत्युक्तम्। मात्राशब्देन भूतेन्द्रियाणि धर्माधर्मौ च विकारशब्दवाच्या उच्यन्ते।

एतदुक्तं भवति—विज्ञानघनशब्देन ज्ञानशक्तिस्वभावस्यात्मनोऽभिधानम्, स ह्येतेभ्यो भूतेभ्यः समुत्थाय = मुक्तो भूत्वा तान्येवानुविनश्यति = भूतविनाशात् सोपि विनष्ट इव भवतीति, भूतस्थो ह्यसौ स्वयं प्रत्यक्षेण गृह्यते, परैश्च शरीरचेष्टालिङ्गकेनानुमानेन। मुक्तस्तु प्रमाणपथातिवर्तनाद्विनष्ट इव भवतीति विनश्यतीत्युच्यते। तदनेन प्रकारेण मात्राणामेव विनाश इत्युच्यते, नात्मन इत्यविरोधः।

तदुक्तम्—'अविनाशी स्वरूपेण पुरुषो या तु नाशिता।
मात्राणां साधिकाराणां, भूतादीनामसंज्ञिता'[1] ॥ इति।

नन्वयं दोषो यदसतिबाधके भ्रान्तित्वम्, प्रत्यभिज्ञायां वा कः पक्षपातो येन सा भ्रान्तिर्न स्यात्? अयमस्ति पक्षपातः—न ह्यसम्भवति तद्भ्रान्तित्वे भ्रान्तित्वमङ्गीकर्तुं युक्तम्। नानादेशोपलब्धेस्त्वपरिहार्यं भ्रान्तित्वम्। अनित्यत्वपक्षेऽपि श्रोत्रगत एव शब्दः[2] परमार्थतो गृह्यते, श्रोत्रस्य प्राप्यकारित्वात्। न च वक्तृमुखगतः, येन तद्देशग्रहणस्याऽभ्रान्तित्वं स्यात्।

शब्दप्रत्यक्षे बौद्धमतखण्डनम्

यदपि सौगतोऽप्यप्राप्यकारित्वमेवाङ्गीकुर्वन्नभ्रान्तित्वं समर्थयते, तदयुक्तम्—'अप्राप्यकारित्वे हि संनिकृष्टविप्रकृष्टस्थितौ युगपच्छब्दमुपलभेयाताम्, तयोस्तु क्रमेणोपलब्धिर्न कथंचिदप्यप्राप्यकारित्वे समर्थयितुं शक्या।

ग्रहण न होनेसे, तथा दिशा-विशिष्ट शब्द स्वरूपका और ध्वनि उत्पत्ति देशोंके ग्रहणसे इन तीनोंके संसर्ग भ्रमसे इस प्रकारका ज्ञान होता है कि पूर्व दिशामें इतनी दूरमें यह शब्द है। अतः अभिव्यंजक देशके भेदसे नित्य शब्दकी भी अनेक देशोंमें उपलब्धि सिद्ध होती है। इसलिए कोई दोष नहीं।

शंका—बिना बाधक ज्ञानके भ्रान्तिका होना यह दोष है। तब प्रत्यभिज्ञामें क्यों पक्षपात है कि उसे भ्रान्ति नहीं मानते? (अर्थात् एक शब्दके अनेक देशोंमें उपलब्ध होनेको आप भ्रम कहते हैं, 'सोऽयं गकारः' इस प्रत्यभिज्ञाको आप भ्रम नहीं मानते, इसका क्या कारण है? यह भी तो दोष है।)

उत्तर—यह पक्षपात है कि बिना भ्रमके भ्रान्तिको मानना युक्त नहीं। (अर्थात् शब्दका प्रत्यभिज्ञामें बाध नहीं है, इसलिए वह भ्रम नहीं) नाना देशोपलब्धिको तो भ्रान्ति मानना अनिवार्य है। अनित्यत्व पक्षमें भी श्रोत्र गत ही शब्द परमार्थतः गृहीत होता है) श्रोत्रेन्द्रियके प्राप्यकारि होनेसे वक्ताके मुखमें होनेवाले शब्दका ग्रहण नहीं होता, जिससे उस देशका ग्रहण भ्रम न माना जाय (अतः शब्दकी नाना देशोमें उपलब्धि भ्रम नहीं है)।

शंका—(यदि इन्द्रियां प्राप्यकारी हैं तो श्रोत्र देशमें रहनेवाले शब्दका ग्राह्य जो ध्वनिदेश है, उससे सम्बन्ध न होनेसे इस दिशामें यह शब्द है, यह सम्बन्धकी प्रतीति भ्रान्ति हो सकती है, पर ऐसा तो नहीं है) बौद्ध भी इन्द्रियको अप्राप्यकारी मानते हैं, अतः यह भ्रान्ति नहीं है, ऐसा बौद्ध समर्थन करते हैं*।

उत्तर—यह पक्ष ठीक नहीं, अप्राप्यकारिता पक्षमें समीप और दूरस्थित पुरुष एक ही समयमें शब्दको ग्रहण करते। अप्राप्य कारिता पक्षमें क्रमशः उन दोनोंको शब्दकी उपलब्धिका समर्थन

---

* अर्थात् यदि बाह्य वस्तु होती तो उससे इन्द्रिय—सम्बन्ध भी स्थापित हो सकता था, जब बाह्य है ही नहीं तो किससे सम्बन्ध होगा? अतः शब्द तथा ध्वनि देशका सम्बन्धग्रह भ्रम नहीं है।

---

१. तयोरिति 'क' 'ग' पुस्तकयोः पाठः।

२. शब्द इति 'क' 'ग' पुस्तकयोर्नास्ति।

किं च क्षणिको वा शब्दः स्यात् स्थायी वा ? यदि क्षणिकः ? ततः प्रत्यासन्नै-र्गृहीतमात्रो नष्टः कथं विप्रकृष्टैः पश्चाद् ग्रहीतुं क्षमः। स्थायित्वं तु सौगतानामनभिमत-मेव। स्थायित्वे च प्रत्यासन्नानां शब्दश्रवणं चिरकालमनुवर्तेत। तस्मादप्राप्यकारित्वा-संभवादवर्जनीयं नानादेशोपलब्धेर्भ्रान्तित्वम्। अस्यानुत्पन्नत्वपक्षे[1] तु ध्वनीनां क्रमेणास-न्नदूरगमनाद् गत्वरत्वेन चैकस्मिन् श्रोत्रे चिरमनवस्थानादुपपन्ना क्रमेणशब्दोपलब्धिः[2], चिरकालाननुवृत्तिश्च। तस्मान्नैकान्ततस्तावदनित्यत्वम्।

अर्थप्रतीत्यनुपपत्त्या[3] तु नित्यत्वमेव युक्तम्, न हि प्रत्युच्चारणमन्यस्याऽन्यस्य क्रियमाणस्यार्थप्रत्यायकत्वं सम्भवति, संबन्धग्रहणासंभवादगृहीतसंबन्धस्य चाऽप्रत्यायक-त्वात्। न चान्यस्मिन गृहीतसंबन्धेऽन्यस्य प्रत्यायकत्वं संभवति, न हि गोशब्दे गृहीत-संबन्धेऽश्वशब्दः प्रत्याययति।

नहीं कर सकते§।

इसी पक्षमें दूसरा दोष देते हैं 'किंच' से। और सुनिए—शब्द क्षणिक है या स्थाई है ? ये दो विकल्प हैं। इनमें प्रथम पक्ष ठीक नहीं। यदि शब्दको क्षणिक माना जाए तो समीप रहने वालोंसे गृहीत मात्र ही नष्ट हुआ शब्द, बादमें दूरस्थ लोगों द्वारा ग्रहण करने योग्य नहीं हो सकता। यदि दूसरा पक्ष मानें तो यह बौद्धोंको स्वीकार नहीं, क्योंकि वे सबको क्षणिक मानते हैं। और स्थायित्व पक्षमें समीपमें रहनेवालोंको चिरकाल पर्यन्त निरन्तर शब्द सुनाई देता रहेगा। उक्त अर्थका उपसंहार करते हैं 'तस्मात्' इत्यादिसे। इसलिए प्राप्यकारिताके असम्भव होनेसे अवश्य ही अनेक देशोंमें शब्दकी उपलब्धि भ्रम है। पर पक्षमें दोष देकर, अपने पक्षमें युक्ति देते हैं 'अस्मत्पक्षे तु' इत्यादिसे। सिद्धान्त पक्षमें तो ध्वनियोंके समीप देश तथा दूर देशमें क्रमशः जानेसे, तथा विनाशी होनेसे एक ही श्रोत्रमें बहुत देर तक रहना सम्भव नहीं। अतः क्रमसे शब्दकी उपलब्धि तथा चिरकालतक न रहना युक्ति संगत है। इसलिए नियमसे शब्दकी अनित्यता नहीं होती; किन्तु वक्ष्यमाण रीतिसे नित्यता ही युक्त है।

(अब शब्दकी नित्यता सिद्ध करते हैं 'अर्थ' इत्यादिसे। शब्द श्रवणके अनन्तर अर्थ-प्रतीति होती है। यदि शब्द अनित्य होता तो उसके अनन्तर अर्थ प्रतीति नहीं होनी चाहिए थी, अतः) अर्थ प्रतीतिकी अन्यथा अनुपपत्तिसे शब्दका नित्य होना ही युक्त है। प्रत्येक उच्चारणमें जो नए-नए शब्द उत्पन्न होते हैं, सम्बन्ध ग्रहके न होनेसे, उनकी अर्थ बोधकता सम्भव नहीं। और अगृहीत शक्तिक शब्द अर्थका बोधक नहीं हो सकता।

---

§ यहां श्रोत्रेन्द्रियको प्राप्यकारि मानना होगा। प्राप्यकारिता स्वीकार करनेपर श्रोत्र देशमें होनेवाले शब्दको प्रत्यक्ष कहना होगा। श्रोत्रका ध्वनि देशमें गमन सम्भव नहीं। श्रोत्र देशमें विद्यमान शब्दका ध्वनि देशके साथ सम्बन्ध न होनेपर भी श्रोत्र देशस्थ शब्द और ध्वनि देशका जो सम्बन्ध है, उसकी प्रतीति भ्रम है यह सिद्ध हुआ। इसी अर्थको वार्तिककारने स्पष्ट किया है। यथा—'तत्र दूरसमीपस्थग्रहणाग्रहणे समे। स्यातां न च क्रमो नापि तीव्रमन्दादिसम्भवः॥इति॥

---

१. 'अस्मत्पक्षेतु' इति 'ख' पुस्तके पाठः। २. क्रमेणोपलब्धिरिति 'क' 'ग' पुस्तकयोः पाठः।
३. अर्थप्रतिपत्त्यनुपपत्या, अर्थानुपपत्या, इति च पुस्तकान्तरपाठः।

सत्यम्—असदृशो हि न प्रत्याययति, यस्त्वन्योपि गृहीतसम्बन्धेनार्थवता शब्देन सदृशः शब्दः, स प्रत्याययतीति चेत् ? न, तदसम्भवात्। नहि कश्चिदपि मुख्योर्थवान् सम्भवति, सर्वेषां तुल्यत्वेन सम्बन्धाऽग्रहणात् । न हि द्विस्त्रिर्वाऽनुपलब्धस्य सम्बन्धग्रहणं सम्भवति, अन्वयव्यतिरेकाऽभावात्।

शंका—दूसरे शब्दका शक्तिग्रह हुआ, दूसरा शब्द अर्थका प्रत्यायक हो, यह सम्भव नहीं । इसीको व्यतिरेक मुखसे बताते हैं 'न हि' इत्यादिसे । गो शब्दका शक्तिग्रह होनेपर अश्व शब्द अर्थका प्रत्यायक नहीं होता । उत्तर—ठीक है, असदृश = विजातीय शब्द अर्थका प्रत्यायक नहीं होता यथा अश्व शब्द गोरूप अर्थका प्रत्यायक नहीं होता । जो शब्द गृहीत सम्बन्ध है तथा अर्थवान् है, जो उस शब्दके सदृश है, वह अर्थका प्रत्यायक होता है, ऐसा नहीं कह सकते, उसके असम्भव होनेसे । इस पक्षमें कोई शब्द मुख्य अर्थवान् नहीं होता । सम्बन्धका ग्रहण न होनेसे । यह सभीके लिए समान है। शक्तिग्रहमें यह नियम नहीं है कि दो या तीन बार अज्ञान सम्बन्धका अन्वय-व्यतिरेक न होनेसे, शक्ति सम्बन्ध गृहीत नहीं होता❀ ।

['प्रकृतिविकृत्योश्च' इस सूत्रसे इकारके स्थानपर यकार होता है। जो यकारके रूपसे विकारको प्राप्त करती है इकार, वह अनित्य है; यह कहा गया है। इसका परिहार करनेवाला सूत्र है—'वर्णान्तरमविकारः ॥ १६ ॥ अर्थ = (इकारका यकार विकार है, यह जो कहा गया है, वह) वर्णान्तरम् = दूसरा वर्ण है, अविकारः = विकार नहीं है; ॥ १६ ॥ (पूर्व पक्षीके मतमें शब्द गुण है । सिद्धान्तमें द्रव्य और विभु है; उसका विकार तो होता नहीं, अतः यह अनित्यताका प्रयोजक नहीं । और व्याकरण शास्त्र नियम रूप है, अपूर्व रूप नहीं ।)

पूर्वपक्षका सूत्र है 'वृद्धिश्च कर्तृभूम्नाऽस्य' इसका परिहार करनेवाला सूत्र है 'नादवृद्धिपरा' ॥ १७ ॥ अर्थ = (शब्दकी जो) वृद्धि कही गई है, वह संयोग—विभागरूप जो नाद = ध्वनि है, उसीकी वृद्धि है, परा = उसीमें इसका तात्पर्य है (शब्दमें नहीं) निरवयव होनेसे । अर्थात् अनेक वक्ताओं द्वारा गकारका उच्चारण होनेपर संयोग—विभागरूप नाद उत्पन्न होते हैं। वे पृथक्-पृथक् शब्दको व्यक्त करते हुए, स्वगत वृद्धिका शब्दमें आरोप करके, शब्दमें महत्व व्यवहारको उत्पन्न करते हैं; अतः ध्वनिकी वृद्धि है शब्दकी नहीं । भाष्यकारने भी इसी अर्थको कहा है—'वायवीयाः संयोगविभागा नैरन्तर्येण क्रियमाणाः शब्दमभिव्यञ्जयन्तो नादशब्दवाच्याः । तेन नादस्यैषा वृद्धिर्न शब्दस्य' इति ॥

वार्तिककारने दृष्टान्त देकर इसे और भी पुष्ट किया है—

वर्णोऽनवयवत्वात्तु वृद्धिह्रासौ न गच्छति । व्योमादिवदतो सिद्धा वृद्धिरस्य स्वरूपतः ॥ इति ॥

इस प्रकार छः सूत्रोंसे परपक्षका निराकरणकर, उतने मात्रसे अपना सिद्धान्त स्थिर नहीं होता, यह समझकर, महर्षि जैमिनिने सूत्रका उपन्यास किया = 'नित्यस्तु स्याद्दर्शनस्य परार्थत्वात्' ॥ १८ ॥ यह सिद्धान्त सूत्र है । तु शब्द पूर्व पक्षका व्यावर्तक है । शब्द पद पूर्व प्रकरणसे अनुवृत्त है । इसका अर्थ हुआ = नित्यः = शब्द नित्य है । (इसमें हेतु है =) दर्शनस्य परार्थत्वात् = दृश्यते

❀ अर्थात् शब्दका श्रवण होनेपर अर्थ प्रतोति होती है । शब्द श्रवणके अभावमें अर्थ प्रतीति नहीं होती; यही अन्वय-व्यतिरेक शक्ति ग्रहका निश्चायक है । नहीं तो शक्ति ग्रह नहीं होता ।

शब्दानित्यत्वपूर्वपक्षस्तत्खण्डनञ्च

अथ व्युत्पत्तिसमये सदृशेषु शब्देषु द्वित्रेषूपलब्धेषु पश्चाच्छ्रूयमाणः संबन्धग्रहणं लब्ध्वाऽर्थवान् भवति, तदुत्तरकालास्तत्साहश्यात प्रत्याययन्तीत्युच्यते। तद्युक्तम्, य एवोपलब्धशब्दान्तरेण पश्चाच्छ्रूयमाणोऽर्थवान् निरूप्यते स एवाश्रुतशब्दान्तराणां पुरुषाणां प्रथमश्रुतोऽनर्थक इति विरोधापत्तेः।

तदुक्तम्—'अप्रतीतान्यशब्दानां तत्कालेऽसावनर्थकः।
स एवान्यश्रुतीनां स्यादर्थवानितिविस्मयः''[1] ॥ इति।

अथाऽर्थवानेवायम्, अप्रतीतान्यशब्दास्त्वन्वयव्यतिरेकवैकल्यादर्थवत्त्वं न जानन्तीत्युच्यते? तथा सति तदुत्तरकालानामपि शब्दानामेवमर्थवत्त्वसम्भवात् किमिति साहश्येन प्रत्यायकत्वम्। तदुक्तम्—'अथाऽस्य विद्यमानोपि' इत्यादिना।

शब्दः अनेनेति दर्शनम् = इस व्युत्पत्तिसे दर्शन शब्द उच्चारण परक है। परार्थत्वात् = उच्चारण परार्थ होता है; अतः परार्थ पद अर्थ प्रत्यायनके लिए है। अर्थात् यदि उच्चारण मात्रसे शब्द नष्ट होता तो अर्थ ज्ञानके लिए शब्दका उच्चारण न होता। क्योंकि शक्ति ग्रह न होनेसे शब्द अर्थका बोधक नहीं होता। इसलिए जितने शब्द हैं, वे सब नए नए होंगे। उनसे अर्थबोध नहीं होगा। अर्थ प्रतीति तो होती है। अतः शब्द नित्य है। यहां अर्थापत्ति विपक्षित है; अनुमान नहीं। इससे यह जो नैयायिक दोष देते हैं, कि परार्थत्व दर्शनका धर्म है, शब्दका धर्म नहीं, यह पक्षवृत्ति न होनेसे अनुमान नहीं बन सकता। अतः कहा भी है—

अनुमानप्रयोगे हि वक्तुमित्यादि युज्यते। अर्थापत्तिरियं चोक्ता पक्षधर्मादिवर्जिता ॥
सम्बन्धदर्शनं चास्य नानित्यस्योपपद्यते। सम्बन्धज्ञानसिद्धिश्चेद्ध्रुवं कालान्तरेऽस्थितिः ॥इति।]

शंका—यदि कहा जाए शक्ति-ग्रहके समय सजातीय दो-तीन शब्दोंके उपलब्ध होनेसे बादमें सुनाई देने वाला शब्द शक्तिग्रहको प्राप्तकर, अर्थवान् होता है और उसके बाद होने वाले शब्द अर्थवत् शब्दोंके साहश्यको लेकर, अर्थके प्रत्यायक होते हैं।

उत्तर—यह ठीक नहीं, क्योंकि जो उपलब्ध दूसरे शब्दोंके साहश्यसे बादमें सुनाई देने वाला शब्द अर्थवान् कहलाता है, वही शब्द जिन पुरुषोंनें और शब्दोंको नहीं सुना है उनके लिए प्रथम वार सुना हुआ शब्द निरर्थक हो जाएगा; यह विरोध रूप आपत्ति होगी। इसी बातको वार्तिकारने बताया है। (वार्तिक ऊपर देखिए) अर्थ = जिनसे दूसरे शब्द सुने नहीं गए हैं, ऐसे लोगोंके लिए उस समय वह शब्द अनर्थक होता है। वही शब्द अन्य शब्दोंमें अर्थवान् होता है। यह कितने आश्चर्यकी बात है ॥

शंका—यदि कहा जाए वह शब्द अर्थवान् होकर ही, अप्रतीत अन्य शब्द हैं जिनको, अर्थात् जिन्होंने अन्य शब्दोंको नहीं सुना है, वे पुरुष अन्वय-व्यतिरेक न होनेसे अर्थवत्ताको नहीं जान पाते हैं। उत्तर—वैसा होने पर उनके उत्तर कालके शब्दोंकी भी अर्थवत्ताके सम्भव न होनेसे साहश्यके द्वारा अर्थ बोधकता क्यों मानी जाए? इसलिए वार्तिककारने कहा है 'यदि कहाजाए उसके रहने पर भी अन्य शब्दोंकी तरह बोधकता नहीं रहती, अतः यह शब्दका भी मुख्य अर्थ होना युक्त है'। शब्द शाहश्यको लेकर वाचकत्व क्यों होगा? अर्थात् नहीं होगा।

---

१. श्लोकवा० शब्दनि०, का० २५०।

अथोत्तरकालस्य शब्दस्य कांश्चिदगृहीतसम्बन्धान् प्रत्यप्रत्यायकत्वादानर्थक्यमेवाश्रीयते, ततो योऽसावर्थवत्त्वेनाभिमतः शब्दः, यत्सादृश्यादुत्तरेषां प्रत्यायकत्वम्, सोपि केषांचिदप्रत्यायक इत्यनर्थक एवेति सर्वेषामानर्थक्यं स्यात्। तदुक्तम्—'अनर्थकत्वमस्य स्यात्' इत्यादिना।

किं च व्युत्पत्तिकालवर्ती शब्दोऽर्थवान्, उत्तरे तु व्यवहारकालवर्तिनस्तत्सादृश्यात् प्रत्याययन्तीतिब्रुवाणस्य विरुद्धमापद्यते—य एव हि केषांचिद् व्युत्पत्तिकालवर्ती स एवान्येषां व्यवहारानुपातीत्येकस्यैवार्थवत्वं मुख्यम्, तत्सादृश्याद् गौणमिति विरोधः। तदुक्तम्—'अर्थवत्सदृशत्वेन' इति, तस्मान्न सादृश्येन प्रत्यायकत्वमित्येकत्वमेव शब्दस्याश्रयितव्यम्।

अथ गत्वादिसामान्यमेकमाश्रित्य वाचकत्वं समर्थ्येत ? तन्न, तदभावात्—व्यक्तिभेदे हि सामान्यमात्मानं लभते नान्यथा।

शंका—यदि मानाजाए उत्तर कालीन शब्दके सम्बन्धको जिन्होंने ग्रहण नहीं किया, ऐसे पुरुषोंके प्रति शब्दके अर्थ-प्रत्यायक न होनेसे यदि उसे अनर्थक हो मानते हैं, तो ? उत्तर—तब जो अर्थवत्वेन अभिमत शब्द है, जिसके सादृश्यसे उत्तर कालीन शब्दोंको भी प्रत्यायकता आपको दृष्ट है, वह शब्द भी कुछ लोगोंके लिए अर्थ बोधक नहीं होता, अतः वह सबके लिए अनर्थक ही है। इस प्रकार सभी शब्दोंकी अनर्थकता हो जाएगी। उक्त अर्थका प्रतिपादक वार्तिक है। अर्थ = उस शब्दको जिसने नहीं सुना है, उसके प्रति वह अनर्थक है। अर्थात् अर्थवान् नहीं होगा। इसी प्रकार उसके पूर्व शब्दोंके भी सादृश्य होनेसे अर्थ-प्रत्यायकता नहीं होगी, अतः सभी शब्दोंकी अनर्थकता हो जाएगी*।

और सुनिए शक्तिग्रह कालमें विद्यमान गो शब्द किसी पुरुषके प्रति अर्थवान् होता है, उत्तर कालीन शब्द व्यवहार कालमें रहकर और लोगोंके लिए पूर्व शब्दोंके समान गौण अर्थका बोधक होता है, ऐसा कहने वालोंके लिए यह विरोध आता है, कि जो शब्द कुछ लोगोंके लिए शक्तिग्रहकालमें मुख्य रहता है, वही अन्य लोगोंके लिए व्यवहार कालमें गौण होता है; अतः एक ही शब्दकी अर्थवत्ता मुख्य है। उसके सादृश्यसे अन्यत्र गौण है यह विरोध है। जैसेकि वार्तिकमें कहा गया है 'अर्थवत्' इत्यादि§। प्रायशः इस वार्तिककी ग्रन्थकारने ही व्याख्याकी है। अतः सादृश्यसे शब्दकी बोधकता नहीं हो सकती। इससे शब्दको एक ही मानना चाहिए।

शंका—यदि कहा जाए शब्दका भेद होने पर भी गत्वादि सामान्य एकको मानर, वाचकताका समर्थन किया जाए ? उत्तर—यह नहीं हो सकता, गत्वादि सामान्यका अभाव होनेसे। (इसका निरास स्फोटवाद प्रकरणमें कर चुके हैं) शंका—बताइए सामान्य कहां माना जाए ? उत्तर—व्यक्तियोंके भेदसे सामान्य सिद्ध होता है, अन्यथा नहीं। (अर्थात् गकारादि व्यक्तियोंका भेद तो है न हीं। विवेकके अग्रहणसे प्रत्यभिज्ञारूप प्रत्यक्षके द्वारा गकारादि व्यक्तिकी एकता ही मालूम पड़ती है। भेदज्ञात नहीं होता, इसलिए गत्वादि सामान्य नहीं है)

---

* पूरी कारिका इस प्रकार है—

अनर्थकत्वमस्यस्यादथानन्यश्रुतीन्प्रति। पूर्वस्मिन्नपितत्सत्वात्सर्वानर्थकताभवेत ॥

§ अर्थवत्सदृशत्वेन यो वा श्रुतवतां मतः। मुख्योऽसावश्रुतीनां स्यात् तदेकत्वेन युज्यते ॥

शालिकनाथमतस्य निरासः

कश्चित् पुनराह—सत्यपि व्यक्तिभेदे निष्प्रमाणकमेव सामान्यम्। यत्र हि भेदावगतौ सत्यामेवाऽभेदावगतिः, तत्र सामान्यम्। इह तु सन्नपि व्यक्तिभेदो नावगम्यते। अतोऽत्र विवेकाग्रहणादेव प्रत्यभिज्ञा भ्रान्तिरूपा नालं सामान्यं साधयितुमिति।

तत्त्वयुक्तम्—सति हि व्यक्तिभेदे कथमन्तरेण सामान्यं प्रत्यभिज्ञा स्यात्। विवेकाग्रहणादिति चेत्? कोयं विवेकाग्रहो नाम? ह्यस्तनाद्गकाराद्यतनस्य गकारस्य यद् व्यावृत्तं रूपं तन्न गृह्यते इत्यर्थः। किं तर्हि गृह्यते? अद्योच्चारितेपि गकारेऽवश्यं किं चिद्रूपं गृह्यते। व्यावृत्तं चेन्न गृह्यते, व्यक्तमनुवृत्तग्रहणम्। अनुवृत्तं च सामान्यमित्युच्यते। तस्मात् सिध्यति सामान्यम्। न च सादृश्यादेव प्रत्यभिज्ञासिद्धेरलं सामान्येनेति वक्तव्यम्, अवयवसामान्ययोगात्मकत्वात् सादृश्यस्य, वर्णानां चाऽनवयवत्वात्।

ननु सम्बन्धिसामान्यमात्रं सादृश्यम्, अतोऽनवयवानामपि ताल्वादिस्थानसामान्यं सादृश्यं भविष्यति? न, अश्रावणत्वात्, श्रवणजन्या हीयं प्रत्यभिज्ञा, तदस्याः श्रवणग्राह्य मेवालम्बनं वक्तव्यम्। न च ताल्वादिसामान्यं श्रावणम्, अतो गत्वादिसामान्यनिबन्धनेयं प्रत्यभिज्ञा सिध्यति। एवं सति व्यक्तिभेदे सामान्यम्, तदभावात्तु नास्ति सामान्यमित्येव वक्तव्यम्। अतः सिद्धं प्रत्यभिज्ञया शब्दस्य नित्यत्वम्।

शंका—कोई (प्राभाकर मातानुयायी शालिकनाथ मिश्र) शंका करते हैं—व्यक्ति भेद होनेपर भी सामान्यको नहीं मान सकते, अतः वह निष्प्रमाणक है। जहां भेदका ज्ञान होने पर अभेदका भी ज्ञान होता है, वहां सामान्य माना जाता है। प्रकृतमें विद्यमान भी व्यक्ति भेद ज्ञात नहीं होता। अतः इसमें विवेकके अग्रहणसे जो प्रत्यभिज्ञा होती है, वह भ्रमरूप है, इसलिए प्रत्यभिज्ञा सामान्यको सिद्ध नहीं कर सकती। उत्तर—यह कहना भी ठीक नहीं, व्यक्ति भेद होने पर, जातिके विना प्रत्यभिज्ञा कैसे होगी? (व्यक्तिके एक होनेसे प्रत्यभिज्ञा नहीं है, किन्तु) विवेकाग्रहसे ही प्रत्यभिज्ञा होती है, यदि ऐसा कहें? यह विवेकाग्रह क्या वस्तु है? कलके गकासे आजके गकारका कोई पृथक् रूप गृहीत नहीं होता, यही विवेकाग्रह है। शंका—तब क्या गृहीत होता है? उत्तर—आज उच्चारित गकारमें अवश्य ही कुछ रूप गृहीत होता है। यदि भिन्न रूपका ग्रहण नहीं होता तो अनुवृत्तका ग्रहण होता है, यह स्पष्ट है। अनुगत रूप ही सामान्य कहा जाता है, अतः सामान्य सिद्ध होता है। शंका—सादृश्यसे ही प्रत्यभिज्ञा सिद्ध होती है, सामान्यकी आवश्यकता नहीं। उत्तर—अवयव सामान्यका योग ही सादृश्य कहलाता है। वर्ण तो निरवयव हैं (उनका सादृश्य कैसे होगा? अतः सादृश्यको लेकर प्रत्यभिज्ञाको सिद्धि नहीं हो सकती, इसलिए सामान्यको मानना चाहिए)

शंका—यदि कहा जाए सम्बन्धि सामान्य ही सादृश्य है, अवयव सामान्यका योग नहीं, अतः वयव रहित वर्णोंका ताल्वादि स्थानोंका सामान्य ही सादृश्य हो सकता है। उत्तर—नहीं, श्रवणका विषय न होनेसे, श्रवणेन्द्रियसे 'सोऽयं गकारः' यह प्रत्यभिज्ञा होती है। अतः उसका श्रवणेन्द्रिय ग्राह्य ही आलम्बन कहना होगा। ताल्वादि स्थान सामान्य, श्रवणेन्द्रिय ग्राह्य नहीं हैं, अतः गत्वादि सामान्यको लेकर ही प्रत्यभिज्ञा सिद्ध होती है। उक्त प्रकारसे व्यक्ति भेदके सिद्ध

प्रत्यभिज्ञायाः प्रामाण्यस्थापनम्

कि पुनरिदं प्रत्यभिज्ञाख्यं प्रमाणम् ? प्रत्यक्षमिति ब्रूमः। पूर्वानुभवजनितसंस्कार-सध्रीचीनेन्द्रियजन्यत्वाद् ग्रहणस्मरणरूपमिदमेकं ज्ञानम्। तत्र पूर्वानुभूतोंऽशः स्मर्यते, स्मर्यमाणेन तु तेन सहैकत्वविशिष्टं वर्तमानं रूपं प्रत्यभिज्ञया प्रत्यक्षेण गृह्यत इति वेदितव्यम्। तस्मान्नित्यः शब्दः। प्रदीपे तु प्रभामण्डलस्याऽवयवविश्लेषमन्तरेणा-ऽत्यन्तानुपपत्तेर्विश्लिष्टावयवस्य चाऽवयविनोऽवश्यम्भावी विनाशः, विनष्टे च पूर्वस्मिन् प्रदीपे पश्चात्तनमवश्यं प्रदीपान्तरमेव भवति। दृढे च भेदे प्रत्यभिज्ञा सादृश्यनिमित्तेति कल्प्यते। शब्दे तु न किं चिद्भेदे प्रमाणमस्तीति विशेषः।

क्षणभंगवादेन पूर्वपक्षः

ननु सर्वभावानां क्षणिकत्वात् कथं शब्दस्य नित्यता ? किं पुनः सर्वक्षणिकत्वे प्रमाणम् ? प्रत्यक्षं तावत् तत्कालसत्तां बोधयति, न कालान्तरनिषेधं करोति।

होनेपर, सामान्य सिद्ध होता है। उसके अभावमें सामान्य है ही नहीं, यही कहना होगा। इस प्रकार प्रत्यभिज्ञासे शब्दका नित्यत्व सिद्ध हुआ।

शंका—आपने शब्दकी नित्यतामें प्रत्यभिज्ञाको प्रमाण माना है ? प्रत्यभिज्ञा प्रमाणका क्या स्वरूप है ? उत्तर—यह प्रत्यक्ष है। पूर्वानुभवसे संस्कार होते हैं। उनके सहित इन्द्रियके द्वारा यह ज्ञान उत्पन्न हुआ। यह ज्ञान एक है। इसमें दो अंश हैं एक ग्रहण है, दूसरा स्मरण। इन दोनोमें पूर्वमें अनुभूत अंशका स्मरण होता है। स्मृतिके विषयके साथ एकत्व विशिष्ट जो वर्तमान रूप है, वही प्रत्यभिज्ञाका रूप प्रत्यक्षसे गृहीत होता है, यह समझना चाहिए। इसलिए शब्द नित्य है*।

(शंका—प्रदीपमें भी वही यह दीप है, ऐसी प्रत्यभिज्ञा होती है। उससे दीपकी भी नित्यता सिद्ध होगी ? उत्तर—नहीं) प्रदीपमें प्रभा मण्डलके अवयव विभागके बिना सर्वथा उपपत्ति न होनेसे विभक्त अवयवोंवाले अवयवीका विनाश होना अवश्यम्भावी है। पूर्व प्रदीपके नष्ट होनेपर, बादमें होनेवाला प्रदीप तो अवश्य ही दूसरा प्रदीप होता है। इस प्रकार भेदके स्पष्ट होनेसे प्रत्यभिज्ञा सादृश्यको लेकर होती है, ऐसी कल्पनाकी जाती है। (अर्थात् प्रदीपमें प्रत्यक्ष ही भेद ग्राहक प्रमाण है, अतः यहाँ उपर्युक्त दोष नहीं) शब्दके भिन्न होनेमें तो कोई प्रमाण नहीं, यह दोनोंका वैषम्य है।

शंका—सभी पदार्थ क्षणिक होते हैं। सबमें शब्द भी तो आता है। वह भी क्षणिक है। उसकी नित्यता कैसे होगी ? पुनः शंका—सभी पदार्थोंके क्षणिक होनेमें क्या प्रमाण है ? प्रत्यक्ष है, यह तो कह नहीं सकते, क्योंकि प्रत्यक्ष तो उस कालकी सत्ताका बोधन कराता है। कालान्तरमें सत्ताका निषेध नहीं करता। इसीको दृष्टान्त द्वारा स्पष्ट करते हैं—जैसे यह नील है, ऐसा

* यहां ग्रन्थकारने प्रत्यभिज्ञाका प्रत्यक्ष-प्रमाणमें अन्तर्भाव किया है। इस अंशमें नैयायिक तथा मीमांसकका मतैक्य है। जैसेकि 'अत्रोच्यते। एकमेवेदं विज्ञानं प्रत्यभिज्ञासमाख्यानम्।..........
..................तस्मात्तत्तेदन्तास्पदस्य पद्मरागस्य तदवभासिनोऽनुभवस्य चैकत्वमनुभवाद्वा अनुमानाद्वा तदवभासलक्षणफलाऽभेदजन्मनः सिद्धम्'।

दृष्टव्य-न्यायकणिका-टीका, पृ० १२५।

नीलप्रत्यक्षमिव न पीतिमानं निषेधति। दृश्यादर्शनेन तु तस्य निषेधः। न च संप्राप्त कालान्तरं दृश्यम्, येन दृश्यादर्शनात् तन्निषेधः स्यात्। न चान्यदपि प्रमाणं पश्यामः।

पश्यामः—स्वभावहेतुकं प्रमाणं सत्तामात्रानुबन्धिसाध्यविषयत्वादिति। कथं पुनः सत्तामात्रानुबन्धसिद्धिः? क्षणिकतायाः विपक्षे बाधकप्रमाणप्रवृत्तेः। क्षणिकत्वविपक्षे ह्यक्षणिकत्वे व्यापकानुपलब्ध्या बाध्यमाना सत्ता क्षणिकत्वेन व्याप्यमाना तदनुमापयति।

किं पुनः सत्ताया व्यापकम्? क्रमाऽक्रमाविति ब्रूमः। तथा हि—अर्थक्रियाकारितैव सत्ता, नान्या। न हि स भावः[1] सत्तां लभते, यो न काञ्चिदर्थक्रियामारभते, यतः स्वज्ञानस्यापि सर्वे भावाः कारणम्। यदपि किंचिदज्ञायमानमपि सत्त्वेन सम्भाव्यते, तदपि सर्वज्ञविज्ञानं[2] प्रत्यालम्बनत्वादर्थक्रियाकारि, अर्थक्रियाकारितैव[3] सत्ता। यदेवार्थक्रियाकारि तदेव परमार्थसदिति। सा च क्रमयौगपद्याभ्यां व्याप्ता, न चाऽक्षणिकत्वे ते सम्भवतः। स्थायी हि पदार्थो न तावदर्थक्रियाः सर्वा युगपत्कर्तुमर्हति, तथा सति द्वितीये क्षणे कृत्याभावादर्थक्रियाकारित्वविरहादसल्लक्षणापत्तेः[4] क्षणिकत्वमेव

प्रत्यक्ष होता है, यह प्रत्यक्ष नीलको ही सिद्ध करता है, पीतका निषेध नहीं करता। सदृश्य पदार्थके अदर्शनसे ही उसका निषेध है, ऐसा नहीं कह सकते। अभी कालान्तर तो दृश्य नहीं है, जिससे दृश्यादर्शनके द्वारा उसका निषेध हो सके। पुनः शंका—प्रत्यक्ष न हो, दूसरा कोई प्रमाण हो? उत्तर—दूसरा प्रमाण नहीं देखते हैं।

स्वभाव हेतुक अनुमान ही इसमें प्रमाण है। जो साध्य क्षणिकत्व है, वह सत्ता मात्रका नियामक है। सद्वस्तुका स्वभाव ही है क्षणिक होना। क्योंकि यह नियम है—जो सत् है, क्षणिक होता है। उसीका प्रश्न पूर्वक उपपादन करते हैं—'कथं' इत्यादिसे। सत्ता मात्रसे व्याप्ति कैसे होगी? विपक्षमें क्षणिकत्वका बाधक प्रमाण प्रवृत्त होनेसे। क्षणिकत्वका विपक्षी अक्षणिकत्व है व्यापकानुब्धिसे बाधित जो सत्ता है, वह क्षणिकताकी व्याप्य होकर, उसका अनुमान कराती है। शंका—सत्ताका व्यापक कौन है? उत्तर—क्रम और अक्रम। इसीका 'तथाहि' से उपपादन करते हैं। अर्थक्रिया कारिता ही सत्ता है। (अर्थात् जो प्रयोजनको साधता है, वही सत् होता है दूसरा नहीं) वह पदार्थ सत्ताको कभी प्राप्त नहीं करता, जो कभी अर्थक्रियाको नहीं उत्पन्न करता। क्योंकि अपने ज्ञानके सभी पदार्थ कारण होते हैं। जो कुछ अज्ञात है, किन्तु सद्रूपसे सम्भावित है, वह भी सर्वज्ञके ज्ञानका आलम्बन होता है, अतः अर्थक्रियाकारी है। इसलिए अर्थक्रियाकारिता ही सत्ता है। जो अर्थक्रियाकारी है वही परमार्थ सत् है। वह सत्ता क्रम और यौगपद्यसे व्याप्त है। अक्षणिकता माननेपर उन दोनोंका होना सम्भव नहीं। स्थाई पदार्थ सभी अर्थक्रियायोंको एक कालमें नहीं कर सकता। ऐसा होनेपर दूसरे क्षणमें कोई कार्य न होनेसे अर्थक्रिया कारिताके अभावसे असल्लक्षण हो जाएगा। अतः क्षणिकता ही सिद्ध होगी। क्रम भी नहीं

१. स्वभाव इति 'ख' पुस्तके पाठः। २. सर्वंविज्ञानमिति 'क' 'ग' पुस्तकयोः पाठः।
३. तदर्थक्रियाकारितेति 'क' पुस्तके पाठः। ४. अतल्लक्षणापत्तेरिति 'ख' पुस्तके पाठः।

स्यात्। नापि क्रमः सम्भवति—स हि भावः सर्वार्थक्रियासमर्थः किमिति कांचिदेवारभते, नाऽन्याम्, समर्थस्य क्षेपायोगात्।

सहकार्यपेक्षया विलम्बत इति चेत्? न, सहकारिणो ह्यकिंचित्करा अनपेक्ष्याः। किंचित्कराश्चेत्? यत्तैः क्रियते, तदेव कार्यसाधनं स्यात्। तदनन्तरं कार्यनिष्पत्तेः। भावस्त्वकारणमेव[1] न स्यात्। न ह्यागन्तुकेऽतिशये कार्यमारभमाणे भावस्य कारणता सम्भवति, भिन्नत्वात्। अभेदे वा भावोपि तत्कालजन्मा क्षणिक एव स्यात्। भेदाऽभेदौ तु विरुद्धावेव, तस्मान्नाऽक्षणिकस्य सत्ता सम्भवतीति सिद्धं सन्मात्रानुबन्धित्वं क्षणिकतायाः।

क्षणभंगे युक्त्यन्तरवर्णनम्

किं च कृतकानां भावानामवश्यम्भावी विनाशः, तेनापि क्षणिकत्वं घटादीनाम्। तथाहि—'यद् येषां ध्रुवभावि न तत्र तेषां हेत्वन्तरापेक्षा। ध्रुवभावी च कृतकानां विनाश इति विरुद्धव्याप्तोपलब्धिः। ध्रुवभाविता हि निषिध्यमानहेत्वन्तरापेक्षित्वव्याप्ता, अग्न्युष्णत्वादिषूपलब्धा स्वव्यापकमनपेक्षत्वमुपस्थापयन्ती तद्विरुद्धं सापेक्षत्वं प्रतिक्षिपति।

बन सकता। वह स्थाई पदार्थ सभी अर्थक्रियाओंको करनेमें समर्थ हो तो, क्यों एक ही अर्थक्रिया को आरम्भ करता है? दूसरीको नहीं? समर्थको देर नहीं करनी चाहिए, (उसे तो सभी क्रियाएं एक साथ कर देनी चाहिएँ)

शंका—यदि कहें पदार्थ सभी अर्थक्रिया करनेमें समर्थ है, सहकारी कारणकी आकांक्षासे विलम्ब होता है? उत्तर—नहीं- सहकारी कारण अकिंचित्कर है? या किंचित्कर है? अर्थात् सहकारिसे कारणमें कोई अतिशय या उपकार होता है या नहीं होता? प्रथम पक्षमें उसकी अपेक्षा नहीं। दूसरे पक्षमें उन्हींसे अर्थक्रिया होगी। उसके अनन्तर कार्य होनेसे वही कार्यका साधन भी होगी। अर्थात् वही कारण हो जाएगी। आगन्तुक अतिशयसे कार्य होनेपर भाव=पदार्थको कारणता सम्भव नहीं, अतिशयसे भिन्न होनेसे। अभेद पक्षमें तो भाव=पदार्थ और उस कालमें उत्पन्न होनेवाला अतिशय दोनों भी क्षणिक ही होंगे। (अर्थात् एकरूपता होनेसे पदार्थ क्षणिक ही सिद्ध होगा) भेदाभेद तो परस्पर विरुद्ध हैं। जो क्षणिक नहीं है, उसकी सत्ता नहीं होती, अतः सिद्ध हुआ कि क्षणिकता सत्ता मात्रकी अनुबन्धिनी है।

क्षणिकतामें दूसरी युक्ति देते हैं 'किंच' से। जो भाव पदार्थ कार्य हैं, उनका विनाश अवश्यं भावी है। इससे भी घटादिको क्षणिकता सिद्ध होती है। इसीका 'तथाहि' से उपपादन करते हैं। जिन पदार्थोंका जो होना अवश्यं भावी है, उसमें उनको दूसरे कारणोंको अपेक्षा नहीं रहती। भाव कार्योंका विनाश अवश्यंभावी है, यह व्यापकविरुद्ध व्याप्तोपलब्धि है*। इससे व्याप्याभावका अनुमान होता है, यह अग्निकी उष्णतामें देखा गया है। अतः वह अपनी व्यापक अनपेक्षताका

---

* धर्मकीर्तिने अनुपलब्धिके ग्यारह भेद बतलाए हैं। उनमें पाँचवां प्रकार है विरुद्धव्याप्तोपलब्धि। उत्पन्न पदार्थका विनाश होना यह स्वभाव है। उसमें दूसरे हेतुको अपेक्षा नहीं होती। इसीको यहाँ ग्रन्थकारने बताया है। इसका विशेष विवेचन न्यायबिन्दु पृ० ३८ पर देखिए।

---

१. भावस्तत्कारणमेवस्यादिति 'क' पुस्तके पाठः।

अथ वा हेत्वन्तरापेक्षाणां वाससि रागादीनामध्रुवभावित्वव्याप्तेस्तद्विरुद्धं ध्रुवभावित्वं व्यापकविरुद्धोपलब्ध्या विनाशस्य हेत्वन्तरापेक्षां निवारयति। निरपेक्षश्च विनाशः स्वाभाविको जन्मानन्तरमेव भवतीति सिद्धः क्षणभङ्गः।

मुसलप्रहारादयस्तु विसदृशसन्तानहेतवः, न विनाशस्य। प्रतिपत्तारस्तु सदृशपराऽपरोत्पत्त्या क्षणानां भेदमलक्षयन्ततस्तत्त्वभ्रान्त्या विनाशमबुध्वा मुसलप्रहारानन्तरं विसदृशसन्तानदर्शिनस्तदैव विनाशं मन्यमाना मुसलादेर्विनाशहेतुतां मन्यन्ते। परमार्थतस्तु न केपि विनाशहेतवः, हेत्वन्तरजन्मा च विनाशो न तावद् भावादभिन्नो भवितुमर्हति, हेतुभेदात्। भिन्नत्वे तु तस्मिन् जातेपि भावस्य पूर्ववदुपलब्धिः स्यात्। पटजन्मनि घटवत्। तस्मात् स्वहेतुत एव भावा विनाशस्वभावा जायन्ते इति क्षणभङ्गसिद्धिः।

किं च प्रयत्नरक्षितानामपि घटादीनां कियतापि कालेनाऽवयवक्षयविश्लेषवशेन विनाशो दृश्यते विनैव मुसलप्रहारादिभिः। सोयमुत्पत्तिप्रभृति किंचित् किंचिदन्यथात्वमन्तरेण नोपपद्यते, प्रत्यक्षेणैव चान्यथात्वमभिनव—पुराणावस्थयोरज्ञातघटोत्पत्तिकालैरपि पुरुषैरुपलभ्यते। न चैकस्यैव घटस्य नानारूपत्वं सम्भवति, नानात्वैकत्वयो-

---

उपस्थापन करती हुई, अनपेक्षताकी विरोधिनी सापेक्षताका निवारणकर देती है। (इस प्रकार व्यतिरेक व्याप्तिके द्वारा प्रकृत अर्थको सिद्धकर, अन्वय-व्याप्तिके द्वारा भी उसे सिद्ध करते हैं 'अथवा' इत्यादिसे) अथवा हेत्वन्तरकी अपेक्षा रखनेवाले वस्त्र गत रागादिमें अवश्यं भाविता नहीं। उसी व्याप्तिके द्वारा उस अध्रुवभाविताकी विरोधिनी जो ध्रुवभाविता है, वह विनाशकी हेत्वन्तरापेक्षाका निवारण कर देतो है, व्यापक विरूद्धोपलब्धि होनेसे। उक्त अर्थका उपसंहार करते हैं कि निरपेक्ष विनाश स्वाभाविक है। वह जन्मके अनन्तर ही होता है। इस प्रकार क्षणभंग सिद्ध हुआ।

शंका—(विनाश तो कार्य है, वह कारणकी अपेक्षा रखता है। कारण मुसल प्रहारादि है। तब आप कैसे कहते हैं विनाश हेत्वन्तर निरपेक्ष है?)

उत्तर—मुसल-प्रहार आदि तो भिन्न सन्तानके कारण हैं, विनाशके नहीं। देखनेवाले लोग सदृश उत्तरोत्तर क्षणोंके भेदको न देखते हुए, तत्त्वकी भ्रान्तिसे विनाशको न जानते हुए, मुसल प्रहारके अनन्तर विजातीय सन्तानको देखकर, उसी समय विनाशको समझते हुए, मुसलादि ही विनाशके कारण हैं, ऐसा समझ बैठते हैं। वास्तवमें तो कोई विनाशका कारण नहीं। अच्छा तो यह बताइए कि दूसरे कारणसे होनेवाला विनाश भाव पदार्थसे भिन्न है कि अभिन्न? प्रथम पक्ष ठीक नहीं। क्योंकि विनाश होनेपर भी पदार्थकी पहिलेकी तरह उपलब्धि होनी चाहिए। पटकी उत्पत्ति होनेपर घट पृथक् दिखाई देता है। वैसा प्रकृतमें समझिए। अतः अपने कारणोंसे ही पदार्थ विनाश स्वभाववाले उत्पन्न होते हैं। इस प्रकार क्षणभंगकी सिद्धि होती है।

और सुनिए प्रयत्नसे सुरक्षित घटादि पदार्थोंका कुछ कालके बाद, अवयवोंके क्षरण तथा पृथक् होनेसे मुसल प्रहारके बिना भी विनाश देखा जाता है। यह उत्पत्तिसे लेकर कुछ न कुछ परिवर्तनके बिना सिद्ध नहीं होता। जिन लोगोंने घटोत्पत्ति कालको नहीं समझा, उन्हें भी नई और पुरानी अवस्थाका अन्यथात्व प्रत्यक्ष दिखाई देता है। शंका—यदि कहें एक ही घटके नानारूप होते हैं, अतः अन्यथा भावका दर्शन होता है। उत्तर—नहीं, एक घटका नानारूप होना सम्भव

विरोधात्। तस्मात् प्रतिक्षणमन्यत्वं घटादेः। प्रयोगश्च भवति—

विवादाध्यासिता भावाः सत्त्वात् क्षणविनाशिनः।
दीपवत् प्रत्यभिज्ञापि स्यात् प्रदीपवदेव नः॥ ५१॥

क्षणभंगवादखण्डनम्

अत्राभिधीयते--न तावदर्थक्रियाकारितैव सत्ता, सतो ह्यर्थक्रियाकारिता, न तु सैव सत्ता। न च सर्वस्य भावस्यार्थक्रियाकारितानियमः, अतत्कारिणोपि सम्भवात्। न च ज्ञानकारणत्वमपि सर्वस्य नियतम्, अज्ञायमानस्यापि स्वरूपसद्भावसम्भवात्। न च सर्वज्ञविज्ञानं प्रति, आलम्बनहेतुताऽतीताऽनागतानां भावानां सम्भवति, सम्प्रत्यविद्यमानानां हेतुत्वानुपपत्तेः। हेतुत्वे वा सर्वज्ञज्ञाननिष्पत्तौ सर्वेषां व्यापृतत्वात् क्रमानभ्युपगमेन च पुनर्व्यापारानुपपत्तेः, तल्लक्षणत्वाच्च सत्तायाः सर्वज्ञज्ञानानन्तरमेव समस्तस्य जगतः शून्यताप्रसङ्गः, इति यत्किंचिदेतत्।

सम्भवति च भावानां क्रमेणार्थक्रियाकारित्वम्[1], सहकारिव्यपेक्षया विलम्बोपपत्तेः। सहकारिणश्चातिशयमागन्तुकं भावाद् भिन्नमभिन्नं वा जनयन्त उपकुर्वन्त्येव[2]।

नहीं। क्योंकि नानात्व और एकत्वमें परस्पर विरोध है। अतः घटादि प्रतिक्षण अन्यत्व = भिन्न भिन्न हैं। उक्त अर्थका अनुमान श्लोकसे करते हैं। अर्थ = 'विमत भाव पदार्थ क्षणिक होते हैं, सत्त्व होनेसे। दृष्टान्त है—दीप। प्रत्यभिज्ञा भी सादृश्यको लेकर होती है। हमारे मतमें दीपकी तरह प्रत्यभिज्ञा भी सिद्ध होती है॥ ५१॥

अब सिद्धान्त कहते हैं 'अभिधीयते इत्यादिसे। जो पूर्व पक्षीने कहा है—अर्थक्रियाकारिता ही सत्ता है, ऐसी बात नहीं है। सत् धर्मोंकी अर्थक्रियाकारिता होती है, वही सत्ता नहीं है। सभी पदार्थोंकी अर्थक्रियाकारिता होनेका नियम है, ऐसा भी नहीं। अर्थक्रियाकारि न होते होते हुए भी पदार्थका होना सम्भव है। ज्ञानके प्रति विषय कारण होता है, यह भी सबके लिए नियम नहीं। अज्ञात पदार्थकी स्वरूप सत्ताका होना भी सम्भव है। यह जो पूर्वपक्षीने कहा था कि सर्वज्ञ बुद्धके ज्ञानके प्रति सभी पदार्थ विषय होते हैं, ऐसी बात भी नहीं है। क्योंकि सभी पदार्थ अतीत भी होते हैं, अनागत भी होते हैं, उनका सर्वज्ञ ज्ञानके प्रति आलम्बन होना सम्भव नहीं। जो पदार्थ है ही नहीं उसकी कारणता अयुक्त है। यदि कारण माना जाए तो सर्वज्ञ बुद्धको ज्ञान होनेपर सभी पदार्थोंके व्याप्त होनेसे उनका क्रम तो है ही नहीं। अतः पुनः व्यापारकी अनुपपत्ति है। अर्थक्रियाकारिता ही उनका स्वरूप होनेसे सर्वज्ञका ज्ञान होनेके अनन्तर ही समस्त जगतकी शून्यताका प्रसंग होने लगेगा, अतः यह कुछ भी नहीं है। (अर्थात् क्षणिकताका होना असंगत है)

पदार्थोंमें क्रमसे अर्थक्रियाकारिताका होना सम्भव है। उसमें सहकारि कारणको अपेक्षासे देर होना उचित है। और सहकारी कारण भावसे भिन्न आगन्तुक अतिशयको उत्पन्न करते ही हैं। उसीका दृष्टान्तसे समर्थन करते हैं 'यथा' इत्यादिसे। जैसे बीजका पृथ्वी और जलसे संयोग होनेसे

* इसका विशेष विवेचन न्यायकणिका टीका, पृ० १२६, पर देखना चाहिए।

१. अर्थक्रियाकरणत्वमिति मुद्रितपुस्तके पाठः। २. कुर्वन्त्येनेति 'क' 'ग' पुस्तकयोः पाठ।

यथा बीजस्य क्षितिसलिलसंयोगेऽतिशयः, तदलाभे स्थायिनोपि बीजस्य प्रागङ्कुरानारम्भः, लाभेत्वारम्भ इति न काचिदनुपपत्तिः ।

नन्वेवं संयोगस्यैव कारणत्वं स्यान्नतु बीजस्य ? नैवम्, संयोगमात्रात्तदुत्पत्त्यदर्शनात्। न हि क्षितिसलिलसंयोगोऽङ्कुरं जनयति। बीजविशिष्टस्य तु संयोगस्य कारणत्वे विशेषणीभूतस्य बीजस्यापि कारणत्वमङ्गीकार्यम्। यस्तु सहकार्यपेक्षां अपह्नुते[1] तस्य क्षितिसलिलसंयोगानपेक्षात् कुसूलस्थादेव बीजादङ्कुरो जायेत।

नन्वन्त्यक्षणप्राप्तः समर्थ एव भावोऽनपेक्षो जनयितुम्, निरपेक्षोप्यसौ सहकारिभिर्विना नास्तीति तैर्विना न करोति, कुसूलस्थं हि बीजमन्यदेव, अन्यच्चेदं क्षितिसलिलसंयुक्तं यतोऽङ्कुरो जायते ? सत्यम्, इदं त्वत्र वक्तव्यम्—यदिदमन्त्यक्षणप्राप्तं क्षितिसलिलसंयुक्तमङ्कुरजनकम्, तद् यदि कृषीवलप्रयत्नविरहात् कुसूलस्थमेव स्यात् तदापि किमङ्कुरं जनयति ? ओमिति चेत् ? किमर्थं तर्हि कृषीवलस्य प्रेक्षापूर्वकारिणः प्रयासः, विदुषां च स्वर्गापवर्गार्थं चैत्यवन्दनादिप्रयासः, तदुपदेशश्च देशिकानामनर्थकः स्यात्, अन्त्यक्षणप्राप्ताद्विज्ञानादेव धर्माधर्मानपेक्षात् स्वर्गापवर्गसिद्धेः। तस्मात्सहकार्यपेक्षाऽङ्गीकर्तव्या। ततश्च सहकारिसन्निधिक्रमेण सम्भवति स्थायिनोपि भावस्य क्रमे-

---

अतिशय होता है। उसके अभावमें स्थाई बीज भी पहिले अंकुर उत्पन्न नहीं करता। उसकी प्राप्ति होनेपर बीज अंकुरको उत्पन्न करता है, अतः इसमें कोई असंगति नहीं।

शंका—सहकारि कारणसे अतिशय माननेपर संयोग ही कारण होगा, बीजकी कारणता नहीं। उत्तर—ऐसा नहीं, केवल पृथ्वी-जलके संयोगसे अंकुरकी उत्पत्ति देखी नहीं जाती। क्योंकि पृथ्वी-जलका संयोग अंकुरको उत्पन्न नहीं करता। बीजसे युक्त पृथ्वी जलका संयोग कारण मानना होगा। तब विशेषणरूप बीजकी भी कारणता गलेपादुका न्यायसे माननी ही होगी जो वादी सहकारी कारणको अपेक्षाको नहीं मानता उसके मतमें पृथ्वी जलके संयोगको बिना अपेक्षा किए ही कुसूलस्थ बीजसे अंकुर होने लगेगा।

शंका—यदि कहा जाए भावपदार्थ तो कार्योत्पत्तिमें समर्थ ही है, तथापि अन्तिम क्षणको प्राप्तकर निरपेक्ष होकर कार्य उत्पन्न करता है। निरपेक्ष होते हुए भी यह पदार्थ सहकारि कारणोंके बिना अन्तिम क्षणको प्राप्त नहीं है। अतः सहकारि कारणोंके बिना कार्य उत्पन्न नहीं कर सकता। जैसे कुसूलस्थ बीज दूसरा है, पृथ्वी-जलसे संयुक्त बीज दूसरा, जिससे कि अंकुर उत्पन्न हाता है। उत्तर—ठाक है, किन्तु यहां यह कहना आवश्यक है कि यह अन्तिम क्षणको प्राप्त बोज ही पृथ्वी जलसे संयुक्त होकर, अंकुरका जनक होता है, तब कृषिवल=किसानके प्रयत्नके बिना भी कुसूल स्थित बीज अंकुरको उत्पन्न क्यों नहीं करता ? यदि हाँ कहोगे तो ? सोच विचार कर बीज बोने वाले किसानका प्रयत्न किस लिए है ? अर्थात् व्यर्थ है। और सुनिए-विद्वानोंका स्वर्ग या अपवर्गकी प्राप्तिके लिए अग्निहोत्र चैत्रवन्दन आदिका प्रयास तथा आचार्योंके उपदेश भी निरर्थक हो जाएंगे। क्योंकि अन्तिम क्षणको प्राप्त विज्ञानसे ही स्वर्ग और अपवर्गको सिद्धि हो जाएगी। उस ज्ञानको धर्माधर्मकी अपेक्षा नहीं, अतः सहकारिको अपेक्षा माननी चाहिए। सहकारि कारणोंका समीपताके

---

१. न मनुते इति 'क' पुस्तके पाठः ।

णार्थक्रियाकरणमिति विपक्षे बाधकप्रमाणाभावादनियता क्षणिकत्वेन सत्ता नालं तदनुमापयितुम्। न च ध्रुवभावितया विनाशस्य हेत्वन्तरानपेक्षत्वम्, घटसन्ताने कपालसन्तानस्य ध्रुवभाविनो मुसलप्रहारादिहेत्वन्तरापेक्षादर्शनादनैकान्तिकत्वात्।

ननु हेत्वन्तरेण भावाद् भिन्ने विनाशे जाते विनाशिनोपि भावस्य पूर्ववदुपलब्धिः स्यात्, तस्मात् स्वाभाविको विनाशः। किमिदं स्वाभाविकम्[1] ? इति। भावस्वभावादेव विनाशो जायते, न हेत्वन्तरादित्यर्थः।

ननु भावादपि जातो विनाशो भावाद् भिन्नश्चेत् ? तुल्य एव दोषः पूर्ववदुपलब्धिः स्यादिति। अथाऽभिन्न एव विनाशो भावात् ? ततोविनाशस्याऽप्रत्यक्षत्वाद् भावोप्यप्रत्यक्षः स्यात्। अत्यन्तविपरीतस्वभावयोश्च भावाभावयोरेकत्वाभिधानं साहसमात्रम्।

अथापि विनाशो नाम न किंचिद् भिन्नमभिन्नं वा तत्त्वम्, तुच्छत्वादिति। ततो जातस्य भावस्याऽसति विनाशे नित्यत्वमेव स्यादिति सुसमर्थितः क्षणभङ्गः। तस्माद् भिन्नेनापि विनाशेन भावस्योपलब्ध्यादि निरस्यत इत्यकामेनाप्यभ्युपगन्तव्यम्।

क्रमसे अस्थाई पदार्थमें भी क्रमसे अर्थक्रिया कारिता होती है। अतः क्षणिकताके विरोधी स्थायित्व पक्षमें भी बाधक प्रमाणके न होनेसे अव्यापक क्षणिकतासे सत्ता इस अर्थक्रिया कारिताका अनुमान नहीं करा सकती।

यह जो पूर्व पक्षीने कहा था अवश्यंभाविता विनाशके दूसरे किसी हेतुकी अपेक्षा नहीं रखती। घट सन्तानमें अवश्य होने वाली कपाल सन्तानका मुसल प्रहार आदि दूसरे कारणकी अपेक्षाके देखनेसे व्यभिचारी है। (अर्थात् जहाँ जहाँ ध्रुवभाविता है वहाँ वहाँ हेत्वन्तर अनपेक्षत्व है, इस व्याप्तिका व्यभिचार है; यह ऊपर कह चुके हैं। यह क्षणिकताको सिद्ध नहीं कर सकता) शंका— यदि कहा जाए दूसरे कारणसे विनाश होता है। वह भावसे भिन्न है। उससे विनाश होने पर भी घटादि भाव पदार्थकी पूर्वकी तरह उपलब्धि होनी चाहिए। वह तो नहीं होती, अतः स्वाभाविक विनाश होता है।

आपने विनाशको स्वाभाविक बताया। यह क्या वस्तु है ?❀ भावका स्वभावसे ही विनाश होता है, दूसरे कारणसे नहीं। यदि विनाशको भावसे अभिन्न माना जाए तो विनाशके अप्रत्यक्ष होनेसे भाव भी अप्रत्यक्ष होगा, यह मानकर दोष दिया गया है। परमार्थ दृष्टिसे विनाश और भावका अभेद हो नहीं सकता। इसीको कहते हैं 'अत्यन्त' इत्यादिसे। जिनका स्वभाव अत्यन्त विपरीत है, उन भाव और अभावको एक कहना साहस मात्र है। यदि कहें विनाश कोई भावसे भिन्न या अभिन्न तत्त्व नहीं, तुच्छ होनेसे। तब उत्पन्न भावका विनाश न होनेसे वह नित्य ही होगा। आपने क्षण भंगका बड़ी अच्छी तरहसे समर्थन किया। इससे भावसे भिन्न विनाशसे उपलब्धि आदिका निरास होता है, यह न चाहते हुए भी मानना होगा।

❀ यहां 'किमिदम्' इत्यादि सिद्धान्तीका प्रश्न है। और क्षणभंगवादीका उत्तर है 'भावस्वभावादिति' अतः विनाश कोई अलग वस्तु नहीं। अर्थात् जैसे विनाशके पूर्वकालमें घटकी उपलब्धि होती है वैसे ही विनाशके उत्तर कालमें भी उपलब्धि होनी चाहिए।

---

१. किमिदं स्वाभाविकत्वमिति 'ख' पुस्तके पाठः।

यत्तु प्रतिक्षणमवस्थाभेद इति, भवतु नैतावताऽवस्थावतो भावस्य प्रतिक्षणं विनाशेन भवितव्यम्, प्रमाणाभावात्। नानाऽवस्थानामपि युगपदेकस्मिन् धर्मण्यविरुद्धानाम्, क्रमेण विरुद्धानां च सम्भवात्। ततश्च नूतनाद्यवस्थाः क्रमेणानुभूय पुराणावस्थां प्राप्तस्य प्रयत्नरक्षितस्यापि युक्तोऽवयवविश्लेपाद्विनाशः। न च सत्तया दीपदृष्टान्तमात्रेण घटादेरपि क्षणिकत्वम्, सत्तायाः संदिग्धविपक्षव्यतिरेकादहेतुत्वात्। प्रतिज्ञायाश्च प्रत्यभिज्ञाप्रत्यक्षविरोधात्।

न च सादृश्यात्तदुपपत्तिः, अवयवसामान्याऽसम्भवात्। अनुवृत्तं हि सामान्यं भवति[1], न च सर्वक्षणिकवादिनामनुवृत्तं किंचित्सम्भवति। सम्भवे वा न सर्वं क्षणिकम्[2]। तस्मान्न सर्वभावानां क्षणिकत्वम्, न तरां शब्दस्य। तस्य ह्यन्तेपि विनाशो नास्ति, यतः सूक्ष्मविनाशकल्पना स्यात्। तस्मान्नित्यः शब्दः। प्रयोगश्च भवति—नित्यः शब्दः श्रावणत्वाच्छब्दत्ववत्।

यह जो पूर्व पक्षीने कहा था प्रतिक्षण भाव पदार्थोंका अवस्थाभेद होता है, इसलिए सब पदार्थ क्षणिक सिद्ध होते हैं, इसपर सिद्धान्तीका कहना है कि अवस्था भेद होवे, इतनेसे अवस्थावान् पदार्थका प्रतिक्षण विनाश होना चाहिए, इसमें कोई प्रमाण नहीं। नाना अवस्थाओं, जिनका आपसमें कोई विरोध नहीं, उनका एक ही धर्मीमें युगपत् होना सम्भव है। और विरुद्ध अवस्थाओंका एक ही धर्मीमें क्रमसे होना भी सम्भव है। (अतः केवल अवस्था भेदसे क्षणिकताकी सिद्धि नहीं हो सकती, यह इसका निष्कर्ष है) इसलिए नवीन आदि अवस्थाओंका क्रमशः अनुभव करके, पुरानी अवस्थाओंको प्राप्त भाव पदार्थ, जो कि प्रयत्नसे सुरक्षित है, उसका भी अवयवोंके विश्लेषसे विनाश युक्त ही है। दीप दृष्टान्त मात्रसे विपक्षमें (स्थायित्व पक्षमें) सत्ताके सम्भव होनेसे हेतु व्यभिचारी है। अतः सत्ता घटादिकी क्षणिकतामें हेतु नहीं बन सकती। 'विमतं सत्' इस प्रतिज्ञाका प्रत्यभिज्ञा प्रत्यक्षसे विरोध होनेसे विपक्षमें सत्ताका व्यतिरेक सन्दिग्ध है। इसलिए भी क्षणिकताका अनुमान नहीं हो सकता। शंका—प्रत्यक्षका प्रत्यभिज्ञासे प्रत्यक्ष विरोध बताया गया है*।

उत्तर—अवयव सामान्यके असम्भव होनेसे अनुगत ही सामान्य होता है। सभीको क्षणिक मानने वाले बौद्धोंके मतमें अनुगत कोई सामान्य नहीं हो सकता। यदि सम्भव हो तो सभी पदार्थोंकी क्षणिकता सिद्ध नहीं होगी। यही रस्सा-कसी है। अतः सभी पदार्थोंकी क्षणिकता हो नहीं सकती। शब्दकी क्षणिकता तो किसी भी प्रकार सम्भव नहीं। शब्दका अन्तमें भी विनाश नहीं होता, जिससे सूक्ष्म विनाश (प्रतिक्षण विनाश) की कल्पना हो सके। अतः शब्द नित्य है। उक्त अर्थमें अनुमान बताते हैं—'शब्द नित्य है, श्रवणेन्द्रिय जन्य ज्ञानका विषय होनेसे, शब्दत्वकी तरह§।

---

* अर्थात् प्रत्यभिज्ञासे प्रत्यक्षका विरोध है नहीं, क्योंकि सादृश्यको लेकर प्रत्यभिज्ञाकी सिद्धि हो सकती है। यह वही दीप ज्वाला है, इस प्रत्यभिज्ञा प्रत्यक्षमें सादृश्यको लेकर ही पूर्व पक्षी और सिद्धान्तीकी अभीष्ट सिद्धि माननी होगी।

§ इस प्रकार युक्तियों द्वारा उपपादित अर्थका अनुमान द्वारा समर्थन किया है। 'शब्दो नित्यः श्राव-

---

१. सम्भवतीति 'क' 'ख' पुस्तकयोः पाठः। २. न सर्वक्षणिकत्वमिति 'क' पुस्तके पाठः।

शब्दत्वसामान्यसमर्थनम्

न च शब्दत्वं नास्तीति भ्रमितव्यं प्रत्यभिज्ञानात् । अरण्ये हि गच्छन्तोऽश्रुतपूर्वं शब्दविशेषं श्रुत्वा कस्यायं प्राणिनः शब्द इति संदिहन्ते । न च सामान्यदर्शनमन्तरेण विशेषसंशयो घटते । तथाऽवान्तरजातिरपि वर्गतृतीयगकारादिष्वनुवृत्ता ककारादिभ्यो व्यावृत्ता काचिदस्ति ।

अवान्तरसामान्यसाधनं तत्प्रयोजनकथनं च

तथा वर्गप्रथमेषु द्वितीयेषु चतुर्थेषु पञ्चमेषु च यथास्वमनुवृत्ताः सन्ति जातयः । कथमवगम्यन्ते[1] ? प्रत्यभिज्ञानादेव । तथा हि—कियत्यपि दूरदेशे दकारमुच्चारितं श्रुतवतां गकारादिषु संशयो भवति, न चायं संशयो शब्दत्वनिबन्धनो गकारादिष्वभावात् । अतोस्ति तृतीयादिष्वनुवृत्तमन्येभ्यो व्यावृत्तं रूपम्, यदुपलम्भादेष संशयः । तथा धकारोच्चारणे भकारादिषु संशयः नान्येषु । तेन चतुर्थेष्वप्यस्ति सामान्यम् । एवं प्रथमेषु द्वितीयेषु पञ्चमेषु च यथास्वं सामान्यानि । तैरेव दृष्टान्तैः शब्दस्य श्रावणत्वहेतुना नित्यत्वानुमानम् ।

ननु शङ्खादिनादानामनित्यत्वेपि श्रावणत्वादनैकान्तिको हेतुः ? न, तेषामपि प्रत्यभिज्ञया नित्यत्वात् । यदि तेषु प्रत्यभिज्ञा नास्ति, ततो 'ध्वन्यन्यत्वे सति' इति

शंका—उक्त अनुमानमें शब्दत्वको दृष्टान्त किया है । शब्दत्व तो है ही नहीं । उत्तर—ऐसा भ्रम नहीं करना चाहिए । प्रत्यभिज्ञा प्रत्यक्षसे शब्दत्व सिद्ध है । उसीका उपपादन करते हैं 'अरण्ये' इत्यादिसे । बनमें जाते हुए लोग अश्रुत पूर्व शब्दको सुनकर यह किस प्राणीका शब्द है, ऐसा सन्देह करते हैं । सामान्य धर्मके दर्शनके विना किसका यह शब्द है ऐसा विशेष संशय नहीं होता । (इसलिए शब्दत्व सामन्य मानाना होगा) इसी प्रकार आवान्तर जातिको भी मानना होगा । जैसे वर्गके तृतीय गकारादियोमें अनुगत ककारादिसे भिन्न कोई अवान्तर जाती है । उसी प्रकार वर्ग प्रथम वर्ग द्वितोय वर्ग चतुर्थ तथा वर्ग पंचममें भी क्रमशः अनुगत जातियाँ रहती हैं । शंका—यह कैसे ज्ञात होता है ? उत्तर—प्रत्यभिज्ञा प्रत्यक्षसे ही । इसीका 'तथाहि' से उपपादन करते हैं । कुछ दूरीमें उच्चरित शब्दको सुनने वालोंको गकारादियोंमें संशय होता है । यह संशय दत्व=दकारको लेकर नहीं होता, क्योंकि गकारादियोंमें उसका अभाव है । अतः तृतीयादि अक्षरोंमें अनुगत तया अन्यसे पृथक् कोई रूप है, जिसके देखनेसे यह संशय होता है । वैसे धकारसे उच्चारणमें भकारादिमें संशय होता है, दूसरेमें नहीं । इससे अतुर्थ वर्णमें भी सामान्य है । इसी प्रकार प्रथम द्वितीय, पंचम वर्णोंमें भी यथाक्रम सामान्य होते हैं । इन्हीं दृष्टान्तोंसे शब्दके श्रावण प्रत्यक्ष विषयत्व रूप हेतुसे नित्यताका अनुमान होता है ।

